श्रवणेति। निषध जनपदेन्द्रो निषधदेशाधिपतिर्नलः, आनन्देन देवदूतीनां तथाविधप्रत्याख्यानश्रवणदर्शनाभ्यां जातेन प्रमोदेन सान्द्रो घनः परिपूर्णचित्तः सन्, दिगधिपानाम् इन्द्र-यम वरुण वह्नीनां कृपया, आप्तात् लब्धात्, दूतेयस्य एतन्मूलात्, संविधानात् अदृश्यत्वसंघटनाद्धेतोः, स्वेन स्वकीयेन श्रवणयोः कर्णकुहरयोरेव पुटौ पात्रविशेषौ तयोर्युगेन द्वयेन, साधु सम्यक्, उपनीतमानीतम्, बालाया दमयन्त्या रागवाचः अनुरागसूचकवाक्यात् उत्थमुत्पन्नम्, इत्थं "किन्नाम तस्मै मनसा नराय" इत्यादिरूपम्, मधु भावमेव पुष्परसम्, पातुं, मद्यं श्रोतु मास्वादयितुं च, अलभत प्राप्तवान्। दिगधिपकृपया लब्धमदृश्यत्वं विना स्वकीयश्रवणपुटयुगकर्तृकं, कदाऽप्यानयनमसम्भवमेवासीदिति भावः। एतेनादृश्यत्वेनैव दमयन्त्याः सर्वाङ्गदर्शनसम्भवात् तदर्थं नामकामाविष्कारसूचनमत्र वेदितव्यम्। अन्योऽपि पत्रपुटयुगेनानीतं मधु पिबति।

अत्र श्रवणयोः पुटत्वारोपान्निरङ्गं केवलरूपकम् भावमधुनोर्भेदेऽपि तयोरभेदाध्यवसायादतिशयोक्तिः, केवलाश्रयत्वेन या तु सृष्टिः। पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः।

मालिनी वृत्तम् ॥११२॥

বাঙ্গালা—নলরাজা আনন্দপূর্ণচিত্ত হইয়া ইন্দ্রপ্রভৃতি দিকপালগণের কৃপায় লব্ধ এইরূপ অদৃশ্যভাবশতঃই, আপন কর্ণপুট (পুট ঠোঙা) কর্তৃক আনীত, দময়ন্তীর অনুরাগসূচক বাক্য হইতে উৎপন্ন ভাবমধু পান করিবার জন্য পাইয়াছিলেন। ১১২।

श्रीहर्षमिति। [illegible]

[illegible]

व्रह्माद्वयस्यान्वभवत् प्रमोदं रोमाग्र एवाग्रनिरोधितोऽस्याः ।
यथोचितौत्यं तदशेषदृष्टौ अथ स्मराद्वैतमुदं तयासौ ॥३॥
वेलामतिक्रम्य पृथुं मुखेन्दोः आलोकपीयूषरसेन तस्याः ।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥४॥

मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः ।
चिरेण तन्मध्यममुञ्चतास्य दृष्टिः कृशीयः स्खलनाद्भिया नु ॥५॥
प्रियाङ्गपान्था कुचयोर्निवृत्य निवृत्य लोला नलदृग् भ्रमन्ती ।
वलीतनां तन्मृगनाभिलेप-तमः-समासादितदिग्भ्रमेव ॥६॥
विश्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक् तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भा-स्तम्भावुपाश्रित्य करेण गाढम् ॥७॥

अन्वयः—अस्य दृष्टिः तन्मुखेन्दोः सुधायां किमु मग्ना, तत्कुचयोः अन्तः किं लग्ना (सती) स्थिता, स्खलनात् भिया नु कृशीयः तन्मध्यं चिरेण अमुञ्चत ॥५॥

मग्नेति । अस्य नलस्य दृष्टिः, तस्याः दमयन्त्याः मुखेन्दोः सुधायां [illegible] अमृते, किमु मग्ना अन्तःप्रविष्टा अभूत् । येनोल्लासातुल्यमिव विलम्बितवतीति भावः । तथा तस्याः दमयन्त्याः कुचयोः स्तनयोः, अन्तः मध्ये, किं लग्ना अनन्येन दृढालम्बत्वात् सक्तैव सती स्थिता, विलम्बेनागमनादित्याशयः । तथा स्खलनात् पतनात्, भिया नु भयेनेव, कृशीयः सुतरां कृशम्, तस्याः दमयन्त्याः मध्यं कटिदेशम्, चिरेण बहुकालेन, अमुञ्चत अत्यजत् । नलः उल्लसितवरवर्णोदर्शनात् दमयन्त्याः मुखं स्तनौ कटिदेशञ्च बहुकालं सादरमद्राक्षीदिति भावः ।

अत्र [illegible] तन्मुखेन्दोरिति [illegible] दृष्टिः । [illegible]

वासः परं नेत्रमहं न नेत्रं किमु त्वमालिङ्गय तन्मयापि।
उरोनितम्बोरु कुरु प्रसादम् इतीव सा तत्पदयोः पपात ॥८॥

सान्वय —तस्य दूतस्य उरः तथाऽऽ नितम्ब चक्रे [illegible]

दृशोर्यथाकाममवोपहृत्य स प्रेयसीमालिकुलञ्च तस्याः ।
इदं प्रमोदाश्रुतरङ्गभृतेन महीमहेन्द्रो मनसा जगाद ॥९॥

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेतापि न वा तदेतत् प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥१०॥

तरङ्गिणी भूमिभृतः प्रभूता (१) जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि यौवनेन यस्यां तयोच्चैस्तनतावनेन ॥११॥

বাঙ্গালা—প্রেয়সি। বস্তুত কেবল নেত্র, আমি কি নেত্র নাই? অতএব তুমি আমাকে দিয়াও, নিজের বক্ষ, নিতম্ব এবং উরুদ্বয়কে আলিঙ্গন করাও, অতএব বহ, ইহা বলিয়াই যেন নলের দৃষ্টি, দময়ন্তীর চরণযুগলে পতিত হইল ।৮।

অন্বয়:—অথ স মহীমহেন্দ্র প্রেয়সী তস্যা অলিকুলঞ্চ দৃষ্ট্বা ইদং প্রমোদাশ্রুতরঙ্গভৃতেন মনসা ইদং জগাদ ।৯।

जम्बालजालात् किमकर्षि जम्बूनद्या न हारिद्रनिभप्रमेयम् ।
अप्यङ्गयुग्मस्य न सङ्गचिह्नम् उन्नीयते दन्तुरता यदत्र ॥१३॥
सत्येव साम्ये सदृशादशेषात् गुणान्तरेणोच्चरूपे यदङ्गैः ।
अस्यास्ततः स्यात्तुलनापि नाम वस्तु त्वमीषामुपमापमानः ॥१४॥

अन्वयः.—हारिद्रनिभप्रमा इयं जम्बूनद्या जम्बालजालात् किं न अकर्षि (विधात्रा)। यत् अत्र अङ्गयुग्मस्य सङ्गचिह्नं दन्तुरता अपि न उन्नीयते ॥१३॥

जम्बालेति। हारिद्रनिभा हरिद्रारञ्जितवस्त्रादिसमानवर्णा प्रभा कान्तिर्यस्याः सा तादृशी, इयं दमयन्ती जम्बूनद्याः जम्बूनामकफलरसजातायाः कस्याश्चित् सरितः, जम्बालजालात् कर्दमसमूहात्, किं न अकर्षि विधात्रा आकृष्य उत्पादिता? अपि तु अकर्ष्येवेत्यर्थः। यत् यस्मात् अत्र दमयन्त्याम् अङ्गयुग्मस्य करचरणादियुगलस्य, सङ्गः सन्धिदेशानां चिह्नं चिह्नभूता, दन्तुरता उच्चावचतापि, न उन्नीयते तथा न लक्ष्यते। तथा च जम्बूनद्याः कर्दम एव हि जाम्बूनदं नाम सुवर्णं जायते, तस्मादाकृष्योत्पादनेनैव सुवर्णवर्णा जाता, तस्य कर्दमजातत्वाच्चास्याः सन्धिस्थानेषु निम्नोन्नतता न वर्त्तत इत्याशयः।

अत्र किं नाकर्षीत्यर्थापत्तिः तदनुप्राणिता च तस्मादाकृष्योत्पादनसम्बन्धेऽपि तदसम्बन्धादतिशयोक्तिरित्यनयोरङ्गाङ्गिभावेन सङ्करः; सोऽपि च छेकानुप्रासेन संसृष्टः। पूर्ववत् रसः, माधुर्यं गुणः, वैदर्भी च रीतिः।

"निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ" इत्यमरः ॥१३॥

पुराकृति स्त्रैणमिमां विधातुम् अभूद्विधातुः खलु हस्तलेखः।
येयं भवद्भाविपुरन्ध्रिसृष्टिः सास्यै यशस्तज्जयजं प्रदातुम्॥१५॥

अङ्गानि धातोर्गुरुत्वदङ्गात् यथा यथा नन्ति तथा तथा तैः।
तस्याधिकस्यौपम्ययोपमाता दाता प्रतिष्ठां खलु तेभ्य एव॥१६॥

नास्वादि दृष्टापि विमोहिनीव दोषैरयोग्यैः खभिवेति मन्ये ।
अन्येषु तैराकुलितस्तदस्या वसत्यसावप्यनघो गुणौघः ॥१७॥

[illegible] चन्द्रनीलोत्पलादीनि वस्तूनि, एतस्या [illegible] अङ्गात् [illegible] यथा यथा येन येन [illegible] तथा तथा तेन तेनैव [illegible] ।

[illegible] पूर्ववत् ।

[illegible]

औज्झि प्रियाङ्गै र्घृणयेव (१) रूक्षा न वारिदुर्गात्तु वराटकस्य।
न कण्टकैरावरणाच्च कान्तिः धूलीभृता काञ्चनकेतकस्य ॥१८॥
प्रत्यङ्गमस्यामभिकेन रक्षां कर्तुं मघोनेव निजास्त्रमस्ति।
वज्रं च भूषामणिमूर्त्तिधारि नियोजितं तद्द्युतिकार्म्मुकञ्च ॥१९॥

अन्वयः—प्रियाङ्गैः रूक्षा वराटकस्य कान्तिः घृणया इव औज्झि, वारिदुर्गात् औज्झि (इति) तु न; धूलीभृता काञ्चनकेतकस्य कान्तिश्च घृणया इव औज्झि, कण्टकैः आवरणात् औज्झि (इति) तु न ॥१८॥

औज्झीति। प्रियाया दमयन्त्या अङ्गैः, रूक्षा स्निग्धतारहिता, अतएव वराटकस्य पद्मबीजकोषस्य कान्तिः, घृणया जुगुप्सयेव, औज्झि अत्याजि, किन्तु वारिदुर्गात् जलरूपदुर्गस्थितत्वात् औज्झि ग्रहीतुमशक्यत्वात् अत्याजीति न। तथा धूलीभृता परागपूर्णा, अतएव काञ्चनकेतकस्य स्वर्णकेतकीपुष्पस्य कान्तिश्च, घृणया जुगुप्सयेव, औज्झि अत्याजि; किन्तु कण्टकैः तीक्ष्णाग्रावयवैः, आवरणात् आच्छादनात्, औज्झि ग्रहीतुमसामर्थ्यात् अत्याजि, इति न। दमयन्त्या अङ्गानि पद्मबीजकोषात् स्वर्णकेतकीपुष्पाच्च स्निग्धमसृणगौरवर्णानीति भावः।

अत्र कान्तिरिव कान्तिरिति सादृश्याक्षेपान्निदर्शनाभेदः, घृणयेवेति-गुणहेतूत्प्रेक्षा, घृणा प्रति रूक्षा धूलीभृतेति पदार्थयोर्हेतुत्वात् काव्यलिङ्गद्वयम्, औज्झीत्येकया क्रियया कान्तिद्वयस्य कर्मतया अन्वयात् तुल्ययोगिता चेत्येतेषामङ्गाङ्गिभावेन सङ्करः। रसादयः पूर्ववत्।

"बीजकोषो वराटकः" इत्यमरः ॥१८॥

বাঙ্গালা—প্রিয়তমা দময়ন্তীর অঙ্গ সকল, পদ্মের বীজকোষের (বোঁথরের) কান্তিকে রূক্ষ বলিয়া, ঘৃণা করিয়াই যেন পরিত্যাগ করিয়াছে, কিন্তু জলদুর্গের ভিতরে আছে বলিয়া যে পরিত্যাগ করিয়াছে, এমন নহে। আবার সোনাচাঁপাফুলের কান্তিকেও ধূলীপূর্ণ বলিয়া, ঘৃণা করিয়াই যেন পরিত্যাগ করিয়াছে, কিন্তু কণ্টকের আবরণ রহিয়াছে বলিয়া যে পরিত্যাগ করিয়াছে, তাহা নহে।১৮।

अन्वयः—अस्याम् अभिकेन मघोना प्रत्यङ्गं रक्षां कर्तुं भूषामणि-मूर्त्तिधारि निजास्त्रं वज्रञ्च तद्द्युति-कार्म्मुकञ्च नियोजितम् इव अस्ति ॥१९॥

प्रत्यङ्गमिति। अस्यां दमयन्त्याम्, अभिकेन कामुकेन, मघोना इन्द्रेण, प्रत्यङ्गम् अस्याः सर्वेषामेवाङ्गानाम्, अन्येन मङ्गलात् रक्षां कर्त्तुम्, भूषामणीनाम् अलङ्काररत्नानां मूर्त्तिं वेषं धरतीति तत् तादृशम् निजास्त्रं स्वीयास्त्रभूतम्, वज्रमणिश्च, तस्य वज्रस्य द्युतिः प्रभा तद्रूपं कार्म्मुकं धनुश्च, नियोजितमिव स्थापितमिव अस्ति वर्त्तते। अस्या अलङ्कारेषु बहूनि हीरकखण्डानि विद्यन्ते, तेषां द्युतिश्च रत्नान्तरद्युतिमिश्रिता नानावर्णा सती इन्द्रधनुराकारेण वर्त्तत इति भावः।

अत्र भूषामणिमूर्त्तिधारीति अन्यमणिरूपप्रकृतमणिनिषेधेन वज्रनिक्षेपणादपह्नुतिः, हीरकवज्रयोर्मणिद्वि वज्रशब्दे वैकाभेदाध्यवसायादतिशयोक्तिः, तद्द्युतिकार्म्मुकमिति निरङ्गं केवलरूपकम्, नियोजितमिति क्रियोत्प्रेक्षा चेत्येतेषामङ्गाङ्गिभावेन सङ्करः। पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः।

"कामुके कमिताऽनुकः।" "अभिकः कामयिताऽभीकः कमनः कमनोऽभिकः।" "अत्र स्यात्तोऽशे वर्त्ति" इत्यमरः ॥१९॥

বাঙ্গালা—ইহার প্রতি কামুক ইন্দ্র, ইহার প্রত্যেক অঙ্গ রক্ষা করিবার জন্য, নিজের

अस्याः सपर्वैकविधोः कबन्धः स्थाने मुखस्योपरि वासमाप ।
पक्षस्तु तावद्बहुचन्द्रकोऽपि कलापिना येन जितः कलापः ॥२०॥
अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम् ।
स्फुटं स्फुरद्भङ्ग-कच-च्छलेन (१) तदेव पश्चादिदमस्ति बद्धम् ॥२१॥

---

(১) বন্ধ বস্তুকে এবং তাহার বিস্তারপ নিজের পশ্চাতে [illegible]
বদ্ধ, অন্ধকারের অন্তর্গত রত্নের আকৃতি ধারণ করিয়া রহিয়াছে ॥ ২১॥

अन्वयः—सपर्वैकविधोः अस्याः मुखस्य उपरि कबन्धः स्थाने [illegible] । येन पक्षस्तु तावद्बहु-
चन्द्रकः अपि कलापिना कलापः जितः ॥२०॥

अत्र सामान्येन दमयन्तीं वर्णयित्वा मानुषत्वादूर्ध्वमेव केशादारभ्य [illegible]

अस्याः कचानां शिखिनश्च किन्तु विधिं कलापौ विमतेरगाताम्।
तेनायमेभिः किमपूजि पुष्पैः अभर्त्सि दत्त्वा स किमर्द्धचन्द्रम् ॥२२॥
केशान्धकारादथ दृश्यभाल-स्थलार्द्धचन्द्रा स्फुटमष्टमीयम्।
एनां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ॥२३॥

अत्र धाम्ने न शीतरुचेति व्यस्त निरङ्ग केवलरूपकम्, कचं प्रतिषिध्य अन्धकारस्थापनादपह्नुति, केकानुप्रासश्चेति स सृष्टि। पूर्वरागो रसः, प्रसादो गुण, वैदर्भी च रीतिः।

"अन्धकारोऽस्त्रियां ध्वान्तम्" इत्यमर. ॥२१॥

বাঙ্গালা—দময়ন্তীর মুখরূপ চন্দ্র, সম্মুখের ও পার্শ্বের যে অন্ধকার সরাইয়া দিয়াছে; সেই অন্ধকারই এই কুটিল কেশকলাপছলে স্পষ্টই পিছনের দিকে বদ্ধ রহিয়াছে ॥২১॥

अन्वयः—अस्या. कचानां शिखिनश्च कलापौ विमते. किन्तु विधिम् अगाताम्, तेन एभि. पुष्पैः. अयं किम् अपूजि, अर्द्धचन्द्र दत्त्वा स किम् अभर्त्सि ॥२२॥

अस्या इति। अस्या दमयन्त्याः, कचाना केशाना कलापः समूहः, शिखिनो मयूरस्य च कलाप. पिच्छभारः एतौ द्वौ कलापौ, विमतेर्विपरीतबुद्धेः नामसादृश्येन रूपसादृश्येन च अहमेव तवापेक्षया उत्कृष्ट इति विवादाद्धेतोरित्यर्थः किन्तु विधिं ब्रह्माणम् उभयोरेव सृष्टिकारकतया तस्यैव तारतम्यज्ञानसत्त्वादिति भाव, अगातां गतवन्तौ, आत्मनोस्तद्विवादमीमा सार्थमित्याशय.। तेन च विधिना, एभिरेतत्कर्षेष्वेव दृश्यमानै. पुष्पै., अयं कचकलाप, किम् अपूजि सम्मानित, उत्कृष्टतरत्वात् सत्कारौचित्यादित्यभिप्राय.। अर्द्धचन्द्रम् अर्द्धचन्द्राकारचिह्नात्मक मेचकसमूहमिव अर्द्धचन्द्रं गलहस्तम्, दत्त्वा शिखिन कलाप एव प्रयोज्य, स शिखिनः कलाप, किम् अभर्त्सि भर्त्सितः, कचकलापादपेक्षया तस्यापकृष्टत्वेन सत्कारायोग्यत्वादिति भावः। एतेन मयूरपिच्छापेक्षया दमयन्त्याः केशकलाप. परमसुन्दर इति सूचितम्।

अत एवात्र मयूरपिच्छापेक्षया दमयन्तीकेशकलापस्याधिक्यप्रतिपादनाद्व्यतिरेकालङ्कारः कलापाविति पदश्लेष, मेचकगलहस्तयोर्भेदेऽपि अर्द्धचन्द्रपदश्लेषेणाभेदाध्यवसायादतिशयोक्तिः, वाच्यं क्रियोत्प्रेक्षा चासयश्चैत्यपामङ्गाङ्गिभावेन सङ्कर.। रसादयः पूर्ववत्।

"कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमर.। "अर्द्धचन्द्रस्तु चन्द्रिका। गलहस्ते बाणभेदेऽर्द्धचन्द्रा त्रिवृद्भिदि" इति विश्व.। अगातामिति इणधातोरद्यतन्याद्या विभक्तौ इणो गा" इति गादेशः ॥२२॥

বাঙ্গালা—ইহার কেশকলাপ এবং ময়ূরের পিচ্ছসমূহ ইহারা পরস্পর বিবাদ করিয়া কি ব্রহ্মার নিকট গিয়াছিল, তার পর, ব্রহ্মা কি এই সকল পুষ্প দ্বারা এই কেশকলাপের পূজা করিয়াছেন এবং অর্দ্ধচন্দ্র দিয়া সেই ময়ূরপিচ্ছকে কি ভর্ৎসনা করিয়া তাড়াইয়া দিয়াছেন ॥২২॥

अन्वयः—इयं केशान्धकारात् अथ दृश्य-भाल स्थलार्द्धचन्द्रा अष्टमी स्फुटम्। यत् मनोभुवा एनाम् आसाद्य जगज्जयाय सिद्धिं साधु असाधि ॥२३॥

केशेति [illegible] ललाटं वर्णयति केशेति। इयं दमयन्ती, केश एव अन्धकारं [illegible] सम्यादिमिरं [illegible] [illegible] केशान्धकारादधोदेशे इत्यर्थः, दृश्य सुन्दर दर्शनीयम् भालस्थलं [illegible] एव अर्द्धचन्द्रा

अष्टमी कृष्णाष्टमीराशि स्फुटम् इव [illegible] [illegible]। तथा च [illegible]

पौष्पं धनुः किं मदनस्य दाहे (१) श्यामीभवत्कैशरशेषमासीत् ।
व्यधाद्द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ॥२४॥
भ्रुभ्यां प्रियाया भवता मनोभू-चापेन चापे घनसारभावः ।
निजां यदस्त्रीपदशामपेक्ष्य सम्प्रत्यनेनाधिकवीर्यतार्जि ॥२५॥

रात्रौ यदा मदनमहरस्य यावदन्धकारो वर्त्तते, तत् परञ्च अर्द्धचन्द्रो दृश्यते, तदा अस्या अपि ऊर्द्ध्वभागे केशो वर्त्तते, तदधश्च सुन्दरी ललाटदेशो दृश्यत इति भावः । ननु च किं नाम दृष्ट प्रमाणमित्याह—यद्यस्मादेतौ, मनोभुवा कामेन, एता दमयन्त्यौ ललाटनीव, आसाद्य प्राप्य, जगतां जगाय त्रिजगद्वशित्रिभुवनवशी-करणाय, सिद्धिर्मानवैर्यन्मादनरूपा स्वकार्यसिद्धिः गुटिकादिसिद्धिश्च, साधु सम्यक्, अत्रापि निष्पादिता । अपरोऽपि साधकः कृष्णाष्टमीं प्राप्य रात्रौ गुटिकादिसिद्धिं निष्पादयति । दमयन्त्या ललाटदेश अर्द्धचन्द्राकार इति स्फुटार्थः ।

अत्र मदनार्द्धे निरङ्ककेवलरूपकवदन् तिथौना चन्द्रकलाक्रियाक्षपत्वात् स्फुटस्यन्दस्य च भ्रुवाविशदत् तस्या-स्यानामतिवादकत्वात्साध्या क्रियोत्प्रेक्षा चेत्यं तेषामङ्गाङ्गितया सङ्करः, सोऽपि च अत्राधिक्याधिक्येति अर्द्धकानुमार्गेण न च युज्यते । रसादयः पूर्ववत् ॥२३॥

বাঙ্গালা—আমি স্পষ্ট মনে করি যে, ইনি কৃষ্ণপক্ষের অষ্টমীর রাত্রি, কেন না, ইহার কেশরূপ অন্ধকারের পর সুন্দর ললাটরূপ অর্দ্ধচন্দ্র দেখা যাইতেছে, আর যে হেতু, কামদেব ইহাকে পাইয়া, ত্রিভুবন জয় করিবার জন্য, ভালরূপে সিদ্ধি সম্পাদন করিয়া-ছেন ।২৩।

অন্বয়ঃ—মদনস্য দাহে পৌষ্পং ধনুঃ কিং শ্যামীভবত্কৈশরশেষম্ আসীৎ, ঈশঃ (চ) ক্রুধা তৎ অপি কিং দ্বিধা ব্যধাৎ, বিধিঃ যেন ভৈমীভ্রুবৌ ব্যধত্ত ।২৪।

বিনি স্ত্রীরত্নস্বরূপে বর্ণনমাত্র পৌষ্পমিতি । মদনস্য কামদেবস্য, দাহে দাহসময়ে, পৌষ্পং ধনুঃ মদনস্যৈব

स्मारं धनुर्यद्विधुनोज्झितास्याः यास्येन भूतेन च लक्ष्मलेखा ।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ॥२६॥
इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात् पुष्पमयाशुगेन ।
शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ॥२७॥

भ्रूभ्यामिति । अपि चेति चार्थः । मनोभुवः कामस्य चापेन पुष्पमयत्वात् असारेण धनुषा, प्रियायाः दमयन्त्याः, भ्रूभ्यां भ्रूयुगलेन, भवता भ्रूयुगलत्वं प्राप्नुवता सतेत्यर्थः, घनीनिबिडः सारो बलं यस्य तस्य भावः अतिदृढत्वमित्यर्थः, आपे प्राप्तः । कथमेतदवगम्यत इत्याह यद् यस्मात्, अनेन भ्रूयुगलीभूतेन पुष्पधनुषा निजाम्, अतीवदयोः भूतपूर्व्वामदार्ढ्यावस्थाम् अपेक्ष्य, सम्प्रति भ्रूत्वप्राप्तिकाले, अधिकवीर्य्येण अतिरिक्तबलम्, आज्ञि अर्ज्जितम्, पुष्पमयदशायां यावती मोहनशक्तिरासीत्, अधुना तदपेक्षया समधिकमोहनशक्तिरर्ज्जितेति भावः । भ्रूयुगलमिदमतीवकामोद्दीपकमिति तात्पर्य्यम् ।

अत्र मनोभूचापस्य भ्रूभवनासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कारः द्वितीयपादगतच्छेकानुप्रासेन संसृष्टिः पूर्व्वरागो रसः, वन्धार्थस्य दुरूहत्वादोजो गुणः गौड़ी च रीतिः ।

भ्रूभ्यां भवतेति विशेषणत्वयोरनुपपत्तिस्तु प्रागेव समाहिता ॥२५॥

बाङ्गला।— কামদেবের ধনু প্রিয়তমার জ্রযুগল হইয়া অতিদৃঢ়তা লাভ করিয়াছে যে হেতু, সেই পুষ্পময় ধনু নিজের আদ্য অবস্থা অপেক্ষা করিয়া, এখন অধিক বীর্য্য অর্জ্জন করিয়াছে ॥২৫॥

अन्वयः— स्मारं यत् धनुः अस्याः आस्येन भूतेन विधुना उज्झिता या च लक्ष्मलेखा, लीलाचलत्वोचित-बाल-भावं तत् युग्मम् एतद्भ्रुवौ जन्म आप ॥२६॥

स्मारमिति । स्मरस्य कामस्य इदमिति स्मारम्, यत् धनुरर्द्धं चापम्, अस्याः दमयन्त्याः, आस्येन मुखेन भूतेन जातेन मुखत्वं प्राप्तवतेत्यर्थः, विधुना चन्द्रेण, उज्झिता एतन्मुखस्य निष्कलङ्कत्वसम्पादनाय त्यक्ता, या च लक्ष्मलेखा तदीयकलङ्करेखा, लीलया [illegible] उचितो योग्यः बालभावो [illegible] तत् युग्मं [illegible] एतस्या दमयन्त्या भ्रुवौ भ्रूयुगलरूपं जन्म, आप [illegible] [illegible]

[illegible]

[illegible]

[illegible]

बाङ्गला।— [illegible]

[illegible]

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या ।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ॥२८॥
आघूर्णितं पक्ष्मलमक्षियुग्मं (१) प्राप्यद्युति (२) स्वैर्व्यजिताद्भुतांशु ।
अस्या इवास्यावलदिन्द्रनील गोलामलश्यामलतारतारम् ॥२९॥

इदानीं नवभिः श्लोकैर्नयनयुगलं वर्णयति । इयमिति । पुष्पमयी कार्मुका पञ्च वाणा यस्य तेन कन्दर्पेण, इषुवदेषैव पञ्चानां वाणानां मध्ये विभिरेव कार्यं, जगत्त्रयस्य विनिर्जयादिना, एकेनैव वाणेन एकं कार्यं च जगतो त्रय सम्पन्न इति भावः, सेयं चापयष्टिः, इव डिशारी यावदन्, निनाद दमयन्त्या इन्द्रनीलनीलं दर्पणाय, पदे स्थाने, अलिविष स स्याप्य, सफलीकृता निरवकलाम्बुदाना भासकीर्ता । नवमृदुलकर्मिः लिङ्गम-कामोद्दीपकमित्याशय ।

अत्र [illegible] अभिदिक्षासम्बन्धेऽपि तनुमध्यदलिनीलिरामदागी इत्यादि निदर्शनं उद्भीयते । तदा इषुपदेन प्रकृत्य चापयष्टिपदयोरभिधान [illegible], पुष्पचापदेनैवनेन पुष्पचाप-मावत्वमभिहितं तत्र वाह्यपदयोर्न घटत इति कमकलादपभ्रमतादय । [illegible] पादाविव्य प्रवर्ती — "पदमप्यनुपपुना अर्थेन । सेयं दर्शन दमयन्तीं दृष्टवतीं" । पूर्वनामो १४ छन्दः पुष, वैदर्भी च रीति ।

(१) घोषाषण्डो, समाहार इति विशारदी विनोदादिलादौदगद ॥ २ ॥

फलोत्पलेनापि मुखं समायं लभेत नैतस्य विनिर्मितेन ।
यद्येतदीयेन तुलां ललाटी स्वचक्षुषो किं कुरुते कुरङ्गी ॥२०॥
त्वचः समुत्तार्य दलानि रीत्या मोचात्वचः पत्रपपाटनानाम् (१) ।
सारैर्गृहीतैर्विधिरुत्पलौघात् अस्यामभूद्रोचकरूपशिल्पी ॥२१॥

अन्वयः—[illegible]

[illegible] ॥२०॥

चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष स्रष्टा।
सारः सुधोद्गारमयः प्रयत्नैः विधातुमेतन्नयने विधातुः ॥२२॥

अन्वयः—विधिः पञ्चषपाटनानां लीलया त्वचः दलानि (च) समुत्पाट्य मोचात्वचः उत्पलौघात् (च) दृशोः तारं मलान् ईषच्छदसितौ अभूत् (इव) ॥२१॥

त्वच इति। विधिर्ब्रह्मा, पञ्च वा षड् वा पाटना त्वग्दलयोरुत्पाटनानि तासाम्, लीलया प्रकारेण, त्वचः कदलीस्तम्भस्यैव बाह्यवल्कलानि, दलानि उत्पलौघस्यैव बाह्यपत्राणि च, समुत्पाट्य उत्पाट्य, मोचात्वचः अभ्यन्तरस्थात् कदलीस्तम्भवल्कलात्, उत्पलौघात् अभ्यन्तरस्थादेव नीलोत्पलदलात्, दृशोर्नेत्रयोः, तारं तत्स्थानम्, मोचात्वचः शुभ्रभागं नीलोत्पलस्य च नीलभागं करयं(?) इत्यर्थः, अस्या दमयन्त्याः, ईषदसितौ ईषत्कृष्णौ उप तारामान्यदर्शिनी शुभ्रता ताराद्वयस्य च नीलता तस्य मिश्रौ निर्म्मातौ, अभूदिव; ताराशुक्लद्वये कदलीगर्भवल्कलतुल्यशुभ्रतादर्शनात् ताराद्वये च नीलोत्पलगर्भदलतुल्यनीलतादर्शनादेवमाशङ्केति भावः।

अत्र अभूदिति वाक्यार्थप्रतीतिसमानकालीनादेव बाधज्ञानादतिशयोक्तिः, अपितु इवाद्यभावात् प्रतीयमाना क्रियोत्प्रेक्षैवालङ्कारः। रसादयः पूर्ववत्।

"कदली वारणबुषा रम्भा मोचांशुमत्फला" इत्यमरः।

पञ्चषेति "ब स्यायाः अव्ययीभावसंख्यादिलोपश्च" इति राजादित्वादच् पट्स्वस्त्यन्तस्वरादिलोपश्च ॥२१॥

বাঙ্গালা—যেন কলাগাছের পাঁচ ছয় খানা পাট ফেলাইয়া দিয়া, সে স্থানের সাদা ভাগ দিয়া, দময়ন্তীর নয়নযুগলের তারা দুইটীর দুই ধার যেন নির্ম্মাণ করিয়াছেন, আর নীলোৎপলের পাঁচ ছয়টা পাতা ফেলাইয়া দিয়া সে স্থানের নীল ভাগ দিয়া, দময়ন্তীর নয়ন-যুগলের তারা দুইটী যেন তৈয়ারি করিয়াছেন ॥২১॥

अन्वयः—एतन्नयने विधातुं विधातुः प्रयत्नैः, चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण एषः सुधोद्गार-

ऋणीकृता किं हरिणीभिरासीत् अस्याः सकाशान्नयनद्वयश्रीः ।
भूयोगुणेयं सकला बलाद् यत् ताभ्योऽनयालभ्यत विभ्यतीभ्यः ॥२३॥
दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम् ।
न चेत् कृतः स्यादनयोः प्रयाणे विघ्नः श्रवः कूपनिपातभीत्या ॥२४॥
केदारभाजा शिशिरप्रवेशात् पुण्याय मन्ये मृतमुत्पलिन्या ।
जाता यतस्तत्कुसुमेक्षणेयम् यतश्च तत् कोरकदृक् चकोरः ॥२५॥

अन्वयः—हरिणीभिः अस्याः सकाशात् नयनद्वयश्रीः किम् ऋणीकृता आसीत्, यत् अनया [illegible] तीभ्यः ताभ्यः बलात् सकला भूयोगुणा इयम् अलभ्यत ॥२३॥

ऋणीकृतेति । हरिणीभिर्मृगीभिः, अस्या दमयन्त्याः, सकाशात् नयनद्वयस्य श्रीः शोभा [illegible] सम्पत्तिश्च, किम् ऋणीकृता ऋणत्वेन गृहीता आसीत्, यद् यस्मात्, अनया दमयन्त्या, [illegible] ताभ्यो नयनशोभाकम्पेनालभ्यत इति भावः । ताभ्यो हरिणीभ्यः, बलात् प्रसह्य, सकला समग्रा, [illegible] भूयान् गुणः उत्कर्षो यस्याः सा, अन्यत्र तु कलया वृद्ध्या सहिता सकला, [illegible] गुणो यस्याः सा द्विगुणितेत्यर्थः, इयं श्रीः शोभा धनसम्पत्तिश्च, अलभ्यत आदीयत । [illegible] यावती नयनद्वयश्रीर्हरिणीभिर्गृहीता, यौवने तनया ततो [illegible] भावः । [illegible] ऋणत्वेन पूर्वं गृहीतम्, उत्तमर्णेन तु कालान्तरे [illegible] ।

[illegible]

[illegible] ॥२३॥

[illegible]

अन्वयः—[illegible] ॥२४॥

[illegible]

नासादसीया तिलपुष्पतूणं जगत्त्रयन्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां दधद्द्विबाणीं कुसुमायुधस्य ॥२६॥

अन्वयः—उत्पलिन्या केदारभाजा (सत्या) पुण्याय शिशिरप्रवेशात् मृतम् (इति) मन्ये । यत इयं तत्कुसुमेक्षणा जाता, यतश्च चकोरः तत्कोरकदृक् जातः ॥२५॥

केदारेति । उत्पलिन्या पद्मिन्या, केदारम् आलवालं तदाख्यं शिवञ्च भजते आश्रयति सेवते च या सा केदार-भाक् तया सत्या पुण्याय पुण्यजन्योत्तमपदलाभायेत्यर्थः, शिशिरप्रवेशात् हेमन्तऋतोरागमनात् शिशिरे हिमसङ्घातमध्ये प्रवेशाद्वा मृतमाश्च हेतौ, इत्यनिन्द्यं मन्ये । यतो हेतोः, इयं दमयन्ती, तस्याः उत्पलिन्याः कुसुमे पुष्पद्वयमेव ईक्षणे नयनद्वयं यस्याः सा तादृशी जाता । यतश्च हेतोः, चकोरः पक्षी, तस्याः उत्पलिन्याः कोरकौ कलिका-द्वयमेव दृशौ नयनयुगलं यस्य स तादृशो जातः । पुण्याय मरणानन्तरेण पद्मिन्या कुसुमकोरकाभ्यां न खलु अन्यत्तम दमयन्तीनयनपदं चकोरनयनपदञ्च लब्धुं शक्यतेतिभावः । कोरकात् कुसुमस्य उत्कृष्टत्वात् चकोरनयनापेक्षयापि दमयन्तीनयनस्योत्कृष्टत्वं ध्वनितम् । अन्योऽपि उत्तमजन्मलाभाय देवविशेषमाराध्य हिम-संघाते म्रियते ।

अत्र उभयोरपि कार्ये च उत्पलिन्याः तादृशजनमव्यवहारस्यारोपात् समासोक्तिः, वाच्या क्रियोत्प्रेक्षा, उत्पलिनी कुसुमकोरकयोर्दमयन्तीनयनचकोरदृक्त्वासम्बन्धेऽपि तयोः सम्बन्धादतिशयोक्तिद्वयम्, द्वितीयचतुर्थपादयो-रर्थकानुमानयोरन्योन्येषां च दृष्टिः । उत्प्रेक्षितार्थसमर्थनादनुचितार्थत्वदोषस्तु सम्पूर्णपदपरिवर्तनेनैव परि-हार्य इति तत्र विस्तरम् । पूर्वरागो रसः, माधुर्यं गुणः, वैदर्भी च रीतिः ।

"केदारः स्यादालवाले शङ्करे त्रयी", "शिशिरः शीतले हिमे । ऋतुभेदे" इति च हेमचन्द्रः ॥२५॥

বাঙ্গালা—পদ্মিনী জলাশয়ে থাকিয়া (শিবের আরাধনা করিয়া) পুণ্যনিবন্ধন উত্তম পদ লাভের জন্যই, হেমন্তকালের আগমনে (বরফের ভিতরে প্রবেশে) প্রাণত্যাগ করিয়াছিল; ইহা আমি মনে করি । যে হেতু, তাহার ফুলই দময়ন্তীর নয়ন হইয়া জন্মিয়াছে; আর তাহার কলিকাই চকোরপক্ষীর নয়ন হইয়া জন্মলাভ করিয়াছে ॥২৫॥

অন্বয়ঃ—অদসীয়া নাসা জগত্ত্রয়ন্যস্তশরত্রয়স্য কুসুমায়ুধস্য শ্বাসানিলামোদভরানুমেয়াং দ্বিবাণীং দধৎ তিলপুষ্পতূণম্ (মন্যে) ॥২৬॥

एवं नासिकां वर्णयति नासेति । अमुष्या इयमिति अदसीया दमयन्तीसम्बन्धिनी नासा नासिका, जग-त्त्रये स्वर्गमर्त्यपातालेषु न्यस्तं मोहनाय निक्षिप्तं शरत्रयं येन तस्य, कुसुमायुधस्य कामस्य सम्बन्धि, श्वासानिलस्य निश्वासवायोः आमोदभरेण सौरभातिशयेन अनुमेयाम् अनुमानयोग्याम्, द्विबाणीम् अवशिष्टं शरद्वयम्, दधत् धारयत्, तिल-पुष्पमेव तूणं तिलकुसुमरूपं तूणीरम् इत्यहं मन्ये इति शेषः । तदा च कामस्य पुष्पमयाः पञ्चबाणाः सन्ति, तन्मध्ये त्रयो बाणाः स्वर्गमर्त्यपातालानलिविमोहनाय निक्षिप्ताः; अवशिष्टञ्च बाणद्वयं तूणीरे एव स्थापितमस्ति । तत्र तूणीरं पुष्पयुक्तत्वात् पुष्पमयमेव भवितुं युक्तम् । तेन च समानाकारत्वात् तिलपुष्पमेव तन्मन्ये, तत्र च पुष्पद्वयं वर्तत इत्यस्ति, तच्च तदीयनिश्वाससौरभेणैवानुमीयते । परन्तु तादृशकामतूणीरमेव दम-यन्त्या नासिकारूपेण परिणतमित्यहं मन्ये तस्या अपि कामोद्दीपकत्वादिति तात्पर्यार्थः ।

अत्र सन्देहनामा अलङ्कारः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ॥२६॥

বাঙ্গালা—কামদেব নিজের পাঁচটী বাণের মধ্যে তিনটী বাণকে ত্রিভুবন জয় করি-বার জন্য নিক্ষেপ করিয়াছেন, অবশিষ্ট দুইটী বাণ তিলপুষ্পময় তূণীরের ভিতরেই রহিয়াছে আমি মনে করি তিলপুষ্পময় সেই তূণীরই দময়ন্তীর নাসিকারূপে পরিণত হইয়াছে, তবে

जम्बूफल-जम्बूभवदेतदस्या मुखेन्दुभागेन स गोजि गता ।
रागनिया यो पल्लवोज्ज्वलोया समाउ सन्ध्यामधरोष्ठलेखा ॥२७॥
यस्या मुखेन्दोरधरः सुधाभू-(१) बिम्बस्य युक्तः प्रतिबिम्ब एषः ।
तस्याप्यसौ योर्हु समाजि देवी सम्भाव्यमानासा तु विद्रुमे सा ॥२८॥

আহার ভিতরে যে সুধার বাস ২৮টী হইয়াছে, তাহা নিবাসভাব আত্মন গৌরবে অনুমান করা হইয়াছে ।৭।

जानेऽतिरागादिदमेव बिम्बं बिम्बस्य तु (?) व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाभ्यां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥३९॥

मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः ।
तत्स्वप्नसम्भोगवितीर्णदन्त-दंशेन किंवा न मयापराद्धम् ॥४०॥

বাঙ্গালা—দময়ন্তীর মুখচন্দ্রের এই ওষ্ঠ দুইখানি, অনুরাগবশতঃ বিম্বফলের তুল্য হওয়াই উচিত। অথবা বিম্বফলের শোভা বনেই থাকে, আর এই ওষ্ঠ দুইখানির শোভা অট্টালিকাপ্রভৃতি স্থানেই সম্ভবপর হয়, (সুতরাং বিম্বফলের সহিত এই ওষ্ঠের তুলনাই হয়না)।৩৯।

अन्वयः—अतिरागात् इदम् एव बिम्बं जाने, बिम्बस्य तु इतः अधरत्वम् व्यक्तम्। विशेषावगमाक्षमाभ्यां जनानाम् अनयोः द्वयोः नाम्नि भ्रमः अभूत् ॥३९॥

जाने इति। अतिरागात् अत्यन्तलौहित्यात् अत्यन्तानुरागाच्च, इदं दृश्यमानं दमयन्तीदन्तच्छदात्मकमेव वस्तु, बिम्बं लोके ओष्ठबिम्बमित्यत्र उपमानभावेन प्रयुज्यमानं बिम्बशब्दवाच्यं वस्तु इति जाने मन्ये। अस्य तु बिम्बोक्तस्य तु, इतो दमयन्तीदन्तच्छदात्, अधरत्वं तन्मात्रनिकृष्टत्वम् [illegible] व्यक्तं स्फुटम्। [illegible] लोके बिम्बौष्ठ बिम्बशब्द ओष्ठे च अधरशब्द प्रयुज्यते [illegible] तारतम्यज्ञाने [illegible] [illegible] यथा विपर्ययः, अभूत्। [illegible] प्रयुज्यते, तथा [illegible] बिम्बोष्ठे अधरशब्द [illegible] [illegible] [illegible] [illegible]

यदि प्रसादीकुरुते सुधांशोः एषा सहस्रांशमपि स्मितस्य ।
तत् कौमुदीनां कुरुते तनैव निर्मञ्छ्य (१) देवः सफलं स जन्म ॥४३॥
चन्द्राधिकं तन्मुखचन्द्रिकाणां दरायतं तत् किरणाद्घनानाम् ।
पुरःसरत्स्त-पृषद्द्वितीयं रदावलिद्वन्द्वति बिन्दुवृन्दम् ॥४४॥

अन्वयः—एषा स्मितस्य सहस्रांशम् अपि यदि सुधांशो प्रसादीकुरुते, तत् स देवः तेन एव निर्मञ्छ्य कौमुदीनां जन्म सफलं कुरुते ॥४३॥

अर्थैकेन पद्येन स्मितं वर्णयति । यदीति । एषा दमयन्ती, स्मितस्य आलस्य ईषद्धासस्य, सहस्रांशम् अपि सहस्रभागकल्पितैकभागमपि, यदि सुधांशोश्चन्द्रस्य, प्रसादीकुरुते प्रसाददेयत्वेन ददाति ; तत्तदा, स देवः सुधांशुः, तेनैव स्मितस्य सहस्रांशेनैव, निर्मञ्छ्य आदरातिरेकेण नीराजितं कृत्वा, कौमुदीनां स्वकीयज्योत्स्नानाम्, जन्म सफलं सार्थकम् कुरुते, तन्निर्मञ्छनेन कौमुदीनामुत्कर्षातिरेकलाभादिति भावः ।

अत्र प्रसादीकरणस्य निर्मञ्छनस्य जन्मसाफल्यकरणस्य च असम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिरियं, तस्य चाङ्गाङ्गिभावेन सङ्करः । यदा कुरुते इत्यस्य द्विः पाठात् कथितपदतादोषः, तदित्यस्य यदीत्यनेन सम्बन्धं कवेरभिमतोऽपि न घटते इत्यसम्बन्धदोषश्च । 'ददाति चेच्चन्द्रमसः प्रसादात्' इति प्रथमचरणपाठेन 'तदा समासौ कुरुते तनैव' इति तृतीयचरणपाठेन च तयोः समाधानं विधेयम् । रसादयः पूर्ववत् ॥४३॥

বাঙ্গালা—ইনি নিজের ঈষৎ হাস্যের সহস্র ভাগের এক ভাগও যদি অনুগ্রহ করিয়া চন্দ্রকে দান করেন ; তাহা হইলে, সে চন্দ্র সেই সহস্র ভাগের এক ভাগকেও আরতি করিয়া দিয়া, নিজের জ্যোৎস্নাগুলির জন্ম সার্থক করেন ॥৪৩॥

अन्वयः—तत्किरणात् घनानां चन्द्राधिकं तन्मुखचन्द्रिकाणां दरायतं पुरःसरत्स्तपृषद्द्वितीयं बिन्दुवृन्दं रदावलिद्वन्द्वति ॥४४॥

पद्मद्वयेन दन्तपङ्क्तिद्वयं वर्णयति । चन्द्रेति । तस्य चन्द्रस्य किरणात् चन्द्रिकातः, घनानां निविडानाम्, चन्द्राधिकम् एतन्मुखचन्द्रस्याधिकोज्ज्वलत्वादिति भावः, चन्द्रादधिकम् उज्ज्वलतयानुत्कृष्टम् ,तत् एतस्याः दमयन्त्याः मुखं मुखचन्द्रस्य चन्द्रिकाणां किरणानाम् सम्बन्धि, दरायतम् ईषद्विस्तृतम् पुरःसरादि अग्रगामीनि स्रस्तानि स्खलितानि यानि पृषन्ति बिन्दवस्तान्येव द्वितीयानि यस्य द्वितीयपङ्क्तिनिविष्टानि यस्य तथाभूतम्, बिन्दुवृन्दम् अमृतकणसमूहः, रदावलिद्वन्द्वति दन्तपङ्क्तिद्वयवत् आचरति । तथा च इदं न दन्तपङ्क्तिद्वयम्, अपि तु चन्द्रादप्युत्कृष्टस्य एतन्मुखचन्द्रस्य अधिकामृतपूर्णचन्द्रिकातः अमृतबिन्दुपङ्क्तिद्वयं निपतितम्, तस्य चैकादपङ्क्तिरधःस्थिता, अपरा च ईषदायता सती तदूर्ध्वं वर्तत इति तत्त्वार्थः । यथा मेघमण्डलवर्षणकाले ऊर्ध्वपटलस्खलत्पृथग्बिन्दव एकबिन्दुपङ्क्तिः पतति, परञ्च द्वितीया पतिता ईषदायता सती प्रथमपङ्क्तौ लगति ; तद्वदिति भावः ।

अत्रापि अङ्गानां निविष्टेन अमृतबिन्दुवृन्दतया दन्तपङ्क्तिद्वयतारोपः, चन्द्रादिभ्यः मुखस्याधिक्यात् व्यतिरेकः, द्वन्द्वतीति स्मृतिरूपकम्, ईषदुत्प्रेक्षेत्येतेषां च सङ्करः । पूर्ववत् रसः, माधुर्यं गुणः, वैदर्भी च रीतिः ।

"हर्षि बिन्दुरचना" इत्यमरः ।

रदावलिद्वन्द्वं दन्तावलीद्वयमिव आचरतीति अर्थः, तस्य च औपम्ये रदावलिद्वन्द्वतीति रूपम् ॥४४॥

---

(१) निर्मञ्छ्य । निर्मिद्य ।

शिरीषकोशादपि कोमलायाः वेधा विधायाङ्गमशेषमस्याः।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम्॥४७॥
प्रसूनबाणाद्वयवादिनी सा काचिद् द्विजेनोपनिषत्पिकेन।
अस्याः किमास्य द्विजराजतो वा नाधीयते स्म स्वभुजा तदस्थः॥४८॥

[illegible]

ब्याख्यान—[illegible]

अन्वयः—[illegible] ॥४७॥

[illegible]

ब्याख्यान—[illegible]

अन्वयः—[illegible] ॥४८॥

[illegible]

पश्चादुपस्थानमवेक्ष्य लक्ष्मीम् [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ १४८ ॥
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ १४९ ॥

विलोकिता स्यान्मुखमुन्नमय्य (१) किं वेधसेयं सुषमासमाप्तौ ।
धृत्यङ्गवा यच्चिबुके चकास्ति निम्नं मनागङ्गुलियन्त्रणेव ॥५१॥
प्रियामुखीभूय सुखी सुधांशुः जयत्ययं राहुभयव्ययेन ।
इमां दधाराधरबिम्बलोला तस्यैव बालं करचक्रवालम् ॥५२॥

मूय वाक्त्वेन परिणता भूत्वा, श्रोतुर्जनस्य, श्रुतौ कर्णे, सुधारसत्वम् अमृततुल्यास्वादविषयत्वम्, याति गच्छति । वीणाध्वनितुल्य एतस्याः कण्ठध्वनिरिति भावः ।

अत्र सरस्वतीकर्तृकवीणावादनस्य तस्य वाग्भवनस्य चासम्बन्धेऽपि तत्सम्बन्धात् अतिशयोक्तिः [illegible] सङ्कीर्णानुप्राणितेन स स्फुरति । वृत्तादयः पूर्ववत् ॥५०॥

वाङ्गाला—वीणावादननिपुणा सरस्वतीदेवी ইহার কণ্ঠে অবস্থান করতঃ, যে বীণা-বাদন করিতেছেন, তাহাই ইহার মুখে বাক্যরূপে পরিণত হইয়া, শ্রোতার কর্ণে অমৃতের ন্যায় অনুভূত হইয়া থাকে ॥৫০॥

अन्वयः—सुषमासमाप्तौ वेधसा मुखम् उन्नमय्य इयं किं विलोकिता स्यात्, यत् मनाक् निम्नं चिबुके धृत्यङ्गुवा अङ्गुलियन्त्रणा इव चकास्ति ॥५१॥

एतेन चिबुकं वर्णयति । विलोकितेति । सुषमायाः [illegible] समाप्तौ [illegible] वेधसा ब्रह्मणा, मुखम् अस्या एव वदनम्, उन्नमय्य दर्शनार्थम् [illegible] इयं [illegible] विलोकिता [illegible] स्यात् । यत् यस्मात्, मनाक् निम्नं [illegible] चिबुके [illegible] अङ्गुलियन्त्रणा इव, चकास्ति [illegible] ।

अत्र वाच्या [illegible] । वृत्तादयः पूर्ववत् ॥५१॥

[illegible] नस्माम् [illegible] दिशो [illegible] भवेयाम् ।
[illegible]
[illegible]
[illegible]

विलोकिता स्यान्मुखमुन्नमय्य (१) किं वेधसेयं सुषमासमाप्तौ ।
धृत्युद्गवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव ॥५१॥
प्रियामुखीभूय सुखी सुधांशुः जयत्ययं राहुभयव्ययेन ।
इमां दधाराधरबिम्बलोलां तस्यैव जालं करचक्रवालम् ॥५२॥

भूय वाक्स्वत्वेन परिणता भूत्वा, श्रोतुर्जनस्य, श्रुती कर्णं, सुधारसत्वम् अमृततुल्यास्वादविषयत्वम्, याति प्राप्नोति । वीणाध्वनितुल्य एवास्या कण्ठध्वनिरिति भावः ।

अत्र सरस्वतीकर्त्तृकवीणावादनस्य तस्य वाग्भवनस्य चासम्बन्धेऽपि तत्सम्बन्धात् द्वयोरतिशयोक्त्योः सङ्करस्तेनाकानुमानेन च सूच्यते । रसादय पूर्ववत् ॥५०॥

বাঙ্গালা—বীণাবাদননিপুণা সরস্বতীদেবী ইহার কণ্ঠে অবস্থান করতঃ, যে বীণা-বাদন করিতেছেন, তাহাই ইহার মুখে বাক্য রূপে পরিণত হইয়া, শ্রোতার কর্ণে অমৃ-তের ন্যায় অনুভূত হইয়া থাকে ॥৫০॥

अन्वयः—सुषमा समाप्तौ वेधसा मुखम् उन्नमय्य इयं किं विलोकिता स्यात्, यत् मनाक् निम्ने चिबुके धृत्युद्गवा अङ्गुलियन्त्रणा इव चकास्ति ॥५१॥

इदानीं चिबुकं वर्णयति । विलोकितेति । सुषमायाः सुखगतपरमशोभायाः समाप्तौ तस्याः निर्म्माणावसाने सति, वेधसा ब्रह्मणा, मुखम् अस्या एव वदनम्, उन्नमय्य दर्शनार्थमेव किञ्चिदुत्तोल्य, इयं दमयन्ती, किं विलोकिता दृष्टवदना स्यात् । यद् यस्मात्, मनाक् निम्ने ईषदधोदेशे, चिबुके अधरादधोऽङ्गे, धृत्युद्गवा ब्रह्मण एव धारणोत्पन्ना, अङ्गुलियन्त्रणा निपीडनेव, चकास्ति शोभते, ध्यानमन्त्रयमानवदिति भावः ।

अत्र वाच्यो क्रियोत्प्रेक्षयोः सङ्करः । रसादय पूर्ववत् ॥५१॥

বাঙ্গালা—সৌন্দর্য্যনির্ম্মাণ শেষ হইয়া গেলে পর, বিধাতা ইহার মুখখানিকে তুলিয়া ধরিয়া দেখিয়াছিলেন কি ? যে হেতু কিছু নীচে চিবুকের উপরে, ধরার জন্য তাঁহার অঙ্গু-লের চিহ্নই যেন শোভা পাইতেছে ॥৫১॥

अन्वयः—अयं सुधांशुः प्रियामुखीभूय राहुभयव्ययेन सुखी (सन्) जयति । तस्य एव जालं करचक्र-वालम् इमाम् अधरबिम्बलोला दधार ॥५२॥

इदानीं [illegible] मुखं वर्णयति । प्रियेति । अयं सुधांशुः चन्द्रः, प्रियायाः दमयन्त्याः मुखीभूय मुखरूपेण भूत्वा, राहुभयस्य व्ययेन अभावेन हेतुना, सुखी [illegible] सन्, जयति उत्कर्षेण वर्त्तते । [illegible] तस्य सुधांशोरेव जालम् [illegible] करचक्रवालं किरणसमूहं [illegible], इमां दमयन्तीम्, अधरबिम्ब-लोला [illegible], दधार धारयति स्म ।

अत्र [illegible]

"[illegible]" [illegible]

---

(१) [illegible]

दिवारजन्यौ रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् ।
आस्ये यदास्या न तदा तयोः श्रीः एकश्रियेदं तु कदा न कान्तम् ॥५५॥
अस्या मुखश्रीप्रतिबिम्बमेव जलाच्च तातान्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ॥५६॥

বাঙ্গালা—বিধাতা ইহার মুখপদ্মখানিকে সমস্ত পদ্মসমূহেরই সম্রাট্ করিয়াছেন। এই জন্যই নয়নযুগলস্বরূপ পদ্মের রাজা হইয়া, ঐ মুখপদ্মসম্রাটের সেবা করিতেছে ॥৫৪॥

अन्वयः—दिवारजन्यौ रविसोमभीते चन्द्राम्बुजे यदा अस्या आस्ये स्वलक्ष्मीं निक्षिपतः तदा तयोः श्रीः न (तिष्ठति) ; इदं तु एकश्रिया कदा न कान्तं (भवति) ॥५५॥

दिवेति । दिवारजन्यौ दिनरात्री, रविसोमभीते यथाक्रमं सूर्यचन्द्रभीते, चन्द्राम्बुजे चन्द्रपद्मे, दिवसे सूर्याच्छादनात् सूर्यभीतश्चन्द्रः रात्रौ च सङ्कोचभयाच्चन्द्रभीतं पद्मम् एते द्वे द्रव्ये, यदा अस्या दमयन्त्याः, आस्ये मुखे, स्वलक्ष्मीं निजनिजकान्तिं धनसम्पदञ्च, निक्षिपतः स्थापयतः पुनर्ग्रहणाय न्यासीकुरुतः, तदा तयोश्चन्द्राम्बुजयोः, श्रीः कान्तिः, न तिष्ठतीति शेषः, तथाविधविपदेवेति भावः । इदन्तु दमयन्त्या मुखं पुनः, एकश्रिया तयोरेकतरस्य कान्त्या दिवसे चन्द्रनिक्षिप्तशोभया रात्रौ च पद्मनिक्षिप्तशोभयेत्यर्थः, कदा कस्मिन् काले दिवसे रात्रौ वेति तात्पर्येण, न कान्तं न कान्तिमद् भवति, अपि तु सर्वदैव एकतरकान्त्या कान्तिमद्भवती-त्यर्थः । दिवसे सूर्यकिरणैराच्छादितस्य चन्द्रस्य रात्रौ चन्द्रकिरणैः सङ्कोचितस्य पद्मस्य च कान्तिर्न तिष्ठति, किन्तु मुखस्य कान्तिः सर्वदैव समता तिष्ठतीत्युक्तम् । अपरोऽपि धनी धनापहारकात् कुतश्चिदपि भयात् यदा कस्मिंश्चित् जने धनसम्पदं न्यासीकरोति, तदा तस्य गृहे सा धनसम्पद् तिष्ठति ।

अत्रस्य चन्द्रपद्मयोः, पूर्वार्द्धे वदनस्य निक्षेपाधारत्वेऽपि तत्सम्बन्धेऽप्यसम्बन्धरूपातिशयोक्तिः चन्द्राम्बु-जापेक्षया मुखस्याधिक्यकथनाद्व्यतिरेकः, अपरार्द्धे तेषामेकस्मिन्नेकाश्रयत्वेन सङ्करः, कोऽपि पुनरस्य कामुका-देव सम्भवति । कविना चन्द्रस्य चन्द्रपद्मनिक्षेपाधारमुखवर्णनमेव, रविचन्द्रभीते इति पाठे चन्द्रपद्मे समर्थेयं । रुदादि पूर्ववत् ।

अर्काय पत्ये खलु तिष्ठमाना भङ्गीभिरासां त्रिभिरम्बुजिन्यः ।
भैमीमुखस्य श्रियमम्बुजिन्यः याचन्ति विद्रावितपद्महस्ताः ॥५७॥
अस्या मुखेनैव विजित्य नित्यस्पर्धी निलत्कुरङ्गमरोपमानः ।
प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव विषत्परिवेषपाशः ॥५८॥

तत्पूर्वतिमिरकमनगतम्, अर्वाचिन् एव दिवा चन्द्र गतःनियमं, यथा आह्लादनः । अवद्य चर्ची दृढ़
सम्बन्धं कल्पम् धातिमं भैमीं द्यमितार्थ । अन्यत्रापि नात निजतत्र धाविता चञ्चितनद्धं दृश्यते ।
अनुपनताधि सन शीर्णत्रतार्, यथ न भवन्, तादृशपाश्यापूर्व सततरम्यानसम्बन्धि दर्शनचन्द्रदीप्त्येति
स्वकीयामकान्तिमालिन् चक्रः । शेषं पूर्ववत् ।
"तात्पर्य पाणिग्रहम्" इत्यन्य ॥५६॥

বাঙ্গালা—পদ্ম নিজের ধবল ঘরের নিকটে হইতে, আর চন্দ্র নিজের নিজ [illegible]
নিকট হইতে, দময়ন্তীর মুখকান্তির প্রতিবিম্ব প্রার্থনা করিয়া নিয়াই কোন কোন সময়
হাত এখনও অনস্থা হইলে তাহা ধারণ করিয়া থাকেন ॥৫৬॥

অন্বয়:—पत्ये अर्काय तिष्ठमाना, अम्बुजिन्यः विद्रावित-पद्म-हस्ता (सत्यः) अम्बुजिन्यौ भङ्गीः
भङ्गिभिः नित्यं भैमीमुखस्य श्रियं याचन्ति खलु ॥५७॥

अर्कायेति । पत्ये स्वामिने, अर्काय सूर्याय, तिष्ठमानास्थायस्थानेन निजाभिप्रायं प्रकटयन्त्यः अम्बु-
जिन्यः पद्मलताः पद्मिनीरूपा स्त्रीविशेषाः, विद्राविताः याचनार्थं प्रसारिताः पद्मान्येव पद्मानीव च हस्ता येषां
तादृशाः सत्यः, अम्बुजिन्यौ भैम्या एव सन्निधाने अत्रविहारसमये, भङ्गीभिः तत्तत्प्रकारैः, नित्यम्
अधुना इष्टामिति तात्पर्येण, अतएव भैमीमुखश्रियः स्पृहणीयतेति भाव, भैम्या दमयन्त्या मुखस्य श्रियं
शोभाम्, खलु निश्चितम्, याचन्ति 'स्वामिन् देय' । मह्यं भैमीमुखश्रियं देहि, तेन चाहमितोऽपि सौन्दर्या-
धिक्येन प्रथिता भवामि' इत्यं सूर्यमेव प्रार्थयन्ति । अन्या अपि अन्यत्र कुटमलताकारादिकं विस्तारितहस्ता
सत्य, पतिं प्रार्थयन्ति ।
अतएवात्र कार्ये पाम्बुजिनीषु स्त्रीविशेषत्वसमारोपात् समासोक्तिः, भङ्गीभिरिति अत्र नित्यं
केवलरूपकम्, खलुशब्दस्य ध्रुवादिशब्दवदुत्प्रेक्षाप्रतिपादकत्वाभावात् प्रतीतोत्प्रेक्षा चेत्येतेषामङ्गाङ्गिभावेन
सङ्करः । तेन च पद्मापेक्षया भैमीमुखस्याधिक्यरूपो व्यतिरेको व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः । चतुर्थ-
पादं तृतीयस्थाने पठित्वा समाप्तपुनरात्ततादोष परिहार्यः, पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।
अर्काय पत्ये इति "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इति सम्प्रदानत्वाच्चतुर्थी । अवयव तिष्ठमाना इति
"प्रकाशनस्थेयाख्ययोश्च" इति स्थादिभ्यात्मनेपदितया आनश् ॥५७॥

বাঙ্গালা—ইনি (দময়ন্তী) যখন জলকেলি করেন, তখন পদ্মিনী সকল ভ্রমররূপ
নয়ন দ্বারা ইহার মুখশোভা দেখিয়া, পতি সূর্য্যকে নিজেদের অভিপ্রায় জানাইতে থাকিয়া,
পদ্মরূপ হাতগুলিকে প্রসারিত করিয়া, সূর্য্যের নিকটেই যেন ইহার (দময়ন্তীর) মুখশোভা
প্রার্থনা করিতে থাকে ॥৫৭॥

অন্বয়:—नित्यस्पर्धी चन्द्रः निलत्कुरङ्गमरोपमानः अस्याः मुखेन एव विजित्य प्रसह्य नह्यमानः
(सन्) विषत्परिवेषपाशः स्यात् एव खलु ॥५८॥

अस्या इति । नित्यस्पर्धी अस्याः मुखेन सह सर्वदा सौन्दर्यस्पर्धाकारी चन्द्रः, निलत्कुरङ्ग [illegible]

विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि ।
अभङ्गुरस्तोकममुं किमस्याः मुखेन्दुमस्थापयदेकमेव ॥५९॥
कपोलपत्रान्मकरात् सकेतुः स भ्रूभ्यां जिगीषुर्धनुषा जगन्ति ।
इहावलम्ब्यास्ति रतिं मनोभूः सख्यद्वयस्यो मधुनाधरेण ॥६०॥

वहेन, नश्यमानो [illegible] सन्, अतएव तिष्ठन् [illegible] परिच्छिन्नं [illegible] इव, [illegible] निचितम्, [illegible] भावः । [illegible]

अनयत्वामादि पूर्ववदेव समस्तीति, [illegible] स्थितः । एवं एवं पूर्ववत् ॥६०॥

बाङ्गाला—[illegible] सहित [illegible] करिया, [illegible] सेइ [illegible] करे, सेइ जन्यइ [illegible] ॥

अन्वयः—विधिः मासि मासि कुहूरात्रिषु विधोः बिम्बशतानि लोपं लोपम् [illegible]

[illegible]

वियोगवाष्पाञ्चितनेत्रपद्मच्छद्मापि तोत्सर्गपयः प्रसूनौ ।
कर्णौ किमस्या रतितत्पतिभ्यां निवेद्यपूपौ विधिशिल्पमीदृक् ॥६१॥
द्रुह्यावशिद्ग येन पथातिवक्रः शास्त्रौघनिष्यन्दरसप्रवाहः (१) ।
सोऽस्याः श्रवः-पत्रयुगे प्रणालीरेखेव (२) धावत्यभिकर्णकूपम् ॥६२॥

বাঙ্গালা—কামদেব রতিদেবীকে লইয়া ইহার এই মুখে অবস্থান করিতেছেন, দুই গালের উপরে যে গোন্দানো আছে, তাহাই মকর এবং তাহাই ঐ কামদেবের ধ্বজ; ভ্রূযুগলরূপ ধনু দ্বারা উনি ত্রিভুবন-জয় করিবার ইচ্ছা করিতেছেন; আর ওষ্ঠদ্বয় মধুই (সুরম ও বসন্ত) উহার অনুরক্ত সখা ॥৬০॥

अन्वयः—वियोगवाष्पाञ्चितनेत्रपद्मच्छद्मापि तोत्सर्गपयःप्रसूनौ अस्याः कर्णौ रतितत्पतिभ्यां निवेद्यपूपौ ईदृक् किं विधिशिल्पम् ॥६१॥

इदानीं पञ्चभिः पद्यैः कर्णौ वर्णयति । वियोगेति । वियोगवाष्पैर्विरहदुःखजनिताश्रुभिः अञ्चिते व्याप्ते नेत्रे अस्या एव चक्षुषी पद्मे इव तयोश्छद्मना छलेन अपि ते निश्चिते उत्सर्गपयःप्रसूने उत्सर्गजलपुष्पे ययोस्तौ, अस्या दमयन्त्याः कर्णौ, रतिः कामपत्नी तत्पतिः कामश्च ताभ्यां तयोरुद्देशे इत्यर्थः, निवेद्यपूपौ निवेदनीयपिष्टकद्वयम्, ईदृक् किं विधेः शिल्पं कार्य्यम् । यथा च "अर्चितमर्चिताय दद्यात्" इति शास्त्रात् देवनिवेद्यं यत् पूर्वं जलेन पुष्पेण वा अभ्यर्च्य, पश्चात् जलेन पुष्पेण वा तदुत्सृजति । एवञ्च दमयन्त्याः कर्णयुगलं रतिकामयोरुद्देशे निवेद्यपूपद्वयम्, वियोगवाष्पजलञ्च तदभ्यर्चनजलम्; नयनपद्मयुगलञ्च तदुत्सर्गपुष्पद्वयम् । पिष्टकविशेषाकारं कर्णयुगलं नितरां कामोद्दीपकमिति भावः ।

अत्र नेत्रपद्मेति लुप्तोपमैव न तु रूपकम् अपह्नुतौ प्रसूने पद्मान्यत्वानुपपत्तेः, अश्रुनेत्रयोः प्रतिरूपेण अप्रपुष्पस्यापमादपह्नुतिः, वाच्या क्रियोत्प्रेक्षा चेत्येतेषामङ्गाङ्गिभावेन सङ्करश्चेत्कालप्रासेन स सृज्यते । पूर्वरागो रसः, समासबाहुल्यात् ओजो गुणः, गौडी च रीतिः ।

"पूपोऽपूपः पिष्टकः स्यात्" इत्यमरः ॥६१॥

বাঙ্গালা—বিধাতা দময়ন্তীর কান দুই খানিকে কি রতিদেবী ও কামদেবের উদ্দেশে নিবেদনীয় দুই খানি পিঠে করিয়া নির্ম্মাণ করিয়াছেন? যেহেতু, বিরহের অশ্রুজল এবং পদ্মের মত নয়নযুগল এই দুইটীর ছলে উহার নিকটে উৎসর্গের জল এবং উৎসর্গের ফুল সমর্পণ করিয়া রাখিয়াছেন ॥৬১॥

अन्वयः—अतिवक्रः शास्त्रौघनिष्यन्दरसप्रवाहः येन पथा द्रुह्यौ अविशत्, स अस्याः श्रवःपत्रयुगे प्रणालीरेखा इव अभिकर्णं कूपं धावति ॥६२॥

द्रुहेति । अतिवक्रः दुर्बोधत्वादतीव कुटिलः शास्त्रौघात् शास्त्रसमूहात् निष्यन्दः स्रवन् रसप्रवाहः ज्ञानरसप्रवाहः, येन पथा, द्रुह्यौ दमयन्त्याः कर्णद्वये, अविशत् प्रविष्टवान्, स पन्थाः, अस्या दमयन्त्याः श्रवःपत्रयुगे कर्णपत्रद्वये प्रणाली जलनिर्गमनमार्गस्तस्य रेखेव, अभिकर्णं कूपं कर्णकुहरं लक्ष्यीकृत्य धावति गच्छति । कर्णावर्तरेखा प्रणालीरेखेव, अभितः कर्णकूपं शास्त्ररसप्रवाहप्रवेशमार्ग इति भावः ।

अत्रेयं प्रणालीरेखेवेति उत्प्रेक्षा । पूर्वरागो रसः, समासबाहुल्यात् ओजो गुणः, गौडी च रीतिः ॥६२॥

---

(१) शब्दप्रवाहः । (२) रेखेव ।

अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम् ।
कर्णान्तरुत्कीर्णगभीररेखः किं तस्य संख्यैव न वा नवाङ्कः ॥६३॥
मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण ।
एकाकिपाशं वरुणं विजिग्ये ऽनङ्गीकृतायासततीरतीशः ॥६४॥
भाले च तालस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि ।
तच्चापयोः कर्णलते भ्रुवोर्ज्ये (१) वंशत्वगंशो चिपिटे किमस्याः ॥६५॥

বাঙ্গালা—শাস্ত্রসমুদ্র হইতে নির্গত অতএব রত্নস্বরূপ হ যে পদ এই কর্ণবিবরে প্রবেশ করিয়াছিল; সেই পথ, ইহার কর্ণযুগলের গঠনরচনা কুণ্ডলীর উপরে জলনির্গমের পথের ন্যায় কর্ণবিবরের দিকে ধাবিত হইয়াছে ।৬২।

अन्वयः—अस्याः श्रुती अष्टादशविद्याः संविभज्य अर्धम् अर्धम् यत् दध्रतुः, कर्णान्तरुत्कीर्ण-गभीररेखः नवाङ्कः तस्य संख्या एव किं न वा ॥६३॥

अस्या इति । अस्याः दमयन्त्याः, श्रुती कर्णयुगलम्, अष्टादश विद्याः, संविभज्य समभागेन विभज्य, अर्धमर्धं यत् दध्रतुः [illegible] नवसंख्या कृत्वा [illegible], कर्णान्तः [illegible] उत्कीर्णा लिखितेव गभीरा रेखा यस्य स तथोक्तः, नवाङ्कः नवसंख्याबोधकचिह्नम्, तस्य [illegible] संख्या एव किं न वा, अपि तु संख्यैवेयम्, विधात्रा कृतेति भावः ।

अत्र [illegible] नवाङ्क [illegible] उत्प्रेक्षा [illegible] । वृत्तमिदं पूर्ववत् ॥६३॥

বাঙ্গালা—দময়ন্তীর কর্ণযুগল, আঠারটী বিদ্যাকে সমান ভাগে বিভক্ত করিয়া প্রত্যেকে এক এক অর্দ্ধ ধারণ করিয়াছে; বিধাতা তাহার ভিতরে গভীর রেখা খোদিত করিয়া, নয়ের অঙ্ক লিখিয়া, কি তাহারই সংখ্যা করেন নাই? ।৬৩।

अन्वयः—अनङ्गीकृतायासततिः रतीशः अमुना कर्णलतामयेन छिदुरेतरेण पाशद्वयेन एकाकिपाशं वरुणं विजिग्ये (इति) मन्ये ॥६४॥

मन्य इति । [illegible] छिदुरेतरेण [illegible] वरुणं [illegible] विजिग्ये, इति मन्ये, [illegible] ।

अत्र कर्णलता [illegible] । वृत्तमिदं पूर्ववत् [illegible] ।

छिदुरेति [illegible] । विजिग्ये इति [illegible] ॥६४॥

বাঙ্গালা—[illegible] এই কর্ণযুগলরূপ দৃঢ় পাশদ্বয় দ্বারা একপাশধারী বরুণকে জয় করিয়াছেন ইহা আমি মনে করি ।৬৪।

---

(१) भ्रुवौ ।

ग्रीवाद्भुतैवावटुशोभितापि प्रसाधिता माणवकेन सेयम्।
आलिङ्ग्यतामप्यवलम्बमाना सरूपताभागखिलोर्द्ध्वकाया (१) ॥६६॥

अन्वय.—तातस्य चतुर्भुजस्य आत्मा एव स्मरः अपि चतुर्दोः (सन्) जात उचित.। सुभ्रुवः तदाशयोः चिपिटे अस्याः कर्णलते शंसलगर्भौ ज्ये किम्॥६५॥

आत्मेति। तातस्य पितुः चतुर्भुजस्य विष्णोः, आत्मा स्वरूपमेव, "आत्मा वै जायते पुत्र" इति श्रुतेः "आत्मच्छायावत् सुतम्" इति स्मृतेश्चेति भावः, स्मरः कामोऽपि चत्वारो दोषो बाहवो यस्य स तादृश एव सन्, जात उत्पन्नः, उचितो युक्तः। अत तर्हि चतुर्भुजस्य कामस्य द्वे धनुषी द्वौ च तद्गुणौ युक्तौ, तौ च तत्र क्वेत्याह सुभ्रुवोः युगलरूपयोः, तस्य चतुर्भुजस्य कामस्य चापयोर्द्वयोर्धनुषोः, चिपिटे स्वूपीकृतत्वाद्विवृते, अस्या दमयन्त्याः, कर्णलते कर्णवल्लीद्वयमेव, शंसलगर्भौ वेणुवल्कलभागनिर्मिते, ज्ये गुणद्वयम्, किम्। वंशत्वचा निर्मितो गुणः सुदृढो भवति। तया च दमयन्त्याः भ्रूयुगलमेव चतुर्भुजस्य कामस्य धनुर्द्वयम्, कर्णयुगलञ्च तदर्थं स्वूपीकृतं गुणद्वयम्। युद्धाभावान्निष्क्रियस्य धनुषश्चाग्रदेशे स्वूपीकृत्य गुणः स्थाप्यते इति भावः।

अत्र कामस्य चतुर्भुजत्वौचित्यं प्रति प्रथमपादवाक्यार्थौ हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गम्, तथा उत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः। भुजपदेन प्रक्रम्य दोःपदाभिधानाद्भग्नप्रक्रमतादोषः; "चतुर्भुजस्यात्मभवोऽपि युक्तः" इति पाठेनास्य परिहार्यः। रसादयः पूर्ववत्।

"चिपिटः खाद्यभेदे ना स्रिषु पिङ्किविस्तृते" इति मेदिनी॥६५॥

বঙ্গানুবাদ—পিতা নারায়ণের আত্মাই কামদেব, সুতরাং তাঁহারও চতুর্ভুজ হইয়া উৎপন্ন হওয়াই সঙ্গত। তাহা হইলে, দময়ন্তীর ভ্রূদুইটীই সেই কামদেবের দুইখানি ধনু এবং বংশবল্কলনির্মিত তাহার দুই গাছি গুণই যেন দময়ন্তীর কর্ণযুগল।৬৫॥

অন্বয়ঃ—অবটুশোভিতা অপি মাণবকেন প্রসাধিতা, আলিঙ্গ্যতাম্ অবলম্বমানা অপি সরূপতাভাগখিলোর্দ্ধ্বকায়া সা ইয়ং গ্রীবা অদ্ভুতা এব॥৬৬॥

অথৈকেন গ্রীবাং বর্ণয়তি। গ্রীবেতি। বটুর্মাণবকশ্চ নবোপনীতো ব্রহ্মচারী। তথা চ বটুনা মাণবকেন শোভিতা বটুশোভিতা ন বটুশোভিতা অবটুশোভিতা সা তাদৃশী সত্যপি, মাণবকেন বটুনা প্রসাধিতা অলঙ্কৃতেতি বিরোধঃ। অত্রার্থে অপির্বিরোধে। অবটুনা ঘাটয়া শোভিতা, মাণবকেন হারবিশেষেণ, প্রসাধিতা অলঙ্কৃতা ইত্যবিরোধঃ। অত্রার্থে অপিঃ সমুচ্চয়ে। তথা আলিঙ্গ্যতা গোপুচ্ছসমানক্রমিকসূক্ষ্মবাদ্যযন্ত্রবিশেষত্বম্, অবলম্বমানাপি আশ্রয়ন্ত্যপি সরূপতাভাক্ আলিঙ্গ্যবাদ্যস্যৈব সমানরূপতাশালী অখিল ঊর্দ্ধ্বকো বাদ্যবিশেষো যস্যাঃ সা তাদৃশী, যা ইতি বিরোধঃ। আলিঙ্গ্যতাম্ কোমলত্বাদালিঙ্গনযোগ্যতাম্, অবলম্বমানা আশ্রয়ন্তী, তথা সরূপতাভাক্ সৌন্দর্যশালী অখিলঃ সমস্ত ঊর্দ্ধ্বকায়ঃ শরীরোপরিভাগো যস্যাঃ সা তাদৃশী, ইত্যবিরোধঃ। সা প্রসিদ্ধা, ইয়ং দৃশ্যমানা, গ্রীবা দময়ন্ত্যাঃ কন্ধরা, অদ্ভুতৈব পরমসুন্দরত্বাদাশ্চর্যরূপৈব।

অত্র বিরোধাভাসয়োঃ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ। পূর্বরাগো রসঃ, অন্যার্থস্য দুরূহত্বাদোজো গুণঃ, গৌডী চ রীতিঃ।

"ব্রহ্মচারী বটুঃ দণ্ডী" "হারভেদে মাণবকো বালে কুপুরুষে বটৌ" ইতি বিশ্বাদ্যশেষঃ। "হরীতক্যাকৃতিস্ত্বঙ্গো যবমধ্যস্তথৈব চ। আলিঙ্গ্যশ্চৈব গোপুচ্ছস্যাকৃত্যা সম্প্রকীর্তিতঃ।" ইত্যমরটীকায়াং রঘুনাথঃ॥৬৬॥

---

(১) সরূপতা।

कवित्वगान प्रियवादसत्यान्यस्या विधाता व्यधिताधिकण्ठम् ।
रेखात्रयन्याससिषादमीषां वासाय सोऽयं विबभाज सीमाः ॥६७॥
बाहू प्रियाया जयता मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् ।
उच्चैस्तु तच्चित्रममुष्य भग्न-स्यालोक्यते निर्व्यणनं यदन्तः ॥६८॥

বাঙ্গালা—দময়ন্তীর এই গ্রীবাদেশ আশ্চর্য্যই বটে; কেন না, ইহ রেখাত্রয়ের উপ-স্থিতি দ্বারা শোভিত, হারবিশেষ দ্বারা অলঙ্কৃত এবং এই গ্রীবাদেশ আলিঙ্গনের যোগ্যতা লাভ করিয়াছে, বিশেষতঃ ইহাদ্বারাই শরীরের উপার ভাগের সৌন্দর্য্যশালী হই-য়াছে ॥৬৬॥

अन्वयः—विधाता अस्याः अधिकण्ठं कवित्वगानप्रियवादसत्यानि व्यधित । स अयम् अमीषां वासाय रेखात्रयन्यासमिषात् सीमाः विबभाज (इव) ॥६७॥

एतेन कण्ठं वर्णयन्नाह कवित्वेति । विधाता, अस्या दमयन्त्याः अधिकण्ठं कण्ठे, कवित्वं अनुवर्णनशक्तिः, गानं गीतिः, प्रियवादं मधुरोक्तिकरं वचनम्, सत्यं सत्यवचनञ्च एतानि, व्यधित विहितवान् । अथ-मिदं उत्प्रेक्ष्यते— सोऽयं विधाता, अमीषां कवित्वादीनां चतुर्णाम्, वासाय अवस्थानाय, रेखात्रयस्य न्यासमिषात् प्रदानच्छलात्, तिस्रः सीमा, विबभाजेव विभक्तवानिव । रेखात्रयेण सीमात्रयकरणे तदन्तःस्थानत्रयदाना-दाय चत्वारि स्थानानि भवन्ति । कवित्वादिचतुर्विधगुणशालिनी कम्बुकण्ठी चेयमिति निष्कर्षः ।

अथ विधाता कवित्वादीनामनेकेषामेकैककण्ठालीकरणात् दमयन्तीमाह ... अपह्नुति, ... द्वितीयार्द्धे वा चैत्यैतेषामङ्गाङ्गिभावेन सङ्करस्ते कानुनाऽन पुन स ... । पूर्व्वतो रत्न, ... गुण

अजीयतावर्त्तशुभंयुनाभ्यः दोर्भ्यां मृणालं किमु कोमलाभ्याम्।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्त्तासु नाकीर्त्तिषु तन्निमग्नम्॥६९॥
रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषाद्दशी हैङ्गुलपद्मतूणे।
हैमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य॥७०॥

বাঙ্গালা—প্রিয়তমা দময়ন্তীর বাহুযুগল মৃণালকে জয় করুক, কেন না, যুদ্ধ হইলেই একতরের জয় হওয়া সম্ভব। সুতরাং এ বিষয়ে কোন বৈচিত্র্য নাই। কিন্তু এইটাই অত্যন্ত বৈচিত্র্য যে, ঐ মৃণাল পরাজিত হইলেও, তাহার অন্তঃকরণ বেদনাশূন্যই দেখা যাইতেছে।৬৮।

अन्वयः—आवर्त्त-शुभंयु-नाभ्याः कोमलाभ्यां दोर्भ्यां मृणालम् अजीयत किमु। निःसूत्रं तत् घनपङ्कमृत्सु मूर्त्तासु (इव) अकीर्त्तिषु निमग्नं (सत्) किमु न आस्ते॥६९॥

अजीयतेति। आवर्त्तेन दक्षिणावर्त्तेन हेतुना शुभंयु शुभयुक्ता शुभसूचिकेत्यर्थः नाभिर्यस्यास्तयोक्ताया दमयन्त्या, कोमलाभ्यां दोर्भ्यां बाहुभ्याम्, मृणालम्, अजीयत पराजितम्, किमु किम्। अतएव निर्विद्यते सूत्रं तन्तुः व्यवस्था च यस्य तत् निःसूत्रं स्वभावादेव तन्तुशून्यं स्वजयोपायशून्यञ्चेत्यर्थः, तत् मृणालम्, घनपङ्कमृत्सु निविडकर्द्दममृत्तिकारूपासु, मूर्त्तासु मूर्त्तिमतीष्विव, अकीर्त्तिषु अयशःसु पराजयनिबन्धननिन्दास्वित्यर्थः, निमग्नं सत्, किमु नास्ते न वर्त्तते, अपि तु आस्त एवेत्यर्थः। तथा च "यशसि धवलता" इति कविसमयप्रसिद्ध्या यशसो धवलत्वेन वर्णनीयतया अयशसः श्यामत्वेनैव वर्णनौचित्यात् अकीर्त्तीनां श्यामत्वेन गाढकर्द्दममृत्तिकारूपत्वम्। पराजितश्चाकीर्त्तौ तिष्ठति। अतिकोमलमपि मृणालं दमयन्त्या बाहुतुल्यतां न लभत इति भावः।

अत्र प्रथमार्द्धे वाच्या क्रियोत्प्रेक्षा, परार्द्धं प्रति पूर्वार्द्धवाक्यार्थस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गम्, घनपङ्कमृत्स्विति निरङ्गं केवलरूपकम्, मूर्त्तास्विवेति प्रतीयमाना गुणोत्प्रेक्षा, अर्थापत्तिश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः। रसादयः पूर्ववत्।

"सूत्रन्तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः." इति हेमचन्द्रः॥६९॥

বাঙ্গালা—দময়ন্তীর নাভিটী দক্ষিণাবর্ত্তশালী; সুতরাং শুভসূচক এবং ইহার কোমল বাহুযুগল মৃণালকে পরাজিত করিয়াছে কি? এই জন্যই সূত্রবিহীন সেই মৃণাল, নিবিড় কর্দ্দম মৃত্তিকারূপ মূর্ত্তিমান্ অকীর্ত্তির ভিতরে নিমগ্ন হইয়া রহে নাই কি? ।৬৯।

अन्वयः—हैङ्गुल पद्म-तूणे प्रियाकरे रज्यन्नखस्य अङ्गुलिपञ्चकस्य मिषात् हैमैकपुङ्खा विशुद्धपर्वा असौ स्मरस्य पञ्चशरी अस्ति॥७०॥

त्रिभिः पद्यैः करद्वयं वर्णयति। रज्यदिति। हिङ्गुलेन तदाख्यरक्तनिर्य्यासेन रक्त इति हैङ्गुलं पद्मं कामस्य पुष्पायुधत्वात् पद्मपुष्पमयी यस्तूणस्तूणीरस्तस्मिन् तादृशे तद्रूप इत्यर्थः, प्रियायाः दमयन्त्याः करे हस्ते, रज्यन्तः स्वभावादेव रक्तवर्णा भवन्तः नखा यस्य तस्य, अङ्गुलिपञ्चकस्य, मिषात् छलात्, हैमाः स्वर्णमयाः एके प्रधानाः पुङ्खाः अग्रदेशा यस्याः सा तथोक्ता, विशुद्धानि निर्दोषाणि उभयत्रापि पर्व्वाणि ग्रन्थयो यस्याः सा तादृशी, असौ दृश्यमाना, स्मरस्य कामदेवस्य, पञ्चानां शराणां बाणानां समाहार इति पञ्चशरी अस्ति विद्यते। हिङ्गुलेन

अस्याः करस्पर्द्धनगर्द्धनर्द्धिः (१) बालत्वमापत् खलु पल्लवो यः ।
भूयोऽपि नामाधरसाम्यगर्वं कुर्वन् कथं वास्तु न स प्रवालः (२) ॥७१॥
अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेखः ।
इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तयास्याम् ॥७२॥

तूपल रक्तन मण्डितम् । तथा च दमयन्त्या हस्त कानतूणतुल्य अङ्गुलिपञ्चक बाणपञ्चकतुल्यम्, रक्तवर्णा नखा स्वर्णपुङ्खतुल्या, अङ्गुलिसन्धयः वर्णवर्ग तुल्या, सरला इति भाव ।

अत्र अङ्गुलिपञ्चकप्रतिपेधेन बाणपञ्चकारोपणादपह्नुतिरलङ्कार, हस्तस्य तूणत्वम् इति निरङ्ग केवल- रूपकमात्रदोषाद्यभावेन सङ्कर । पूर्ववाणी रस, मन्वार्थस्य दुरूहत्वादोजो गुण, गौडी च रीति ॥७०॥

বাঙ্গালা—দময়ন্তীর হস্ত-তূণস্বরূপ প্রতীয়মান হতে একত্র পাঁচটী আঙ্গুলের ছলে কামদেবের পাঁচটী বাণ রহিয়াছে, তাহার পুঙ্খদেশস্থান উৎকৃষ্ট স্বর্ণময় এবং সব- গুলি নির্দোষ ॥৭০॥

अन्वयः—य पल्लव अस्या कर स्पर्द्धन गर्द्धनर्द्धि (सन्) बालत्व खलु आपत्, स भूय अपि अधर- साम्यगर्वं कुर्वन् कथं वा नाम प्रवाल न अस्तु ॥७१॥

अस्या इति । य पल्लव किसलय पदमपत् स्व अमर्षेण अस्मीयान् पदार्थान्, अस्या दमयन्त्या, करस्पर्द्धने दमयन्त्या पाणिना तुल्य एवाहमिति पाणिना सह स्पर्द्धाया गर्द्धनर्द्धिः अभिलाषसमृद्धि यस्य स ताद्दश सन्, बालत्वम् नूतनत्व मूर्खत्वञ्च आपत् प्राप्तवान्, लौहित्यगुणेन स्पर्द्धनकरणात् नूतनत्वम्, उत्कृष्टेन सह निकृष्टस्य स्पर्द्धनात् मूर्खत्वमिति भाव । खल्विति वाक्यालङ्कारे । स पल्लव, भूय पुनरपि, अधरेण अस्या एवोष्ठेन सह साम्ये आकृत साहस्येन सविषये गर्वमभिमानं कुर्वन् सन्, कथं वा नाम प्रवाल अतीवनूतन प्रकृष्टमूर्खश्च, न अस्तु न भवतु, अपितु भवत्वेवेत्यर्थ । तथा च पाणितलापेक्षयाधरस्याधिकरक्तत्वात्, नूतनपल्लवात् अतिनूतनपल्लवोऽधिकरक्त इति पाणिना सह स्पर्द्धया नूतनपल्लवत्वमवाप्तवान्, अधरेण सह स्पर्द्धया च अतिनूतन- पल्लवसादृश्यफलमिदं इति भाव । अन्यत्र तु उत्कृष्टेन सह स्पर्द्धया निकृष्टस्य मूर्खत्वम् अत्युत्कृष्टेन सह स्पर्द्धायामतिनिकृष्टस्य च अतिमूर्खत्वमिति भाव । पाणितूलनात् बालः, अधरतूलनात् प्रवाल इति निष्कर्ष ।

किं नर्म्मदाया मम सेयमस्याः दृश्याभितो बाहुलतामृणाली ।
कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्म शुष्यत्तरशैशवारः ॥७३॥
तालं प्रभु स्यादनुकर्त्तुमेतौ उत्थानसुस्थौ पतितं न तावत् ।
परश्च नाश्रित्य तरुं महान्तम् कुचौ स्वमाद्या स्वत एव तुङ्गौ ॥७४॥

पाणितले लिखाङ्कतया रेखीकृतया रेखरूपेण प्रदर्शितमित्यर्थः, तथा तदीयहस्त्य, पाद उच्चनखदेव स्वट कृतवति स्म किम् । हस्तं खलु पद्मादस्य तुल्यट इति निष्कर्षः । हस्ते शुभसूचिका पद्माकारा रेखासीदिति भावः ।

अत्र वाच्या क्रियोत्प्रेक्षा चालङ्कारश्च कानुप्रासेन स सज्यते । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः । अपत्करस्येति "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति भवतीशब्दस्य पुंवद्भावः ॥७२॥

বাঙ্গালা—দময়ন্তি ! তোমার এই হস্ত নির্ম্মাণ করিবার জন্য পদ্মনির্ম্মাণ আমার হস্তাভ্যাস হইয়াছিল, ইহা কি বিধাতা হরিণনয়না দময়ন্তীর হস্তে রেখারূপে পদ্মরেখা দ্বারা ব'লয়াছেন ? ॥৭২॥

অন্বয়ঃ—मम नर्म्मदायाः अस्याः अभितः दृश्या सा इयं बाहुलतामृणाली किम् । स्मरोष्मशुष्यत्तरशैशववारः नर्म्मदायां अस्याः कुचौ अन्तरीपे उत्तस्थतुः किम् ॥७३॥

अथाष्टभिः पद्यैः स्तनयुगलं वर्णयितुमाह किमिति । मम नर्म्मदायाः केलिसचिवायाः नर्म्मदाख्यनदीरूपायाः, अस्याः दमयन्त्याः, अभितः उभयपार्श्वे, दृश्या दर्शनयोग्या मनोहरेत्यर्थः, सा पूर्वं स्मरशोष्यावा, इव दृश्यमाना, बाहुलतैव मृणाली बाहुलतामृणाली किम् । तथा स्मरोष्मणा मदनोत्तापेन शुष्यत्तरम् अतिशयेन शुष्कतां प्राप्नुवत् शाल्यं शैशवं वय एव वाः जलं यस्यास्तस्यास्तथोक्तायाः, नर्म्मदारूपायाः अस्याः, कुचौ स्तनौ स्तनौ इत्यर्थः, अन्तरीपे द्वीपौ, उत्तस्थतुः उत्थितौ किम् । नर्म्मदानद्याः उभयतीरे मृणाली जायते, अस्याः अपि उभयपार्श्वे बाहुलता जाता, रवितापेनातिशयशुष्कजलायाः नर्म्मदायां द्वीपौ उत्थितः, मदनतापेन बाल्ये दूरं गते अस्यामपि स्तनौ उत्थिताविति भावः ।

अत्र केलिसचिवा नर्म्मदानद्योर्भेदेऽपि नर्म्मदापदश्लेषेण तयोरभेदाध्यवसायादतिशयोक्तिः, दमयन्त्याः नर्म्मदानदीत्वारोपो बाहुलतायां मृणालीत्वारोपे निमित्तमिति परम्परितरूपकम्, वाच्या जात्युत्प्रेक्षा चेत्येतेषामेकाश्रयानुप्रवेशरूपः सङ्करः, परार्द्धे तु बाल्ये वारित्वारोपो दमयन्त्याः नर्म्मदात्वारोपे निमित्तमित्येकं परम्परितरूपकम्, दमयन्त्याः नर्म्मदात्वारोपः कुचयोरन्तरीपत्वारोपे निमित्तमित्यपरञ्च परम्परितरूपकम् पूर्ववदुत्प्रेक्षा च तेषामपि पूर्ववदेव सङ्करः । समुदाये तूभयोः सङ्करयोः संसृष्टिः । पूर्वरागो रसः, ओजो गुणः, गौडी च रीतिः ।

"नर्म्मदः केलिसचिवे नर्म्मदा सरिदन्तरे" इति मेदिनी । "द्वीपोऽस्त्रियामन्तरीपम्", "आपः स्त्री भूम्नि वार्वारि" इति चामरः ॥७३॥

বাঙ্গালা—আমার পক্ষে নর্ম্মদাস্বরূপা দময়ন্তীর উভয়পার্শ্বে বাহুলতারূপ দুইটী মৃণাল রহিয়াছে কি ? আবার কামতাপে যাঁহার শৈশবরূপ জল অত্যন্তভাবে শুকাইয়া গিয়াছে, সেই নর্ম্মদারূপা দময়ন্তীর স্তনযুগলরূপ দ্বীপযুগল উঠিয়াছে কি ? ॥৭৩॥

অন্বয়ঃ—पतितं तालम् उत्थानसुस्थौ एतौ क्रमाद्या. कुचौ अनुकर्त्तुं न तावत् प्रभु स्यात्, महान्तं तरुम् आश्रित्य (स्थितः) परश्च स्वतः एव तुङ्गौ एतौ क्रमाद्या कुचौ अनुकर्त्तुं, न तावत् प्रभु स्यात् ॥७४॥

तालमिति । पतितं वृन्तच्युतं विश्लथ पातेन पातियुक्तं, तालं तदाख्य फलं कर्त्तृ, उत्थानेन कठिनतया सुस्थौ सुन्दरभावेन स्थितौ उत्थानेन पुत्रजनितामुद्दवेन सुस्थौ निरुपद्रवौ च एतौ दृश्यमानौ क्रमाद्या [illegible] कुचौ अनुकर्त्तुं तस्यानुकरणे न तावत् समर्थं स्यात् : [illegible]

एतत्कुचस्पर्द्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।
अत्र मग्न इत्येकया क्रियया कटाक्षादीनां कर्त्तॄणाम् तयाभिसम्बन्धात् तुल्ययोगितालङ्कारः, गीतामृतेति तनूमञ्जरीति करणहरिणैरिति वागुरात्वमिति च निरङ्गकेवलरूपकचतुष्टयम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येषां संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ।
रसज्ञ त्वत्र रसेन्द्रस्य पृथक् पदत्वात् यतिभङ्गदोषः । प्रसादो गुणः, वैदर्भी च रीतिः
"रसज्ञा रसना जिह्वा" "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः ।

अत्री ! नल एव देवानां मनोभावान् मनसा कल्पयन् दमयन्त्यामनुरागप्राचुर्य्यात् भाविनीं भार्य्यामिव आत्मनः ईदृशमनस्समन्तोल सुघटनेवाचष्ट । अतएव देवदूतानां नायकत्वं तस्य नलस्य च अपरिचितत्वा एव सद्भावा भावत्र सर्व्वमेवैदृशार्थीलजल्पनरूपा अलन्यता नायकनीयेति समालोचनीयम् । स्रग्धरा वृत्तम् ॥१०६॥

বাঙ্গালা—দময়ন্তি! আমরা প্রত্যেক রাত্রেতেই তোমাকে স্বপ্নে দেখিয়া থাকি; তখন আমাদের কটাক্ষ তোমার সৌন্দর্য্যে মগ্ন হইয়া যায়, কর্ণযুগল তোমার গানসুধার

इति धृतसुरसार्थवाचिकस्रङ् निजरसनातलपत्रहारकस्य [१] ।
सफलय मम दूतता त्वमीष्व स्वयमवधार्य्य दिगीशमेकमेषु ॥१०७॥
आनन्दयेन्द्रमथ मन्मथमन्नमग्निं केलीभिरुद्वह तनूदरि ! नूतनाभिः ।
आसादयोदितदयं शमनं मनो वा नो वा यदीत्थमथ तद्वरुणं वृणीथाः ॥१०८॥

সাগরে ডুবিয়া পড়ে, ত্বগিন্দ্রিয় তোমার শরীররূপ মন্দিরের কোমলতায় নিমগ্ন হয়, নাসিকা তোমার নিশ্বাসের সৌরভে নিবিষ্ট হয়, জিহ্বা তোমার ওষ্ঠের মধুতে আসক্ত হয় এবং মন তোমার চরিত্রে আকৃষ্ট হইতে থাকে। অতএব হে কৃশাঙ্গি! আমাদের কোন ইন্দ্রিয়রূপ হরিণই জালরূপ তোমাকে অতিক্রম করিতে পারে নাই ।১০৬।

অন্বয় —इति धृत सुर सार्थ वाचिक स्रङ्-निज-रसनातल पत्र-हारकस्य मम दूतता सफलय, स्वयम् अवधार्य्य एषु एकं दिगीशं वृणीष्व ॥१०७॥

इदानीं दौत्यमुपसंहरन्नाह इतीति । इति इत्थम्, धृता सुरसार्थस्य देवसमूहस्य वाचिकस्रक् सन्देशपरम्परा येन तथाभूतम् निजं स्वकीयं रसनातलं जिह्वैव पत्रं तस्य हारको वाहकस्तस्य तथोक्तस्य, मम नलस्य, दूतता दौत्यम्, सफलय सफलं कुरु । ननु केन सफलयामीत्याह— स्वयम् आत्मनैव, अवधार्य्य [illegible] अनुकूलतमो भवेदिति निश्चित्य, एषु इन्द्रादिषु चतुर्षु दिक्पालेषु मध्ये, एकं दिगीशं दिक्पालम् वृणीष्व, तेनैव मे दूतता सफला भवेदिति भावः । [illegible]

अत्र रसनातले पत्रत्वारोपात् [illegible] । छन्दस्तु [illegible] ।
पुष्पिताग्रा वृत्तम् ॥१०७॥

বাঙ্গালা—হে ভৈমি! আমার রসনা দেবগণের এই রূপ সংবাদগুলি ধারণ করিয়াছে, সুতরাং এই রসনারূপ পত্রবাহক আমার দৌত্যকে আপনি সফল করুন, আপনি নিজেই স্থির করিয়া এই চারি জন দিক্‌পালের মধ্যে এক জনকে বরণ করুন ।১০৭।

অন্বয়ঃ—(হে) तनूदरि ! इन्द्रम् आनन्दय, अथ नूतनाभिः केलीभिः मन्मथमन्नम् अग्निम् उद्वह, वा उदितदयं शमनम् आसादय, वा यदि इत्थं नो, अथ तं वरुणं वृणीथाः ॥१०८॥

[illegible]

आनन्दयेति । हे तनूदरि ! [illegible] इन्द्रम् आनन्दय [illegible]

[illegible]

(१) [illegible]

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१०९॥

—०—

নূতন নূতন কেলীবিলাস দ্বারা কামপীড়ামগ্ন আমাকে উদ্ধার করুন, কিম্বা নিজের মন্ম
মনকে বমের প্রতি প্রেরণ করুন, অথবা যদি ইহা ভাল না মনে করেন, তাহা হইলে
ণকে বরণ করুন ॥১০৮॥

श्रीहर्षमिति । कविकुलेन अन्यान्यकविगणेन न दृष्टो य अध्वा पन्थास्तस्य पान्थे नित्यपथिकस्वरूपे नू
तनरीत्या विरचित इत्यर्थः । सा च नूतना रीतिरतिशयोक्तिबाहुल्यादिकेत्यूह्यम् । अगात् समाप्तिमिति शे

नानासुधीभरित भारत पूर्ववङ्ग-कोटालिपाडविषयोनगियानिवासी ।
गङ्गाधरस्य तनय खलु काश्यपोऽत्र श्रीमान् नकीपुरपुरे हरिदासशर्मा ॥
सप्त वेद वसु चन्द्र सम्मिते वत्सरे शकनृपतेर्मधौ ।
द्वादशीऽह्नि परमेश्वरं स्मरन् च ष्टमस्य विवृतिं समाप्तवान् ॥

इति श्रीहरिदाससिद्धान्तवागीशभट्टाचार्यविरचितायां नैषधचरितटीकायां जयन्तीसमाख्यायाम्
अष्टम सर्गः ॥०॥

नवमः सर्गः ।

इतीयमच्चिभ्रुवविभ्रमेङ्गितैः स्फुटामनिच्छां विवरीतुमुत्सुका ।
तदुक्तिमात्रश्रवणेच्छयाऽश्रृणोत् दिगीशसन्देशगिरा (१) न गौरवात् ॥१॥

तदर्पितामश्रुतवद्विधाय ता दिगीशसन्देशमयीं सरस्वतीम् ।
इदं तमुर्व्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दना (२) ॥२॥

अन्वयः—इयम् अचिभ्रुवविभ्रमेङ्गितैः स्फुटाम् अनिच्छां विवरीतुम् उत्सुका (सती) तदुक्तिमात्रश्रवणेच्छया इति अश्रृणोत् (किन्तु) दिगीशसन्देशगिरा गौरवात् न ॥१॥

अर्थोऽनवद्य सुरसिन्धुजलस्य भाले भीते अजतुलनरि चाङ्गितले च नार्थ्याः ।
भुङ्क्तोऽस्त्वस्य गरलस्य पयोधिज य तस्मै विचित्र-चरिताय नमः शिवाय ॥

अथास्मिन् सर्गे निषिद्धे तत्र नलदूतवाक्योत्तरादिकत्वादिश्वाक्यतापत्र नवमः सर्गोनारभते। इतीति। इयं दमयन्ती अचिभ्रुवस्य नयनयुगलस्य भ्रूयुगलस्य च ये विभ्रमा सञ्चालनविशेषाः तैः विभ्रमास्तान्येङ्गितानि अभिप्रायविज्ञापकचेष्टितानि तैः, स्फुटां स्पष्टाम्, अनिच्छाम् इन्द्रादिदिक्पालचतुष्टयस्य वरणाभिलाषाभावम्, विवरीतुं प्रकाशयितुम्, उत्सुका उद्युक्ता सती, तस्य नलाकारदूतस्य तदुक्तिमात्र केवलं कथनं तस्यैव श्रवणेच्छया, अश्रृणोत् तस्य वचनानि श्रुतवती, किन्तु दिगीशानाम् इन्द्रादीनां दिक्पालानां या सन्देशगिरो वाचिकवचनानि तासाम्, गौरवादादरवदनुसन्धानादिना, न अश्रृणोदित्यर्थः। एतेन खलु नलाकार एषाऽपि दूत इति तस्य तदुक्तिश्रवण निवृत्तिर्न भवेत्। तेनैव तदशो श्रुतवती, न पुनरिन्द्रादीनां गुरुत्वानुसन्धानेन, आदरेण तदुक्तवाक्यस्य प्रतिग्रहणमस्मिन्नादिति भावः।

अत्र मतौ गौरवस्यापह्नवात् प्रथमी परिसंख्यालङ्कारः, प्रथमे चतुर्थे च पादे श्लेषानुप्रासयोः संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः।

अक्षिणी च भ्रुवौ चेति अचिभ्रुवम्, समाहारद्वन्द्वे "अचतुरविचतुर" इति अच्प्रत्ययान्तो निपातः।

अस्मिन् सर्गे वंशस्थविलं छन्दः। तल्लक्षणमुक्तम् ॥१॥

বাঙ্গালা—দময়ন্তী, নয়নযুগল ও ভ্রূযুগলের সঞ্চালন ইঙ্গিত দ্বারা স্পষ্ট অনিচ্ছা প্রকাশ করিতে উদ্যত থাকিয়া, সেই দূতেরই উক্তিমাত্র শ্রবণ করিবার ইচ্ছাতেই এই কথাগুলি শুনিলেন, কিন্তু দিক্পালগণের সন্দেশবাক্যের গৌরবে নহে ॥১॥

अन्वयः—वैदर्भ-नरेन्द्र नन्दना तदर्पितां दिगीश-सन्देशमयीं तां सरस्वतीम् अश्रुतवत् विधाय उर्व्वीतल शीतलद्युतिं तम् इदं जगाद ॥२॥

तदर्पितामिति। विदर्भाणामिति वैदर्भः स चासौ नरेन्द्रो राजा चेति तस्य नन्दना कन्या दमयन्ती, तेन दूतवेशधारिणा नलेन अर्पितां प्रदत्ताम् उक्ताम् इत्यर्थः, दिगीशानां दिक्पालानां सन्देशमयीं वाचिक-

---

(१) दिगीशसन्देशगिराम्। (२) नरेन्द्रनन्दिनी।

मयाङ्ग ! पृष्टः कुलनामनी भवान् अमू विमुच्यैव किमन्यदुक्तवान्।
न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ॥३॥
अदृश्यमाना क्वचिदीक्षिता क्वचित् ममानुयोगे भवतः सरस्वती।
क्वचित् प्रकाशां क्वचिदस्फुटां स्म सरस्वतीं जेतुमनाः सरस्वतीम् ॥४॥

नन्दयमान्—तां पूर्वोक्ताम्, सरस्वतीं वाणीम्, अननुमतम् अननुमानिव, विधाय कृत्वा, दिक्पालानां वरणानिच्छया तद्वरणादानेन अवज्ञयैव भङ्गीकरणादिति भावः, उर्व्वीतलस्य भूतलस्य शीतलद्युतिं चन्द्रम्, तं नलम्, इदं वक्ष्यमाणम्, जगाद उवाच।

अत्र नलभूतलचन्द्रयोर्भेदेऽपि तदभेदाध्यवसायादतिशयोक्तिरलङ्कारः, "धर्म्मान्तरतादात्म्यनिबन्धनायामसानिबन्धप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात्। यथा अयं राजा अपरः पाकशासनः" इत्युक्तेः वामकरणीय दर्पणोक्तेः। छेकानुप्रासयमकयोः संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः।

नन्दनेति "नन्द्यादेर्". इति नन्दयतेर्ल्युप्रत्ययादाप्रत्ययः ॥२॥

বাঙ্গালা—দময়ন্তী, দিক্‌পালগণের বরস্বরূপ সেই দূতোক্ত কথাগুলি শুনিয়াও না শুনার ভাণ করিয়া, ভূতলের চন্দ্রস্বরূপ নলকে এইরূপ বলিতে লাগিলেন ॥২॥

अन्वयः—अङ्ग। मया भवान् कुल-नामनी पृष्टः (सन्) अमू विमुच्य एव अन्यत् किम् उक्तवान् अत्र मह्यम् उत्तरधारयस्य भवतः सा इयम् अधमर्णता किं ह्रिये अपि न (भवति) ? ॥३॥

किं जगादेत्याह— मयेति। अङ्ग। हे महाशय! मया भवान्, कुलं वंशः नाम नामधेयञ्च ते कुलनामनी पृष्टः "आलोकवक्रीकृतलोकः। यस्मान्" इत्यादिना-कुलम्, "भवन्ति देव कतमन्नामाय" इत्यादिना च नाम जिज्ञासितः सन् अमू कुलनामनी, विमुच्यैव परित्यज्यैव अनुक्त्वैवेत्यर्थः, अन्यत् अप्रस्तुतम् इन्द्रादिसन्देशवाक्यम्, किं कथम्, उक्तवान्। पृष्टस्याकथनम् अपृष्टस्य च कथनमेतदुभयमप्यनुचितमिति भावः। अतएव अत्र मत्प्रश्नविषये, उत्तरधारयस्य उत्तरदेयत्वरूपकर्जवतः, भवतस्तव, सेयं प्रत्यक्षीक्रियमाणा, अधमर्णता—ऋणग्रस्तता, किं ह्रिये लज्जायै अपि, न भवति, अपि तु भवत्येवेत्यर्थः, वाचिकान्तिके महाजनस्याधमर्णताया लघुतामविपादकत्वादित्याशयः।

अत्र उत्तरधारयत्वं प्रति पूर्वार्द्धवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, अधमर्णतां प्रति उत्तरधारयपदार्थस्य हेतुत्वाच्चापरं पदार्थहेतुकं काव्यलिङ्गमनयोरङ्गाङ्गिभावेन सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः।

भवान् कुलनामनी पृष्ट इति "कर्मण्यप्रधाने दुहादिभ्यः" इत्यप्रधाने कर्मणि प्रत्ययः। धारयतीति धारयः "धाड्लिसातिवेदादेजिधारिपारिलिम्पविन्दाद्यनुपसर्गे" इति धारयतेर्णप्रत्ययः। उत्तरस्य धारयः इत्युत्तरधारयः।

বাঙ্গালা—মহাশয়! আমি আপনার নিকট আপনার বংশ ও নাম জিজ্ঞাসা করিয়াছিলাম, কিন্তু আপনি উহা পরিত্যাগ করিয়া অন্য বিষয় বলিলেন কেন? এ বিষয়ে আপনি আমার নিকট উত্তর ধারিতেছেন, অতএব আপনার এই অধমর্ণতা কি লজ্জাজনক হইতেছে না? ॥৩॥

अन्वयः—क्वचित् मम अनुयोगे अदृश्यमाना क्वचित् ईक्षिता (च) भवतः सरस्वती क्वचित् प्रकाशां क्वचित् अस्फुटां च सरस्वतीं सरस्वतीं जेतुमनाः (इव) ॥४॥

अदृश्यमानेति। क्वचित् कस्मिंश्चित् कुलनामविषयके इत्यर्थः, मम अनुयोगे प्रश्ने, अदृश्यमाना-उत्तराप्रकाशमाना, क्वचित् कस्मिंश्चित् कस्त्वं कुतो वा एव दिधे ममानुयोगे, ईक्षिता "दृश्यमाना

गिरः श्रुता एव तव श्रवःसुधाः श्लथाभवन्नाम तु न श्रुतिस्पृहा ।
पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि ॥५॥
बिभर्त्ति वंशः कतमस्तमोऽपहं भवादृशं नायकरत्नमीदृशम् ।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ॥६॥

प्रतीहि त्वदीयमेवोक्तिविलासं नाम इत्युत्तरदानात् दृष्टा च, भवत्तव, सरस्वती वाणी, क्वचित् कुत्रचित् प्रदेशे, प्रकाशा स्फुटत्वात्, क्वचित् कुत्रचित् प्रदेशे च अस्फुटार्थत्वम् अन्तःसलिलत्वादस्फुटजलत्वात्, सरस्वती सरस्वतीनाम्नीम्, सरस्वतीं नदीम्, जेतुमना जेतुकामा इव लक्ष्यतेति शेषः । ईदृशं हत्त नोपपद्यत इति कुलनामवि-षयकप्रश्नस्यापि उत्तरं देहीति भावः ।

अत्र प्रश्नाभिलापत्वादुत्तरनाप्रतीतेः इत्यादिवाचकाप्रयोगाच्च प्रतीयमाना गुणोत्प्रेक्षालङ्कारः सरस्वतीपदाश्लेषोऽयं-मन्वय, अनयोः सङ्करः । उत्प्रेक्षया च ताद्रूप्यावीनयोः वाक्योक्तद्वयोरुपमा व्यज्यत इत्यलङ्कारेण अलङ्कार-ध्वनिः । अदृश्यमाना दृषिता चेति प्रकृतिविरुद्ध प्रत्ययविपर्ययः भग्नप्रक्रमता दोषः, 'अनीषितेव क्वचिदी-षिता क्वचित्' इति पठित्वासौ परिहार्यः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"प्रतीऽनुयोगे पृच्छा च" इत्यमरः । "सरस्वानुदधौ नदे सरस्वती सरिद्भिदि । वाण्यापगाया स्त्रीरत्ने गोवाग्देवतयोरपि ।" इति हेमचन्द्रः ।

जेतुमना इति "तुमः काममनसोः" इति तुमो मलोपः ॥४॥

बाङ्गाला—মহাশয়! আমার কোন প্রশ্নে আপনার উত্তর পাওয়া গিয়াছে, আবার কোন প্রশ্নে আপনার উত্তর পাওয়া যায় নাই। অতএব আপনার এই বাক্য, কোন স্থলে স্পষ্টবহা এবং কোন স্থলে অস্পষ্টবহা সরস্বতী নদীকে যেন জয় করিতে ইচ্ছা করিতেছে ॥৪॥

अन्वयः—श्रवःसुधाः तव गिरः श्रुता एव, तु नाम श्रुतिस्पृहा श्लथा न अभवत् । वारिजा पिपा-सुता अधिकात् दुग्धात् मधुनः अपि शान्तिं न उपैति ॥५॥

गिर इति । श्रवसोः कर्णयोः सुधा अत्यन्तहर्षजनकत्वात् अमृतस्वरूपाः, तव गिरो वचनानि, श्रुता एव; तु किन्तु, नाम इष्टे तव नामविषये, श्रुतिस्पृहा मम श्रवणेच्छा, श्लथा शिथिला, न अभवत्, तस्या तदश्रव-णात् । अत एव तदपि कथ्यतामिति भावः । अथ यदि श्रवःसुधा एव बहुला गिरः श्रुतास्तर्हि नामश्रव-णापेक्षा कथमित्याह— वारिजा विपादित तज्जन्येन जलजन्या जलविषयेत्यर्थः, पिपासुता पिपासा, अधि-कादतिमधुरात्-अतिशयेन मधुरात्, दुग्धात्, मधुनोऽपि-क्षौद्रादपि, शान्तिं निवृत्तिं न उपैति न याति । जलपिपासा यथा जलपानादेव निवर्तते, तथा नामश्रवणेच्छा नामश्रवणेनैव निवर्तते इति भावः ।

अत्र दृष्टान्तोऽलङ्कारः ; न पुनः सामान्यविशेषभावाददर्थान्तरन्यासः , श्रवःसुधा इति "गिरः" इत्यस्य विशेषणतया रूपकालङ्कारेण सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ॥५॥

बाङ्गाला—কর্ণের পক্ষে অমৃতস্বরূপ আপনার বাক্যগুলি শুনিয়াছি, কিন্তু নাম শুনিবার ইচ্ছা নিবৃত্তি পায় নাই। কারণ, জলের পিপাসা, অত্যন্ত উৎকৃষ্ট দুগ্ধ অথবা মধু হইতে নিবৃত্তি পায় না ॥৫॥

अन्वयः—कतमः वंशः ईदृशं तमोऽपहं भवादृशं नायकरत्नं बिभर्ति, अन्यसामान्यधिया अव-मानितं तं त्वया महान्तं (कुलम्) बहु मन्तुम् उत्सहे ॥६॥

इतीरयित्वा विरतां पुनः स तां गिरानुजग्राहतरां नराधिपः।
विरत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥७॥

नलनाम्नो व्यक्त्यन्तरेऽपि सम्भवात् वंशपरिचयेनापि तं परिचेतुं पृच्छति। बिभर्त्तीति। कतमो वंशः कुलं वेणुश्च, ईदृशं लोभनीयम्, तमोऽपहं दर्शनमात्रेणैवाह्लादजननात् शोकनाशकं निजप्रभया अन्धकारनाशकञ्च, भवादृशम्, नायकरत्नं पुरुषश्रेष्ठं हारमध्यस्थितियोग्यमणिञ्च, बिभर्त्ति धारयति। कश्चित् कश्चिद्वेणुरपि स्वान्तरे रत्नं धारयतीति-प्रसिद्धेः। अन्यसामान्यभिया अन्यान्यकुलतुल्यत्वज्ञानेन अन्यान्यवेणुतुल्यत्वज्ञानेन च अवमानितम् असाधारणस्य साधारणज्ञानादेवावज्ञातम्, तं वंशं कुलं वेणुञ्चेत्यर्थः, त्वया तमोऽपहमानेन भवता पुरुषरत्नेन हारमध्यस्थितियोग्यमणिना च करणेन, महान्तम्, अन्यान्यवंशापेक्षया उत्कृष्टत्वम्, अत एवाहं बहु मन्तुम् अतिशयेनादर्त्तुम्, उत्सहे इच्छामि, उत्कृष्टं प्रति अत्यादरस्यौचित्यादिति भावः।

अत्र बहुमानं प्रति महान्तमिति पदार्थस्यैव हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारस्तेनानुप्राणितश्च संसृज्यते। प्रकरणेन कुलपुरुषरत्नाद्यर्थस्य वाच्यतया नियन्त्रिततया द्वितीयार्थस्य अभिधामूलव्यञ्जनागम्यत्वात् शब्दशक्तिमूल उपमाध्वनिरेव, न पुनः श्लेषः। माधुर्यं गुणः, वैदर्भी च रीतिः।

"पुंसि वंशः कुले वेणौ पृष्ठावयववर्गयोः" "तमो ध्वान्ते गुणे शोके क्लीवं वा ना विधुन्तुदे" "नायको नेतरि श्रेष्ठे हारमध्यमणावपि" "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि न पुंसकम्" इति मेदिनी।

तमोऽपहमिति "अपात् क्लेशतमसोः" इति डप्रत्ययः ॥६॥

বাঙ্গালা—কোন্ বংশ, এই রূপ শোকনাশক আপনার ন্যায় পুরুষশ্রেষ্ঠকে ধারণ করিতেছে? সেই বংশটিকে অন্যান্য বংশের তুল্য জ্ঞান করিয়া আমি তাহার অপমান করিয়াছি; কিন্তু আপনা দ্বারা ঐ বংশ অতি-উৎকৃষ্ট হইয়াছে, সুতরাং আমি এখন উহাকে বহুমানিত করিতে ইচ্ছা করি ॥৬॥

অন্বয়ঃ—तपात्यये घनाघनः विरत्य विश्रान्तवतीं चातकमण्डलीम् इव, सः नराधिपः इति ईरयित्वा विरतां तां पुनः गिरा अनुजग्राहतराम् ॥७॥

इतीति। तपात्यये ग्रीष्मकालावसाने, घनाघनो वर्षणशीलो मेघः, विरत्य जलार्थं निर्घोषेण रवं कृत्वा विश्रान्तवतीं विरतवतीम्, चातकानां पक्षिणां मण्डलीं समूहमिव, स नराधिपो राजा नलः, इति पूर्वोक्तप्रकारम्, ईरयित्वा उक्त्वा, विरतां तूष्णीम्भूताम्, तां दमयन्तीम्, पुनः गिरा वाक्येन, अनुजग्राहतराम् अतिशयेनानुगृहीतवान्, वंशपरिचयदानात् यथाभिलषितजननादिति भावः।

अत्र श्रौतीपमालङ्कारो वृत्त्यनुप्रासेन संसृष्टः। प्रसादो गुणः, वैदर्भी च रीतिः।

"घनाघनो घातुकमत्तदन्तिनोर्वर्षुकाब्दे वासवबन्धुकान्दयोः" इति विश्वः।

घनाघन इति "चिक्लिदचक्नस—" इत्यादिना निपातः ॥७॥

বাঙ্গালা—গ্রীষ্মকাল অতীত হইলে, চাতকপক্ষিগণ জলের জন্য রব করিয়া বিরত হওয়ার পর, বর্ষণশীল মেঘ যেমন তাহাদের প্রতি সাতিশয় অনুগ্রহ করে, তেমন নল এই রূপ বলিয়া বিরত হইলে, মহারাজ নল পুনরায় বাক্য দ্বারা তাঁহার প্রতি সাতিশয় অনুগ্রহ করিলেন ॥৭॥

अये! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने।
गरौ गिरः पल्लवनार्थलाघवे मितञ्च सारञ्च वचो हि वाग्मिता ॥८॥
त्वया कथेयं मयि वर्णपद्धतिः कथानुपूर्व्या समकेति केति च।
असे समत्व्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदौ ॥९॥

अन्वयः—अये! मम जिह्वया अनतिप्रयोजने तस्मिन् द्वये अपि उदासितम् एव। हि पल्लवनार्थलाघवे गिरः गरौ, मितञ्च सारञ्च वचः वाग्मिता ॥८॥

अये इति। अये राजकन्ये। मम जिह्वया, अनतिप्रयोजने सातिशयप्रयोजनरहिते। दूतस्य कुलनामनी कस्मिन्नपि कार्ये नोपयुज्येते इति विशेषप्रयोजनाभावे सत्यपि त्वयाकाङ्क्षितत्वात् त्वत्कौतुकनिवृत्तिरूप किञ्चित् प्रयोजनन्त्वस्त्येवेति अतिशब्दप्रयोगस्याशय। तस्मिन् कुलनामद्वये, [illegible] उदासीनयैव स्थितम्, तद्द्वय नोक्तमित्यर्थः। हि यस्मात्, पल्लवन शब्देन [illegible] स्वल्पता येति ते, गिरो वाक्यस्य, गरौ विषे विषस्वरूपे इत्यर्थः, [illegible]। किन्तु मितञ्च शब्दत स्वल्पञ्च, सारञ्च अर्थतो गौरवयुक्तञ्च, यद्वचो वचनप्रयोग वाग्मिता वाक्पटुता। अत एव [illegible] ममिया मम जिह्वया कुलनामविषयद्वये उदासितमित्यभिप्राय।

अत्र उदासीनत्वं प्रति अनतिप्रयोजनपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, [illegible] सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्च [illegible] अनुप्रासेन स उच्यते। प्रसादो गुण, वैदर्भी च रीति।

"पल्लवो किसले पिङ्गे किसले विटपे वने" इति विश्वाप्रकाश।

पल्लवस्य करणमिति पल्लवनम्, इनन्तात् पल्लवशब्दादयुट् ॥८॥

বাঙ্গালা—রাজকন্যে! আমার কুল ও নাম এই দুটী [illegible] বিহীন, তাই আমার জিহ্বা সে দুটী বিষয়ে উদাসীনই [illegible] শব্দ প্রয়োগ করা, অথচ অর্থটীকে অল্প [illegible], অল্প হইবে, অথচ অর্থ গুরুতর থাকিবে, এইরূপ বাক্য [illegible]

अन्वयः—कथा आनुपूर्व्या [illegible] अदौ पदे खलु [illegible] समत्व्यवहार विधातु [illegible]

[illegible]

यदि स्वभावान्मम नोज्ज्वलं कुलं तदा तदुद्भावनमौचिती कुतः।
अथावदातं तदहो विडम्बना तथा कथा प्रेष्यतयोपसेदुषः ॥१०॥
इति प्रतीत्यैव मयावधीरिते तवापि निर्बन्धरसो न शोभते।
हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि संप्रति ॥११॥

समकेतीति सं पूर्वकस्य कितो धातोरयतन्या आत्मनेपदैकवचने कर्म्मणि रूपम्। युष्मदस्मदौ इति शब्दपरत्वान्न त्यमदादेश. "युष्मदस्मत्प्रत्ययगोचरयो." इति पूर्वमीमांसाया शाङ्करभाष्योक्तिवत् ॥९॥

বাঙ্গালা—পিতৃদেবপ্রভৃতি কোন্ ক্রমে কি জাতীয় বর্ণমালা আমার বিষয়ে সঙ্কেত করিয়া রাখিয়াছেন, এইরূপ এই প্রশ্ন করা আপনার নিষ্ফল। কেন না, যুষ্মদ অস্মদ শব্দই আমাদের প্রত্যক্ষ ব্যবহার সম্পাদন করিতে সমর্থ হইবে ।৯।

अन्वयः—यदि मम कुलं स्वभावात् न उज्ज्वलं (भवेत्), तदा तदुद्भावनं कुतः, तच्चिती (भवेत्)। अथ (यदि) तत् अवदातम्, अहो (तदा) प्रेष्यतया उपसेदुषः तथा कथा विडम्बना (एव भवति) ॥१०॥

अथ तर्हि कुलं कथ्यतामित्याह। यदीति। यदि मम कुलम् स्वभावात् न पुनर्विद्वेषिणा निन्दनोनादिति भाव., न उज्ज्वलं न निर्म्मलं भवेत्, तदा तस्य कुलस्य उद्भावनं परान्तिके प्रकाशनम्, कुतः कथम्, औचिती सङ्गतम्, भवेत्, अपि तु कुतोऽपि नैवयं, आत्मनैव दूषितस्वकुलोद्भावनेन आत्मनोऽपि दोषापातेन लज्जापातादिति भाव.। अथ पक्षान्तरे, यदि तत्कुलं अवदातं निर्म्मलमेव भवेत अहो खेदे, तदा, प्रेष्यतया परदूतभावेन, उपसेदुष उपस्थितस्य मम, तथा तादृशी निर्म्मलकुलविषया, कथा प्रकाशकवाक्यम्, विडम्बना आत्मधिक्कार एव भवति, दूत्यिनकार्य्यप्रवृत्तस्य उच्चवंशपरिचयदाने उपहासास्पदत्वादित्याशय।

अत्र विडम्बनां प्रति प्रेष्यतयोपसेदुष इति पदयोरर्थस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारो वृत्त्यनुप्रासेन संसृष्टः। गुणरीती पूर्ववत् ॥१०॥

বাঙ্গালা—যদি আমার বংশ, স্বভাবতই নির্ম্মল না হয়, তাহা হইলে, পরের নিকটে তাহা প্রকাশ করা সঙ্গত হইবে কেন। আর, যদি আমার বংশ নির্ম্মলই হয়, তাহা হইলে, যে ব্যক্তি পরের দূত হইয়া উপস্থিত হইয়াছে, তাহার পক্ষে সে কথা বলা বিড়ম্বনামাত্র ।১০।

अन्वयः—(हे दमयन्ति।)इति प्रतीत्य एव मया अवधीरिते तव अपि निर्बन्धरसः न शोभते। संप्रति हरित्पतीनां प्रतिवाचिकं प्रति ते गिरां श्रम हि घटते ॥११॥

इतीति। हे दमयन्ति! इति पूर्वोक्तप्रकारम्, प्रतीत्यैव विविच्यैव, मया अवधीरिते उपेक्षिते कुलनामप्रश्नोत्तरदाने विषये, तवापि विवेचिकाया अपीति भाव, निर्बन्धरसे आग्रहातिशयानुरागेण शोभते न साधुर्भवति। अतएव सम्प्रति, हरित्पतीनां दिक्पालानामिन्द्रादीनाम्, प्रतिवाचिकं प्रति प्रतिसन्देशविषये, ते तव, गिराम् उत्तरवाक्यानाम्, श्रमो हि उच्चारणायास एव, घटते युज्यते। अत. स एव क्रियतामिति भाव.।

अत्र पराद्धे छेकानुप्रासवृत्त्यनुप्रासयो: संसृष्टि:। गुणरीती पूर्ववत् ॥११॥

বাঙ্গালা—দময়ন্তি। এইরূপ বিবেচনা করিয়াই আমি কুলনামপ্রশ্নের উত্তর দেওয়ার বিষয়ে উপেক্ষা করিয়াছি, সুতরাং আপনারও সে বিষয়ে অধিক আগ্রহ করা শোভা পায় না। অতএব এখন দিক্পালগণের খবরের উত্তরবিষয়ে আপনার বাক্যোচ্চারণের পরিশ্রমই সঙ্গত ।১১।

तथापि निर्बध्नति ! तेऽथवा स्पृहाम् इहानुरुन्धे मितया न किं गिरा ।
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिग्रहा ॥१२॥
महाजनाचारपरम्परेदृशी स्वनाम नामाददते न साधवः ।
ततोऽभिधातुं न तदुत्सहे पुनः जनः किलाचारमुचं विगायति ॥१३॥

अन्वयः—अथवा तथापि (हे) निर्बध्नति ! मितया गिरा इह ते स्पृहां किं न अनुरुन्धे । मां हिमांशुवंशस्य करीरम् एव निशम्य किं फलेग्रहि-ग्रहा न असि ॥१२॥

तथापीति । कुलनाम्नो सर्वथा परिहरणीयत्वेऽपि हे निर्बध्नति । कुलनामविषये आग्रहातिशयं कुर्वति ! मितया स्वल्पया, "गुरौ गिरः मङ्गलनाय लाघवे" इत्युक्तेर्युक्तत्वादिति भावः । गिरा वाचा, इह मम कुलनाम-श्रवणविषये, ते तव, स्पृहामाकाङ्क्षाम्, किं न अनुरुन्धे न आक्षयामि तयोक्त्या किं न निवर्त्तयामि अपि तु अनुरुन्ध एवेत्यर्थः । स्वल्पां गिरमेवाह— माम्, हिमांशोश्चन्द्रस्य वंशः कुलमेव तस्य, करीरम् अङ्कुररूपमेव, निशम्य श्रुत्वा, त्वं किम्, फलेग्रहि-फलवान् ग्रहः आग्रहो यस्याः सा तादृशी, न असि न भवसि ? अपि तु भवस्येवेत्यर्थः ।

अत्र कुले वंशत्वारोपेण स्वस्मिन् करीरत्वारोपे निमित्तमिति परम्परितरूपकम्, तत्र च नेति श्लिष्टपदमनुरूपत्वात् श्लिष्टपरम्परितरूपकम्, छेकानुप्रासश्चान्योन्यं संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना" "स्यादवन्ध्यः फलेग्रहिः" इत्यमरः ।

निर्बध्नतीति आत्मनेपदस्य अनित्यत्वात् 'वर्त्तमाने लट्, शानचौ' इत्यादिना शत्रादेः । ननु निर्बध्नतीत्यस्य आम-न्त्रितत्वात् "आमन्त्रितपदस्याविद्यमानवत्" इति श्रीपतिसूत्रेण निषेधात् कथं ते इति युष्मच्छब्दस्य ते आदेशः । उच्यते तथापीति पूर्वतर पदमपेक्ष्य ते इत्यादेशः । यदा चोक्तं तत्रैव श्रीपतिना "आमन्त्रितादिति विद्धे अवसाने पूर्वतरात् पदात् विधिर्यथा स्यात्" इति । अधीनात्तरेव 'उचित' इत्यादि देवि । ते । "फलानि गृह्णातीति फलेग्रहिः, "फलेग्रहिरात्मम्भरिश्च" इति इन्प्रत्ययान्तो निपातः । "सुपनिपातनादेत्वम्" इति तत्रैव सुत्रम् ॥१२॥

বাঙ্গালা—অথবা, তাহা হইলেও আপনি যখন অত্যন্ত আগ্রহ প্রকাশ করিতেছেন, তখন আমি অল্প কথা দ্বারাই এ বিষয়ে আপনার আকাঙ্ক্ষা নিবৃত্তি করিব। আমাকে চন্দ্রবংশের অঙ্কুর জানিয়াই আপনার সে আগ্রহ সফল হইবে ॥১২॥

अन्वयः—साधवः स्वनाम नाम न आददते ईदृशी महाजनाचारपरम्परा (वर्त्तते) । ततः पुनः (अहं) तत् अभिधातुं न उत्सहे । जनः आचारमुचं विगायति किल ॥१३॥

तर्हीदानीं नामाप्युच्यतामित्याह । महाजनेति । साधवः सज्जनाः, स्वनाम निजनामधेयम्, नाम अवश्यम्भावेन, न आददते निजमुखेन न कथयन्ति । एतेन देवदूतत्वप्रकाशनं गुरुमर्यादा स्वनामग्रहणे न दोष इति सूचितम् । ईदृशी एवम्भूता, महाजनानां महत्लोकानाम् आचारपरम्परा व्यवहारश्रेणी वर्त्तते । ततः कारणात्, पुनरहम्, तत् स्वनाम, अभिधातुं कथयितुम्, न उत्सहे न शक्नोमि । अन्यथा परिहरन्नेवोपपादयन्नित्याह । जनः सर्व एव लोकः, आचारमुचं सदाचारत्यागिनम् विगायति निन्दत्येव । अतो लोकनिन्दाभयादपि तदाचारं परित्यक्तुं न शक्नोमीति भावः ।

अदो यदालप्य शिखीव शारदः स बभूव तूष्णीमहितापकारकः।
ततोऽस्य रागस्य दशा पदे पदे वचांसि हंसीव विदर्भजाददे॥१४॥
सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नापैति विशेषसंशयः।
कियत्तु मौनं वितथा कियत्तु वाक् महत्यहो वञ्चनचातुरी तव॥१५॥

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः अनुमानेन सङ्कीर्णः। प्रसादो गुणः, वैदर्भी च रीतिः।

"नाम गृह्णीयात् ... गुरुलघुने" इत्यमरः।

"आत्मनाम गुरोर्नाम नामातिकृपणस्य च।

आयुष्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः।" इत्याचारमूला श्रुतिः। आददत इति "आङो दाञ् ... अनात्मनेपदम्।" इति ... आचारमुखमिति क्विप् नान्युपपदात् ... ॥१३॥

বাঙ্গালা—সজ্জনেরা প্রকাশ্যভাবে নিজের নাম উচ্চারণ করেন না, এই রূপই প্রশস্ত লোকের আচারপরম্পরা চলিয়া আসিতেছে। সেই জন্যই আমি আমার নাম প্রকাশ্যভাবে বলিতে পারিতেছি না। কারণ, জনসাধারণই আচারত্যাগী লোককে নিন্দা করিয়া থাকে॥১৩॥

अन्वयः—शारदः अहितापकारकः अयं शिखी इव अदः आलप्य तूष्णीं बभूव। अथ पदे पदे अस्य रागस्य दशा विदर्भजा हंसी इव वचांसि आददे॥१४॥

अद इति। शारदः प्रत्यग्रो नितमापीत्यर्थः, अन्यत्र तु शारदः शरत्कालवर्त्ती। मयूरो हि वर्षाकाले ... विधाय शरत्काले तूष्णीं भवतीति भावः। तथा अहितानां शत्रूणाम् अपकारकः पराभवादिना अपकारी, अन्यत्र तु अहीनां सर्पाणां तापकारकः भक्षककारित्वात् दुःखजनकः, अयं नलः, शिखी मयूर इव, अदः पूर्वोक्तवचनम् आलप्य अभिधाय, तूष्णीं नीरवो बभूव, तत्कालोचितवक्तव्याभावादित्याशयः। अथ अनन्तरम्, पदे पदे प्रत्येकसुप्तिङन्तशब्दे, अन्यत्र तु प्रतिचरणे उभयोरेव चरणयोरित्यर्थः, अस्य नलस्य, रागस्य अनुरागस्य ... धारयित्री जनयित्रीत्यर्थः, अन्यत्र तु आस्यस्य निजमुखस्य च रागो रक्तिमा दशा ... दशा धारयित्री। हंसी हि ... चरणे च लौहित्यं स्वभावादेव धारयति। विदर्भजा दमयन्ती, हंसी इव, वचांसि वाक्यानि, आददे जग्राह उवाचेत्यर्थः।

अत्र पूर्वार्द्धे श्रौती पूर्णोपमा परार्द्धेऽपि चापरा श्रौती पूर्णोपमा अन्योन्यनिरपेक्षत्वात् संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः।

"शारदस्तु शरत्काले स्यादपटुस्तु शारदः" इत्यनेकार्थध्वनिमञ्जरी।

दशेति दशधातोरच्प्रत्ययात् स्त्रियामादा। तथा च कातन्त्रवृत्तौ दुर्गः "दश, दंश, इति दशदंशौ ... सिद्धम्" इति॥१४॥

বাঙ্গালা—মিতভাষী এবং শত্রুগণের অপকারী নল, শরৎকালবর্ত্তী এবং সর্পগণের দুঃখজনক ময়ূরের ন্যায় এইরূপ বলিয়া নীরব হইলেন। তাহার পর, দময়ন্তী প্রত্যেক শব্দে নলের অনুরাগ জন্মাইতে থাকিয়া, রক্তমুখী এবং রক্তচরণা হংসীর ন্যায় মধুর বাক্য বলিতে লাগিলেন॥১৪॥

अन्वयः—भवान् सुधांशु-वंशाभरणम् इति श्रुते अपि विशेषसंशयः न अपैति। कियत्तु तव मौनं कियत्तु (च) वितथा वाक् (वर्त्तते) अहो! महती तव वञ्चनचातुरी (दृश्यते)॥१५॥

मयापि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते ।
परेण पुंसा हि ममापि सङ्कथा कुलाबलाचारसहासनासहा ॥१६॥
उदाभिनन्द्य प्रतिबन्ध्यनुत्तरः प्रियागिरः सस्मितमाह स स्म ताम् ।
वदामि वामाक्षि ! परेषु मा क्षिप स्वमीदृशं मादृशमाक्षिपद्वचः ॥१७॥

सुधांशुरिति । भवान्, सुधांशुः यस्य चन्द्रः यस्य आमरण जन्मनैवालङ्कारः तत्तादृलङ्कार चन्द्रवंशीय इत्यर्थः इति सामान्ये श्रुतेऽपि, विशेषे चन्द्रवंशीय क इति विशेषविषये तु मम, न अर्पेति मापकाङ्क्षति । अतएव नामोक्तौ न तु मननमनुदेति भावः । क्रियदुक्त—स्वनामनिर्देशनादिकतिपयविषयेषु तव मौन तूष्णीम्भावो वर्त्तते, कियदुक्तं कुत आगत कदनागत इत्यादिकतिपयविषयेषु च वितता विस्तृता, वाक् "हरित्पतीनां सदसः प्रतीहि" इत्यादि प्रकृत्य वर्त्तते । अतएव अहो चित्रे, महती तव वचनचातुरी परप्रतारणनैपुण्यं दृश्यते । एतच्च नोचितमिति भावः ।

अत्र वचनचातुरी प्रति तृतीयपादगतवाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ॥१५॥

বাঙ্গালা—আপনি চন্দ্রবংশের অলঙ্কার এইরূপ শুনিলেও আমার বিশেষবিষয়ের সন্দেহ যাইতেছে না। কতকগুলি বিষয়ে আপনার মৌনাবলম্বন এবং কতকগুলি বিষয়ে বিস্তৃত উক্ত হইয়াছে। অতএব হায়! আপনার অত্যন্ত প্রতারণানৈপুণ্য দেখা যাইতেছে ॥১৫॥

अन्वयः—मया अपि स्वनाम मत्कर्ण-सुधाम् अकुर्वते ते प्रतिवाचिकं न देयम् । हि परेण पुंसा (सह) मम अपि सङ्कथा कुलाबलाचारसहासनासहा (एव) भवति ॥१६॥

मयेति । न केवलं त्वया महाजनाचारविरोधात् स्वनाम उच्चारयितव्यमिति न, मयापि, स्वनाम त्वन्निजनामधेयम्, मत्कर्णयोः सुधाम् अमृतरूपम्, अकुर्वते माम् अश्रावयत इत्यर्थः, ते तुभ्यम्, प्रतिवाचिकं दिक्पालसन्देशस्योत्तरम्, न देयं न दातुमुचितम् । हि यस्मात् परेण पुंसा पुरुषेण सह, ममापि सङ्कथा संलापः, कुलाबलानां कुलाङ्गनानाम् आचारेण व्यवहारेण सह आसनम् एकत्रावस्थानं न सहते इति सा तथाभूतैव भवति । यथा च महाजनाचारविरोधाद् यथा तव स्वनामोच्चारणं न कर्त्तव्यम्, तथा कुलाङ्गनाचारविरोधात् परपुरुषेण त्वया सह ममापि संलापो न कर्त्तव्य एवेति न ते प्रतिवाचिकं देयमिति भावः ।

अत्र मत्कर्णसुधामिति निरङ्ग केवलरूपकमलङ्कारः, अनुप्रासादि शब्दालङ्कारैः सह तेषां संसृष्टिः । गुणरीती पूर्ववत् ॥१६॥

বাঙ্গালা—আপনি যখন নিজের নামটিকে আমার কর্ণযুগলের অমৃতস্বরূপ করিতেছেন না, তখন আমার পক্ষেও আপনার বাক্যের প্রত্যুত্তর দেওয়া উচিত নহে। কারণ, পরপুরুষের সহিত আলাপ করা, আমার পক্ষেও কুলাঙ্গনাগণের আচারবিরুদ্ধ ॥১৬॥

अन्वयः—स इदा प्रिया-गिरः अभिनन्द्य प्रतिबन्ध्यनुत्तरः (सन्) तां सस्मितम् आह स्म । (हे) वामाक्षि ! स्वं परेषु मा क्षिप, मादृशम् आक्षिपत् ईदृशं वचः (अपि परेषु मा क्षिप इति) वदामि ॥१७॥

उदिति । स नलः, इदा सम्प्रति, प्रियायाः दमयन्त्याः गिरः "सुधांशुवंशाभरणम्" इत्यादीनि वाक्यानि, अभिनन्द्य पुरस्कृतवान्, प्रतिबन्धा "परेण पुंसा हि" इत्यादिना प्रदर्शितया युक्त्या विषये अनुत्तरः उत्तरशून्यः सन् तां दमयन्तीम्, सस्मितं ईषद्धास्यम्, आह स्म अब्रवीत् च । किमाह तदाह—

करोषि नेमं फलिनं मम श्रमं दिशोऽनुगृह्णासि न कञ्चन प्रभुम्।
त्वमित्थमर्हासि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ॥१८॥
सुरेषु सन्देशयसीदृशीं मधुं रसस्रवेण स्तिमितां न भारतीम्।
मदर्पिता दर्पकतापितेषु या प्रयाति दावार्द्दितदाववृष्टिताम् ॥१९॥

मदात्मीयत्यादि। वामे सुन्दरे अक्षिणी नयनद्वयं यस्यास्तत्सम्बोधनम्। स्वम् आत्मीयमेव नाम्, परेषु परपुरुष मध्येषु, मा क्षिप न निवेशय। स्नेह एव प्रवृत्तत्वात् मामात्मीयमेव गणयित्वा मया सार्द्धं यथेष्टमेवालपितुमर्ह सीति-भावः। तथा माक्षिकं मधु, आक्षिपत् माधुर्य्यातिरेकेण तिरस्कुर्वत्, ईदृशं "गिर" श्रुता एव तव श्रव सुधा इत्यादिकमनुरागव्यञ्जकम्, वचो वाक्यमपि, परेषु मदतिरिक्तपुरुषेषु, मा क्षिप मार्पय न प्रयुङ्क्ष्व, तथात्वे न् पातिव्रात्यभङ्गसम्भवादित्याशयः। इति वदामि त्वामिति शेष।

अत्र आक्षिपदित्यनेन सादृश्याक्षेपादार्थोपमा, छेकानुप्रासश्च त्वनयो स सृष्टिः। ओजो गुण, गौडी रीति. ॥१७॥

বাঙ্গালা—নল মনে মনে দময়ন্তীর বাক্যের প্রশংসা করিয়া, তৎপ্রদর্শিত বাধা উত্তর দিতে না পারিয়া, ঈষদ্হাস্য সহকারে তাঁহাকে বলিলেন—" হে বামলোচনে আত্মীয় ব্যক্তিকে পরের মধ্যে গণ্য করিবেন না, আর মধু অপেক্ষাও মধুর এমন বাক্য পরের নিকট বলিবেন না, ইহাই আমি বলিতেছি" ।১৭।

अन्वय —(हे दमयन्ति!) इमं मम श्रमं फलिनं न करोषि? कञ्चन दिशः प्रभुं न अनुगृह्णासि? त्वम् इत्थं रसामृतस्नानपवित्रया गिरा सुरान् उपासितुम् अर्हा असि ॥१८॥

करोषीति। हे दमयन्ति! इमं मम श्रमं दौत्यप्रयासम्, फलिनम् इन्द्रादन्यतमवरणेन सफलम्, न करोषि न करिष्यसि किम्? भविष्यत्सामीप्ये वर्त्तमाना, काकुवशेन च प्रश्नो व्यज्यते। परवाक्येवम्। तथा कञ्चन कञ्चित् दिशः प्रभुं पतिम्, न अनुगृह्णासि न अनुग्रहीष्यसि किम्? अपि तु करिष्यस्येव अनुग्रहीष्यस्येव चेत्यर्थः। तथा त्वम् इत्थं पूर्वोक्तरूपया, रसः सुस्वाद एव अमृतं सुधा तत्र स्नानेन अवगाहनेन पवित्रा शुद्धा तया माधुर्य्यव्यञ्जिकयेत्यर्थः, गिरा-वाचा, सुरान् इन्द्रादीन् देवान् उपासितुम् आराद्धुम्, अर्हा योग्या असि, मधुरया वाचा यथा मां तोषयसि तथा तानपि तोषयेति भावः।

अत्र रसामृतेति निरङ्गं केवलरूपकमलङ्कारः, प्रसादो गुणः, वैदर्भी च रीतिः ॥१८॥

বাঙ্গালা—রাজকন্যে! আপনি আমার এই পরিশ্রমটাকে কি সফল করিবেন না? এবং কোন দিক্‌পালের প্রতি কি অনুগ্রহ করিবেন না? (অবশ্যই করিবেন)। আর রসামৃতে স্নান করার জন্য পবিত্র এইরূপ বাক্য দ্বারা আপনি দেবগণকে সন্তুষ্ট করিবার যোগ্যই হইতেছেন ।১৮॥

अन्वयः— (हे राजकन्ये!) ईदृशीं रसस्रवेण स्तिमितां मधुं भारतीं सुरेषु न सन्देशयसि? मदर्पिता या दर्पक-तापितेषु सुरेषु दावार्द्दित-दाव वृष्टिता प्रयाति ॥१९॥

सुरेष्विति। हे राजकन्ये! ईदृशीं पूर्वोक्तरूपाम्, रसस्य माधुर्य्यरूपसादस्य जलस्य च स्रवेण स्यन्दनेन क्षरणेन च स्तिमिता कार्य्ययोग्यं शिथिलताम् आर्द्रां च, मधुं मधुराम्, भारतीं वाक्यम्, सुरेषु इन्द्रादिषु देवेषु, न सन्देशयसि? मद्द्वारा वाचिकभावेन न प्रेरयिष्यसि किम्? अपि तु सर्वथैव सम्भवादन्यत्रमेव प्रेरयिष्यसीत्यर्थः। मया अर्पिता तेषु सुरेषु मया क्षिप्ता कृता, या भारती, दर्पकेण कामेन तापितेषु तेषु सुरेष्वित्यर्थः, दावेन वनवह्निना

यथा यथेह त्वदपेक्षयानया (१) निमेषमप्येष जनो विलम्बते।
त्वया मदस्वीकरणे दिवौकसां तथा तथाद्य त्वरते रतेः पतिः ॥२०॥
इयच्चिरस्यावदधन्ति मत्पथे किमिन्द्रनेत्राण्ययनिर्न निर्ममौ।
धिगस्तु मां सत्वरकार्य्यमन्थरं स्थितः परः प्रेष्यगुणोऽपि यत्र न ॥२१॥

अर्हि तत्तापेन पीड़ितो यो दावो वन तस्य इष्टिता इष्टितुल्यतान्, प्रयाति प्राप्नोति। मेघवृष्टिर्यथा दावानलपीड़ितवनसन्तापं शमयति, तथा मदुक्ता भवत्सन्देशवाणी कामपीड़ितानामिन्द्रादीनां सन्तापं शमयिष्यतीति भावः।

अत्र इष्टितामिति साहस्यावेपादसम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारश्छेकानुप्रासेन च सृज्यते। प्रसादो गुणः, वैदर्भी च रीतिः।

"कन्दर्पो दर्पकोऽनङ्गः" "दवदावौ वनारण्यवह्नी" इत्यमरः ॥१९॥

বাঙ্গালা—রাজকন্যে! কামসেকনিবন্ধন আর্দ্র এইরূপ বক্তব্য সংবাদের কথা কি আপনি আমা দ্বারা দেবগণের নিকট প্রেরণ করিবেন না? যাহা আমি প্রকাশ করিলে পর কামতাপিত দেবগণের বিষয়ে দাবানলতাপিত বনের উপরের বৃষ্টির সাদৃশ্য লাভ করিবে ॥১৯॥

अन्वयः—एष जनः अनया त्वदपेक्षया यथा यथा इह निमेषम् अपि विलम्बते, रतेः पतिः तथा तथा त्वया दिवौकसां मदस्वीकरणे अद्य त्वरते ॥२०॥

यथेति। एष मत्स्वरूपो जनः, अनया त्वदपेक्षया तव सकाशात् उत्तरश्रवणाकाङ्क्षया, यथा यथा येन येन भावेन, इह अस्मिन् स्थाने, निमेषमपि अल्पकालमपि, विलम्बते विलम्बं करोति, रतेः पतिः कामः, तथा तथा तेन तेनैव भावेन, त्वया क्रोधेन, दिवौकसामिन्द्रादीनां देवानाम्, मदस्वीकरणे मदङ्गीकारे, अद्य अस्मिन् दिने, त्वरते सत्वरो भवति। अत्र [illegible] इति भावः।

अत्रानिमपादि [illegible] श्छेकानुप्रासोऽलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः ॥२०॥

বাঙ্গালা—এই স্থানে আপনার নিকট হইতে এই উত্তর শুনিবার জন্য যেমন যেমন এখানে নিমেষকাল ও বিলম্ব করিবে, তেমন তেমনই কামদেব [illegible] দেবগণের [illegible] রাখের রক্ষা করিবার বিষয়ে আজ সত্বর হইবেন ॥২০॥

अन्वयः—अयनिः मत्पथे इयच्चिरस्य अवदधन्ति इन्द्रनेत्राणि किं न निर्ममौ। [illegible] मां धिक् अस्तु, यत्र परः प्रेष्यगुणः अपि न स्थितः ॥२१॥

इयदिति। अयनिर्ब्रह्मा, मत्पथे मम [illegible] इयच्चिरम् [illegible] अवदधन्ति [illegible] दृष्टिं कुर्वन्ति, [illegible] इन्द्रस्य [illegible] न निर्ममौ न [illegible], अपि तु [illegible], अन्यथा [illegible] त्वदुक्तौ [illegible]। [illegible] सत्वरकार्य्ये [illegible] मां धिक् अस्तु, यत्र [illegible] परः [illegible] प्रेष्यगुणोऽपि [illegible] न स्थितः, [illegible] ।

अत्र [illegible] इन्द्रनेत्र [illegible] निदर्शना [illegible] प्रसादो गुणः, वैदर्भी च रीतिः।

[illegible] ॥२१॥

বাঙ্গালা—[illegible]

---

(१) [illegible]

इदं निगद्य क्षितिभर्त्तरि स्थिते तयाऽभ्यधायि स्वगतं विदग्धया ।
अधिस्त्रि तं दूतयतां भुवः स्मरं मनो दधत्या नयने पुणव्यये ॥२२॥
जलाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् ।
मरुल्लतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्द्ध्वमुखेन तेजसा ॥२३॥

পূর্ব্বক চাহিয়া রহিয়াছে, সুতরাং সে গুণকে কি বজ্র নির্ম্মাণ করে নাই ? শীঘ্রক
কার্য্যে আমি বিলম্ব করিতেছি, অতএব আমাকে ধিক্, যে ব্যক্তির উপরে কেবল ভূ
গুণও থাকিল না ॥২১॥

अन्वयः—इदं निगद्य क्षितिभर्त्तरि स्थिते (सति) भुवः स्मरं तम् अधिस्त्रि दूतयतां नयनं पुण
-मनः दधत्या विदग्धया तया स्वगतम् अभ्यधायि ॥२२॥

इदमिति । इदं पूर्व्वोक्तरूपं वाक्यम्, निगद्य उक्त्वा, क्षितिभर्त्तरि राजनि नले, स्थिते नीरवे भूते
भुवः पृथिव्याः, स्मरं कामस्वरूपम्, तं नलम्, अधिस्त्रि स्त्रीलोकस्य समीपे, दूतयतां दूतं कुर्व्वतां दूतभ
प्रेरयतामिन्द्रादीनामित्यर्थः, नये नीतौ यन्नैपुणम् अभिज्ञता तस्य व्यये अभावे, मनः आत्मनश्चित्तम्, दधत्या
धन्या इन्द्रादीनां नीतिज्ञानं सर्व्वथैव नास्तीति मनसा चिन्तयन्त्येत्यर्थः, विदग्धया नीतिशास्त्रे पण्डितया
दमयन्त्या, स्वगतम् आत्ममात्रवेद्यं यथा स्यात्तथा अस्पष्टमित्यर्थः, अन्यथा नलेन श्रुते सति आत्मनः कटुभा
प्रगल्भता च प्रकाशितेति भावः, अभ्यधायि अभिहितम् ।

अत्र भुवः स्मरमिति निरङ्ग केवलरूपकमलङ्कारः । तथा द्वितीयपादेन वाक्यसमाप्तावपि पुनरुप
विशेषणभावेन द्वितीयार्द्धोपादानात् समाप्तपुनरात्ततादोषः ।

"इदं गदित्वा विरते धरापतौ अधिस्त्रि तं दूतयतां भुवः स्मरम् ।
मनो दधत्या नयनैपुणव्यये तयाऽभ्यधायि स्वगतं विदग्धया ॥"

इति पाठेन तस्य समाधानम् । प्रसादो गुणः, वैदर्भी च रीतिः ।

अधिस्त्रीति सामीप्यार्थे अव्ययीभावः । दूतयतामिति करोत्यर्थे नन्तात् दूतशब्दात् शतृ ङ् ।
स्त्रीजनसन्निधाने नलसदृशसुन्दरयुवकस्य दूतभावेन प्रेरणं नीतिशास्त्रनिषिद्धम् । यथा—
"नोज्ज्वलं रूपवन्तञ्च नार्य्यवन्तं न चातुरम् । दूतं वापि हि दूतीं वा बुधः कुर्य्यात् कदाचन ॥
सुन्दरं तरुणं जन्तुं न स्त्रिया दूतयेत् सुधीः." ॥२२॥

বাঙ্গালা—এই কথা বলিয়া রাজা নীরব হইলে, যাঁহারা স্ত্রীলোকের নিকট পৃথিবী
কামদেবস্বরূপ নলকে দূত করিয়া পাঠাইয়াছিলেন, সেই ইন্দ্রাদিদেবগণের নীতিশা
মোটেই অভিজ্ঞতা নাই ইহা মনে মনে ভাবিয়া, নীতিনিপুণা দময়ন্তী স্বগতভাবে ব
লেন ॥২২॥

अन्वयः—(हे दूत !) जलाधिपः त्वां मयि ध्रुवम् अदिशत्, स परेतराजः त्वां मयि स्फ
प्रजिघाय, मरुल्लता एव (त्वं) मयि निश्चितं प्रहितः असि, ऊर्द्ध्वमुखेन तेजसा च (त्वं) मयि नि
नियोजितः असि ॥२३॥

तया स्वगतं यदभ्यधायि तदाह जलेति । हे दूत ! जलानां सलिलानां डलयोरैक्यात् जडानां
निर्ब्बोधानाञ्च अधिपः प्रभुः प्रधानञ्च वरुणः, त्वाम्, मयि मत्समीपे, ध्रुवं निश्चितमेव, अदिशत् आदिष्टवान्
कृत्यं प्रेरितवानित्यर्थः । तथा च ईदृशं परमसुन्दरं युवानं भवन्तं खलु मूर्खा एव मत्सन्निधौ दूत

अथ प्रकाशं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ ।
पुनस्तदाभाषणविस्मयोन्मुखं मुखं विदर्भाधिपसम्भवा दधौ ॥२४॥
वृथा परीहास इति प्रगल्भता न नेति च त्वाद्दृशि वाग्विगर्हणा ।
भवत्यघा च भवत्यनुत्तरात् इतः (१) प्रदित्सुः प्रतिवाचमस्मि ते ॥२५॥

प्रेरयितुमर्हति स अज्ञानानधिपो नितान्तनिर्बोध एव सर्वदेवोभयोरावयोरादित्यभक्ष्यदित्ति-भावः । स प्रसिद्धः, परेतानां चलतां यत्नादचेतनानाञ्च राजा प्रभुः प्रधानञ्च यमः, त्वां नयि स्फुटं स्पष्टम्, प्रतिभाय दौत्यं कर्तुं प्रेरितवान् । यः खलीहम भवन्तं ईदृशां एव मम समीपे दूतरूपेण प्रेषयति, स नितरां चेतनशून्य इव— पूर्वोक्तहेतुना विवेकरूपचेतनशून्यादयं न किञ्चित्त्रय । नयन्वता इन्द्रेण वातरोगवता वातरोगवत्त्वात् विज्ञतमस्ति- ष्केण चेतसा, त्वं नयि, निश्चितम्, प्रहितो दूतरूपेण प्रेरितोऽसि । यः खलिन्यभूतमेव त्वाम् इत्यभूताया एव ममान्तिके दौत्यं कर्तुं प्रेरयति स वातरोगवत्त्वाद्विज्ञतमस्तिष्क एव पूर्वोक्तादेव हेतोरित्यभिप्रायः । तथा त्वङ्गमुखेन त्वङ्गदिषि ज्वालिनः, तेजसा तेजःपदार्थेन वह्निना चेतसा, अथवा त्वङ्गमुखेन नसकीर्णपरिलतवदन- म्लानिना, तेजसा देवनो नैलायां ओष्ठन्दीप्त्या लिना पिपासितेयेच्चयं, त्वं नयि निश्चितम्, नियोजितो दूतभा- वेन व्यापारितोऽसि । य किल भवादृशं पुरुषं मादृशकामिनीसमीपे दूतरूपेण प्रच्छन्नं प्रेरयितुमर्हति, स पवीत्वेन लिप्सितवाया स्त्रिया व्यभिचारदोषप्रसङ्गात् विनाश एवेति भावः ।

अत उत्कृष्टा यमनाम्नां स्पष्टसूचनात् पञ्चयोगेन नानावृत्तः, "पञ्चयोगे यदा भङ्ग्या न्यमेयानि- धीयते" इति दर्पणलक्षणात् । प्रसादो गुणः, वैदर्भी च रीतिः ॥२३॥

বাঙ্গালা—নিশ্চয়ই ধর্মাধিপতি যম (অত্যন্তনির্বোধ যম) আপনাকে আমার নিকট পাঠাইয়াছেন ; স্পষ্টই বাতের রোগী ইন্দ্র (একেবারে চৈতন্যহীন হন) আপনাকে আমার নিকটে প্রেরণ করিয়াছেন ; সত্য বটে—ইন্দ্রই (বাতুল বিকৃতমস্তিষ্ক ইন্দ্রই) আপ- নাকে আমার কাছে পাঠাইয়া দিয়াছেন এবং ইহাও সত্য যে, উর্দ্ধশ্বাসী তেজ অগ্নিই (উন্মুখ পিপাসুই) আপনাকে আমার নিকট দূতরূপে নিযুক্ত করিয়াছেন ॥২৩॥

अन्वय —अथ किम् अपि सतीकुलस्य आभरणम् असौ विदर्भाधिपसम्भवा निभृतस्मिता सती प्रकाशं मुखं पुनः तदाभाषणविस्मयोन्मुखं दधौ ॥२४॥

अथेति । अथ तत्ताभिधानानन्तरम्, किमपि अनिर्वचनीयम्, सतीकुलस्य साध्वीसमूहस्य आभरणम् अलङ्कारस्वरूपा परमा साध्वी, अत एव इन्द्रादिभिर्दर्शितया बहुधालोभनात् किमप्यव इति भावः, असौ विदर्भाधिपसम्भवा विदर्भराजदुहिता दमयन्ती, निभृत मन्दहासा निभृतहास्य कृत्वा किमपि ईषद् हास्यं यथा सा तादृशी सती भवन्ती, देवाः स्वल्पमपि न साध्वीत्ववतीत्याह मधुरं तदपि स्मितं स्पष्टं दधौ, प्रकाशं स्पष्टमपि—प्रगल्भं मुखं निजवदनम् पुनरपि, तेन नलेन सह भाषणम् आलापनं तत्र यो विस्मयः— ... उन्मुखम् उत्सुकम् दधौ धारयामास, पुनरपि तेन सहालापार्थेदम् । ... इत्यादयः इत्याद्युक्तेन च युक्तो । प्रसादो गुणः, वैदर्भी च रीतिः ॥२४॥

... নেত্র, শ্লাঘ্য ... অনির্বচনীয় অলঙ্কারস্বরূপা ঐ বিদর্ভরাজকন্যা ... হাস্য করিয়া, নিজের প্রফুল্ল মুখখানিকে পুনরায় নলের সহিত আলা- প ... ছিলেন ॥২৪॥

कथं नु तेषां कृपयापि वागसौ असावि मानुष्यकलाञ्छने जने ।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा ॥२६॥
अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासङ्गमशोभिताभृतः ।
कृतस्य हंसावलिमांसलश्रियं वलाकयेव प्रबला विडम्बना ॥२७॥

अन्वयः—(अयं भवतः) वृथा परीहासः इति (उत्तरं) प्रगल्भता, त्वादृशि न न इति वाक् च विगर्हणा; अनुत्तरात् च भवति अवज्ञा भवति, इतः ते प्रतिवाचं प्रदित्सुः अस्मि ॥२५॥

वृथेति । 'इन्द्रादयो देवास्त्वां प्रार्थयन्ते' इत्ययं भवतः मां प्रति वृथा निष्फलः, परीहासः उपहासः; इति उत्तरम्, प्रगल्भता धृष्टता मम धृष्टताप्रकाशकमित्यर्थः । तथा च श्यालिकादिषु सम्पर्कीयेषु कृतः परीहासः सुखावहत्वात् सफलः, निःसम्पर्केषु कृतः परीहासस्तु दुःखावहत्वात् निष्फल एव । इत्थं निःसम्पर्कया मयि भवता कृतोऽयं परीहासः सर्वथा ममायोग्यताज्ञापकत्वान्निष्फल एव । तथा निःसम्पर्केत्वयि उत्तरदानात् सर्वो मां प्रगल्भामेव वदिष्यन्तीति सरलार्थो भावार्थश्च । एतेनेन्द्रादयो न मां प्रार्थयन्ते, किन्तु दूतभूतस्य भवतस्तावत् परीहास इति दमयन्त्याभिप्रायः सूचितः । त्वादृशि भवादृशे महापुरुषे, न न इति वाक् च इन्द्रादीन् न वरिष्यामि-इन्द्रादीन् न वरिष्यामि' इति प्रत्युत्तरवाक्यञ्च, विगर्हणा निन्दा, युक्तिप्रदर्शनाभावेन अवज्ञाप्रकाशकत्वादिति भावः । अनुत्तरात् तव वाक्यस्य प्रत्युत्तरादानाच्च, भवति त्वयि अवज्ञा अवहेला भवति प्रकाशते सर्वत्र लोकव्यवहारादित्याशयः । इतः कारणात्, ते तव प्रतिवाचं प्रत्युत्तरं प्रदित्सुः प्रदातुमिच्छुः अस्मि ।

अत्र तृतीयपादे यमकमलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ।

परीहास इति "ऋक्षस्य दीर्घता" इति दीर्घः ॥२५॥

বাঙ্গালা—ইন্দ্রপ্রভৃতি দেবগণ আমাকে প্রার্থনা করিতেছেন, ইহা আপনার বৃথা উপহাস এইরূপ উত্তর করায় আমার ধৃষ্টতা প্রকাশ হয়, আপনার ন্যায় মহাপুরুষের নিকট 'না' 'না' বলায় নিন্দা করা হয়, আবার কোন উত্তরই না করায় আপনার প্রতি অবজ্ঞা হইয়া পড়ে; এই জন্যই আপনার নিকট উত্তর দিতে ইচ্ছুক হইয়াছি ॥২৫॥

अन्वयः—तेषां कृपया अपि असौ वाक् मानुष्यकलाञ्छने जने कथं नु असावि । वा ईश्वराः स्वभावभक्तिप्रवणं प्रति कया वाचा मुदं न उद्गिरन्ति ॥२६॥

कथमिति । हे दूत ! तेषामिन्द्रादीनां देवानाम्, कृपयापि [illegible] दययापि, असौ 'अस्मान् [illegible]', ईदृशी, वाक् वाक्यम्, मानुष्यके मनुष्यत्वेन लाञ्छनं चिह्नं यस्य तादृशे, जने मयीत्यर्थः, कथं नु केन प्रकारेण, असावि उत्पादिता । देवेषु मानुषीणामयोग्यत्वान्नयितेषां तादृशं वाक्यमनुचितमिति भावः । [illegible] वा अथवा, ईश्वराः प्रभवः [illegible] भक्तिप्रवणं [illegible] प्रति, कया [illegible], वाचा वाक्येन, मुदम् [illegible], न उद्गिरन्ति न प्रकाशयन्ति, [illegible] मुदमुद्गिरन्तीत्यर्थः । [illegible]

उचितं वाक्यमिति भावः ।

अत्र [illegible] । प्रसादो गुणः, वैदर्भी च रीतिः ॥२६॥

বাঙ্গালা—দেবগণের কৃপাতেও [illegible] মনুষ্যের প্রতি কি করিয়া প্রয়োগ করিল ! [illegible] করিয়া [illegible] ॥২৬॥

पुरः सुरीणां भण कैव (१) मानुषी न यत्र तास्तत्र तु सापि योषिका(२) ।
अकाञ्चनेऽकिञ्चननायिकाङ्गके किमारकूटाभरणेन न श्रियः ॥२८॥

अन्वयः—अहो ! बलाकया इव तावति तावत शिरः कृतस्य इव मया सुराङ्गना-त्यजन-मोलिताम्बर महेन्द्रस्य मघवा विडम्बना कथम् औचिती (स्यात्) ॥२७॥

अहो इति । अहो दूत ! बलाकया बकपङ्क्त्या, इव तावत्या इव उच्चैः [illegible] ता तथा बलवती [illegible] शोभा यस्य तस्य [illegible], कृतस्य [illegible] इव, मया मानुष्या दारा, सुराङ्गनानां शचीप्रभृतीनां त्यजनेन [illegible] मलिना [illegible] बिभर्तीति तस्य तथोक्तस्य, महेन्द्रस्य देवराजस्य, मघवा महती विडम्बना [illegible] विडम्बना, कथम्, औचिती उचिता स्यात्, अपि तु कदापि नेत्यर्थः । अतो महेन्द्रे च मन याचन तवापि तस्य सर्वथैतदुभयमप्यनुचितमिति भावः ।

अत्र अप्यपि दौत्येन, अनौचित्य प्रति सुराङ्गनेत्यादिकस्य इव [illegible] च विशेषणस्य हेतुत्वा पदार्थहेतुकं काव्यलिङ्गम्, इत्येतेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनरन्येनानुमन्येन न दृश्यते । माधुर्यं गुणः, वैदर्भी च रीतिः ।

उचितैव औचिती ब्राह्मणादित्वात् स्वार्थे ष्यञ् ॥२७॥

বাঙ্গালা—মহাশয় ! [illegible] যাহার অত্যন্ত শোভা হইয়া থাকে, এই [illegible] যেমন বকপংক্তি দ্বারা বিশেষ বিড়ম্বনা সঙ্গত হয় না, তেমন [illegible] [illegible] পরিত্যাগ করিয়া [illegible] ধারণ করিয়া থাকেন, সেই দেবরাজের [illegible] আমা দ্বারা বিশেষ বিড়ম্বনা সঙ্গত হয় না ।২৭।

अन्वयः—सुरीणां पुरः मानुषी का इव भण, यत्र ताः न (विद्यन्ते) तत्र तु सा अपि योषिका (भवति) । अकाञ्चने अकिञ्चननायिकाङ्गके आरकूटाभरणेन किं श्रियः न (भवन्ति) ॥२८॥

[illegible] पुर इति । सुरीणां देवाङ्गनानाम्, पुरः अग्रतः, मानुषी मनुष्याङ्गना, का इव [illegible] भवति, इति भण ब्रूहि । देवाङ्गनानां सम्मुखे मनुष्याङ्गना [illegible] । किन्तु यत्र ताः सुरी देवाङ्गनाः, न विद्यन्ते, तत्र तु पृथिव्यां, सा [illegible] [illegible] । तथा च अकाञ्चने न विद्यते काञ्चन [illegible] [illegible] शोभा, न भवति । अपि तु [illegible] । तथा च [illegible] [illegible] [illegible] मानुषी सती देवाङ्गनाः [illegible] [illegible]

अत्र [illegible] [illegible] [illegible] गुणः, वैदर्भी च रीतिः ।

[illegible]

বাঙ্গালা—[illegible]

---

(१) [illegible] (२) [illegible]

यथा तथा नाम गिरः किरन्तु ते श्रुती पुनर्मे वधिरे तदक्षरे।
पृषत्किशोरी कुरुतामसङ्गतां कथं मनोवृत्तिमपि द्विपाधिपे ॥२९॥
अदो निगद्यैव नतास्ययानया (१) श्रुतौ लगित्वाभिहितालिरालपत्।
प्रविश्य यन्मे हृदयं ह्रियाह तत् विनिर्यदाकर्णय मन्मुखाध्वना ॥३०॥

যেখানে দেবরমণীরা না থাকেন, সেই স্থানেই মনুষ্যরমণী শোভা জন্মাইতে পারে। সেই দরিদ্ররমণীর যে অঙ্গে স্বর্ণালঙ্কার না থাকে, সেই অঙ্গে কি পিত্তলের অলঙ্কারে শোভা না ॥২৮॥

अन्वयः—ते यथा तथा गिरः किरन्तु नाम, पुनः मे श्रुती तदक्षरे वधिरे। पृषत्किशोरी असङ्गतां मनोवृत्तिम्, अपि द्विपाधिपे कथं कुरुताम् ॥२९॥

यथेति। ते इन्द्रादयो देवाः, यथा तथा येन तेन प्रकारेण अनुनयेन भयप्रदर्शनेन वेत्यर्थः, गिरः सन्देशवाक्यानि, किरन्तु विक्षिपन्तु त्वया द्वारा प्रेरयन्त्विति तात्पर्यम्। नाम सम्भावनायाम्। पुनः किन्तु, मे श्रुती कर्णयुगलम्, तासां गिराम् अक्षरे एकस्मिन्नपि वर्णे तच्छ्रवणविषय इत्यर्थः, वधिरे असमर्थे भव... तथा च पृषती हरिण्याः किशोरी यौवनप्राप्त्युन्मुखी स्त्री, असङ्गतां भिन्नजातीयत्वादन्याय्यम्, मनोऽपि सङ्गमादौ का कथा अभिलाषमात्रमपि, द्विपाधिपे हस्तिश्रेष्ठे, कथं केन प्रकारेण कुरुताम्, अपि तु नैवेत्यर्थः। तेन चाहमपि भिन्नजातीयत्वात् देवाधिपे मनोवृत्तिमपि कर्तुं नार्हामीति भावः।

अत्र एवात्र दृष्टान्तोऽलङ्कारः प्रथमार्द्धगतवृत्त्यनुप्रासेन स सृज्यते। माधुर्यं गुणः वैदर्भी च रीतिः।

বাঙ্গালা—দেবতারা যে কোন ভাবেই সংবাদ প্রেরণ করুন না কেন, কিন্তু আমার কর্ণযুগল তাহার একটী অক্ষরও শুনিতে অক্ষম। কারণ, বালিকা হরিণাঙ্গনা অর্থাৎ মনোবৃত্তিও হস্তি শ্রেষ্ঠের উপরে কি করিয়া করিবে ॥২৯॥

अन्वयः—अनया अदः निगद्य एव नतास्यया (सत्या) श्रुतौ लगित्वा अभिहिता आलिः '...हृदयं प्रविश्य यत् आह मन्मुखाध्वना विनिर्यत् तत् आकर्णय' (इति) आलपत् ॥३०॥

अद इति। अनया दमयन्त्या, अद इदं पूर्वोक्तरूपम्, निगद्यैव उक्त्वैव, नतास्यया लज्जयावनतमुखया सत्या, श्रुतौ आलेरेव कर्णे, लगित्वा गुप्तभावेन कथनार्थं संलग्नीभूय, अभिहिता मन्तव्यं कथित्वा..., आलिः काचित् सखी, ह्रिया लज्जया, मे मम, हृदयं प्रविश्य, अनया वक्तव्यं मया वक्तुं न शक्यत इति हृदयचिन्ताविषयीभूतोऽर्थः, यत् आह ब्रवीति, मन्मुखं मम वदनमेव अध्वा तस्मिन् मार्गेण, विनिर्यत्, तत् वाक्यम्, आकर्णय शृणु इति आलपत् उक्तवती।

अत्र वृत्त्यनुप्रासोऽलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः।

विनिर्यदिति विनिःपूर्वात् इणधातोः शतृङि "इणो यण्" इति य आदेशः ॥३०॥

বাঙ্গালা—দময়ন্তী এই কথা বলিয়াই অবনতমুখী হইয়া, কাণের নিকটে মুখ ... কোন সখীকে বলিলেন, তাহার পর সেই সখী রাজাকে বলিল "লজ্জাবশতঃ ইনি মনের ভিতরে প্রবেশ করিয়া যাহা বলিতেছেন, তাহাই আমার মুখের দিয়া নির্গত হইতেছে; আপনি তাহা শুনুন' ॥৩০॥

---

(१) ... नताननया तथा।

विभेमि चिन्तामपि कर्त्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा ।
मृणालतन्तुच्छिदुरा सतीस्थितिः लवादपि त्रुट्यति चापलात् किल ॥३१॥
ममाशयः स्वप्नदशाश्रयापि वा नलं विलङ्घ्येतरमस्पृृद्यदि ।
कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥३२॥
अपि स्वमस्वप्नमसुव्ययक्षमो परस्य दाराननवैतुमेव माम् ।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदापि तादृशीम् ॥३३॥

अन्वयः—चिराय चित्तार्पितनैषधेश्वरा (अहम्) ईदृशीं चिन्तां कर्त्तुम् अपि विभेमि । मृणाल-तन्तु-च्छिदुरा सतीस्थितिः लवात् अपि चापलात् किल त्रुट्यति ॥३१॥

किमालपदित्याह—विभेमीति । चिराय दीर्घकालादवधि, चित्ते अर्पितः पतित्वेन स्थापितः नैषधेश्वरो निषधदेशाधिपतिर्नलो यया सा तादृशी अहम्, ईदृशीम् इन्द्रादीनां देवानामन्यतमो मया वरणीयो नवा एवम्भूताम्, चिन्तां विचारम्, कर्त्तुमपि विभेमि व्यभिचारपापात् त्रस्यामि, किमुत निश्चयं कर्त्तुमित्यपेराशयः, "पतिं या नाभिचरति मनोवाक्कायकर्मभिः" इति स्मृतेः । तत्र हेतुमाह मृणालेति । मृणालस्य तन्तुवत् सूत्रवत् छिदुरा स्वल्पकारणादपि स्वयमेव छिद्यमाना अतीवकोमलेत्यर्थः, सतीस्थितिः साध्वीमर्यादा, लवादपि अल्पानादपि, चापलात् चाञ्चल्यात् किल परपुरुषचिन्तादिनावादेवेत्यर्थः, त्रुट्यति क्षीयते ।

अत्र मयं प्रति चित्तार्पितनैषधेश्वरेतिपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, मृणालतन्तुच्छिदुरेति लुप्तोपमा चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । माधुर्यं गुणः, वैदर्भी च रीतिः ।

निषधानामधिपतिरिति नैषधः स चासौ ईश्वरश्चेति नैषधेश्वरः ॥३१॥

বাঙ্গালা—আমি অতিদীর্ঘকাল হইতেই নলকে মনের ভিতরে পতিরূপে স্থাপন করিয়া আসিতেছি, সুতরাং এরূপ চিন্তা করিতেও ভয় করি। কারণ, মৃণালসূত্রের ন্যায় অত্যন্ত কোমল পতিব্রতার নিয়ম, অত্যন্ত অল্প চাঞ্চল্যেও নষ্ট হইয়া থাকে ।৩১।

অন্বয়ঃ—মম আশয়ঃ স্বপ্নদশাশ্রয়া অপি নলং বিলঙ্ঘ্য ইতরং যদি বা অস্পৃশত্, তত্র বিবুধৈঃ समस्तसाक्षिणी निजा एव बुद्धिः कुतः पुनः न पृच्छ्यते ॥३२॥

ननु परपुरुषचिन्तामपि न करोषीत्यत्र किं नाम प्रमाणमित्याह— ममेति । मम आशयो मनः, जागरितदशायाः का कथा, स्वप्नदशायां स्वप्नावस्थायां आश्रया आर्द्रेणापि, नलं विलङ्घ्य अतिक्रम्य, इतरमन्यं पुरुषम्, यदि वा अस्पृशत् कस्मिन्नुद्रवान् भावितवानित्यर्थः, तत्र तदा, विबुधैरिन्द्रादिभिर्देवैः, समस्तसाक्षिणी देवानामन्तर्यामित्वात् सर्वविषयदर्शिनी, निजा स्वकीया स्वकीयैव बुद्धिः, कुतः कथं पुनर्न पृच्छ्यते । तदात्वे स्वस्वबुद्धिरेव साक्ष्यं दास्यति यत् अस्या मनः परपुरुषचिन्तामपि न करोतीति । अत इन्द्रादयस्तनो वरणीया न वेति विचारं कथं कर्त्तुं शक्नुयामिति भावः ।

अत्र प्रसादो गुणः, वैदर्भी च रीतिः ।

"आशयः स्यादभिप्राये मानसाधारयोरपि" इति विश्वः ॥३२॥

বাঙ্গালা—আমার মন স্বপ্ন-অবস্থাতেও যদি নলকে পরিত্যাগ করিয়া অন্য পুরুষকে স্পর্শ করিয়া থাকে; তবে দেবতারা সমস্ত বিষয়ের সাক্ষিস্বরূপা নিজ নিজ বুদ্ধিকে কেন জিজ্ঞাসা করেন না ।৩২।

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा।
घनाम्बुना राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते॥३६॥
स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग् वितरीतुमुत्तरम्।
तदत्र मद्भाषित-सूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते॥३७॥

अन्वय—अपि [illegible] मे प्रतिश्रुतं [illegible], [illegible] चेत् [illegible] न पीडयेत् तत् [illegible] इन्धन [illegible] कारिता निजायुषः [illegible] करवै॥३५॥

अपीति। [illegible] पूर्वं [illegible]। [illegible] इति [illegible]। [illegible] मे मम, प्रतिश्रुतं [illegible], [illegible]। किं [illegible] चेत् यदि, [illegible] न पीडयेत् केनापि कारणेन न [illegible], तत् तदा, [illegible] इन्धनेन [illegible] कारिता [illegible], निजायुषः [illegible] करवै करिष्यामि, [illegible] करिष्याम्येवेत्यर्थः।

अत्र [illegible]। [illegible], वैदर्भी च रीतिः।

करवै इत्यनुमतौ पञ्चमी [illegible]॥३५॥

বাঙ্গালা—আরও আপনি আমার [illegible] প্রতিজ্ঞা শুনুন, [illegible] যদি [illegible] পাণি গ্রহণ না করেন, তাহা হইলে অগ্নি প্রবেশ, উদ্বন্ধন, কিম্বা [illegible] দ্বারা [illegible] নিজের আয়ুর [illegible] নিজেই করিব॥৩৫॥

अन्वयः—आपदि निषिद्धम् अपि आचरणीयम्, यत्र सती क्रिया सर्वथा न अवति। [illegible] घनाम्बुना पिच्छिले (सति) [illegible] अपि क्वचित् अपथेन गम्यते॥३६॥

मनु "[illegible] ते लोका [illegible]।
[illegible]"

इति [illegible]

[illegible]

বাঙ্গালা—[illegible]

निरस्य दूतः स्म तया विसर्ज्जितः प्रियोक्तिरप्याह्व वादुणामचरम् ।
कुतूहलेनैव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥२८॥
अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धनमेति किञ्च तं स वाञ्छदाढ्यं घटयन्निरस्यति ॥२९

अन्वयः—स्त्रिया मया जातु [illegible] तेषु सम्यक् उत्तरं वितरीतुं न शकितं । तत् [illegible] सूक्ष-पद्धतौ मे प्रवन्धृता अस्तु (किन्तु) प्रतिबन्धृता न ॥२७॥

[illegible]

[illegible]

अनुग्रहादेव दिवौकसां नरः निरस्य मानुष्यकमेति दिव्यताम् ।
अयोऽधिकारे [१] स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥४२॥

अन्वयः—मानवी दिवौकसः न कामयते, (मया) तव आननात् इदं नवीनम् श्रुतम् । गुरुणा अपि एष ते दुर्ग्रहदोषः कथं वा न शम्यते ॥४१॥

दिवौकसमिति । मानवी मानवस्त्री, दिवौकसः देवताम्, न कामयते नाभिलषति, मया तव मुखात्, इदं नवीनं नूतनम्, श्रुतम् । अधमा स्त्री उत्तमं पुरुषं न कामयत इत्यपूर्वमेवेति हितेन हिताकाङ्क्षिणा, गुरुणापि पित्रादिना गुरुजनेनापि, एष ते तव, दुर्ग्रहदोषो दुर्बुद्धिदोषः, कथं हेतुना वा, न शम्यते उपदेशादिना नापनीयते । तदप्यपूर्वमित्याशयः । किञ्च, दुर्ग्रहदोषः शनैश्चरादिसूचितारिष्टादिदोषः, हितेन केन्द्रित्वात् हितकारिणा, गुरुणापि बृहस्पतिनापि, कथं वा न शम्यते नाप... "किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्री बृहस्पतिः" इति ज्योतिर्वचनात् केन्द्रिणा बृहस्पतिना सर्वदोषशमनस्य तदशमननाश्चर्यमेवेति च शब्दशक्तिमूलो वस्तुध्वनिः ।

अत्र देवत्वरूपे कारणे सत्यपि तत्कामनारूपफलाभावात् विशेषोक्तिरलङ्कारः रेफे कानुप्रासेन स उच्यते । रचनावशान्माधुर्यं गुणः, वैदर्भी च रीतिः ।

शम्यत इति शमधातोरिनि "शमोऽदर्शने" इति सानुबन्धत्वात् ह्रस्वः ॥४१॥

বাঙ্গালা—মানবী দেবতাকে কামনা করে না ইহা আপনার মুখ হইতে নূতন শুনিলাম। আপনার এই দুর্বুদ্ধিদোষটাকে হিতৈষী গুরুজনেরাই বা কেন দূর করেন না! ॥৪১॥

अन्वयः—नरः दिवौकसाम् अनुग्रहात् एव मानुष्यकं निरस्य दिव्यताम् एति । सिद्धरसस्पृशाम् अयसाम् अपि अयोऽधिकारे कुतः स्वरितत्वम् इष्यते ॥४२॥

अनुग्रहादिति । नरो मनुष्यः, दिवौकसां देवानाम्, अनुग्रहात् प्रसादादेव, मानुष्यकं मनुष्यत्वम्, निरस्य परि... दिव्यतां देवत्वम्, एति प्राप्नोति । अतस्त्वमपि इन्द्रादीनामन्यतमस्य वरणेन तदनुग्रहात् देवत्वं प्राप्स्यसीति मन्यतममेव वृणीष्वेति भावः । ननु तथात्वेऽपि प्रभावेन देवत्वसम्भवेऽपि वस्तुतो मनुष्यत्वान्मनुष्यमध्य एव भविष्यामीत्याह अय इत्यादि । सिद्धरसम् औषधात्मरसः पक्वपारदः स्पृशन्तीति तेषाम् औषधात्मरसयुक्तमार्जितानामित्यर्थः, अयसां लौहानामपि, अयोऽधिकारे लौहप्रस्तावे, कुतः कथम्, स्वरितत्वम् ... लौहमध्ये गणितत्वमित्यर्थः, इष्यते लोके, अपि तु कुतोऽपिनेति तात्पर्यम् । तथा च औषधात्मरसयुक्त... सम्पर्केण स्वर्णीभूतं लौहमपि वस्तुतो लौहत्वे सत्यपि स्वर्णवर्णत्वात् यथा स्वर्णमध्य एव गण्यते, तथा सम्पर्केण देवीभूता त्वमपि वस्तुतो मनुष्यत्वे सत्यपि देवतुल्यप्रभावात् देवीमध्य एव गण्या भविष्यसीति इन्द्रा... मन्यतमवरणमेव तव श्रेय इत्याशयः ।

अत एवात्र समर्थसमर्थकयोः अयोरपि सामान्यत्वात् दृष्टान्तः अलङ्कारः, न पुनरर्थान्तरन्यासः... धर्मो सामान्यविशेषभावनियमात्, नरो निरस्येति च कानुप्रासेन तयोः संसृष्टिः । तथा नरपदेन ... मनुष्यकपदाभिधानात् पूर्वार्द्धं अप्रयुक्तत्वादोषः, "स्वर आक्षेपे" इति स्वरधातोरार्थे पाठे सत्यपि स्वरित... तदर्थं कविभिरप्रयोगात् परार्द्धं अप्रयुक्तत्वादेषः । तयोः समाधानाय द्वितीयतृतीयपदयोरित्थं पाठो वि...

[१] अयोऽधिकारे ।

हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषित्रुवा [१] कथम्।
उपेक्षितेक्षोः करभाक्रमोरतात् उरुं वदे त्वा करभोरु भो इति [२] ॥४३॥

विहाय हा सर्वसुपर्वनायकं त्वया धृतः किं नरसाधिमस्मरः।
सुखं विमुच्य स्वसितस्य धारया ब्रवैव नासापथधावनव्रमः ॥४४॥

'निरस्त तत्त्वं समुपैत दिव्यताम्, यथोऽधिकारे गदना विधीयते'। अत्र पाठे तत्त्व नरत्वं निश्चयं। दन्त्यदेश दुरुक्तत्वादीश्ये गुणः, गौडी च रीतिः।

लिङ्गलत्वमर्थमिति "स्पृशोऽनुदके" इति क्विप् ॥४२॥

বাঙ্গালা—মহৎ, দেবতাদের অনুগ্রহেই মনুষ্যত্ব পরিত্যাগ করিয়া দেবত্ব লাভ করিয়া থাকে। কারণ, পারার সংস্পর্শে লৌহ সোনা হইয়া গেলে, সে লোহাকে [illegible] করিয়া লোহার মধ্যে অন্তর্ভুক্ত করিবার ইচ্ছা করা যায় ॥৪২॥

अन्वयः—विदुषित्रुवा (त्वं) हरिं परित्यज्य नलाभिलाषुका (सती) कथं वा न लज्जसे। भो करभोरु। इति उपेक्षितेक्षोः करभोरतात् करभात् त्वाम् उरु वदे ॥४३॥

हरिमिति। विदुषीं आत्मानं ब्रवीतीति विदुषित्रुवा पण्डितमन्या त्वम्, हरिमिन्द्रम्। [illegible] परित्यज्य, नलं नरनामकं राजानम्। [illegible] लषितुं शीलमस्या इति नलाभिलाषुका सती, कथं वा न लज्जसे। [illegible] [illegible] इति [illegible]। करभो करिशावकविव [illegible] [illegible] [illegible] [illegible]

[illegible]

বাঙ্গালা—[illegible]

अन्वयः—[illegible]

तपोऽनले जुह्वति सूरयस्तनूः दिवे फलायान्यजनुर्भविष्णवे ।
करे पुनः कर्षति सैव विह्वला बलादिव त्वां बलसे न बालिशे ! ॥४५॥
यदि स्वमुद्बन्धुमना विना नलं भवेर्भवन्ती हरिरन्तरिच्छगाम् ।
दिविस्थितानां प्रथितः पतिस्ततः हरिष्यति न्याय्यमुपेक्षते हि कः ॥४६॥

আপনার দুঃখ সাদৃশ্য নাশ করিতে পারিবেন? (কখনই না)। কারণ, [illegible] আরাধক তিনি [illegible] হইবেন ॥১৪৬॥

अन्वयः—(हे मातेः!) प्रसीद, स्वमरान् मनोभुवे यच्छ, धृत-कौसुमाशुगः स तैः मां हन्तु। अहं त्वदेकचित्ता असून् विमुञ्चती (सती) त्वम् एव भूत्वा द्यवत् तं जयानि ॥१४६॥

[illegible] हे मातेः। प्रसीद, स्वमरान् निजशीघ्रगमनवाणान्, मनोभुवे कामाय, यच्छ देहि, [illegible] कुसुममयबाणो [illegible] मां [illegible] पीडयन्नेव न [illegible] तत्र ते किं नाम [illegible] अहं त्वयि एकनिष्ठतया चित्तं यस्याः सा त्वदेकचित्ता, असून् प्राणान्, विमुञ्चती [illegible] ततो मरणानन्तरं त्वम् एव भूत्वा, द्यवत् [illegible] [illegible] जयानि । [illegible]

[illegible] पूर्वं [illegible] इव, [illegible] इव, वैदर्भी च [illegible] ।

[illegible]

[illegible]

[illegible]

[illegible]

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोम्मृजाम्।
त्वदास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः॥१४५॥

तौ विधुस्मरौ, मम वधे, कुतः कथम्, कृतप्रतिज्ञौ जातौ, तयोस्तु तापदानारम्भादित्यभिप्रायः। स्वयमेव समाधत्ते—अहं तव सम्बन्धिनी, इति मनसि कृत्वा यदि तौ मम वधे कृतप्रतिज्ञौ जाताविति सम्बन्धः; तत्तदा, मया जितम् उत्कर्षं प्राप्तम्। कथमित्याह यतः अमरा देवाः, मोघं व्यर्थं सङ्कल्पं मनोभावं धरन्तीति ते तादृशाः, न भवन्ति। किलेति लोकवार्तायाम्। तथा च देवा यद्यत् सङ्कल्पयन्ति तत्तदेव भवति। तेन देवावेव विधुस्मरौ मां तव पत्नीं सङ्कल्प्य मम वधे यदि कृतप्रतिज्ञौ जातौ, तदाहमवश्यमेव तव पत्नी भविष्यामीति मया जितमेवेति भावः।

अत्र "प्रस्तुतानामेकधर्मान्वये तुल्ययोगिता" इत्युक्तत्वात् प्रस्तुतयोरेव विधुस्मरयोर्जितत्वरूपक्रियया सह कर्तृतयाभिसम्बन्धात् तुल्ययोगिता, रिपोर्नलस्य प्रतिकारकरणाशक्ताभ्यां विधुस्मराभ्यां कृतया नलसम्बन्धिन्यां भैम्यां प्रति वधप्रतिज्ञाया नलस्योत्कर्षसाधकत्वात् प्रत्यनीकम्, जितं मयेत्यस्यार्थं प्रति चतुर्थपादवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां च सृष्टिः। पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः।

"प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि। तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः।" इति दर्पणे—प्रत्यनीकलक्षणम् ॥१४४॥

বাঙ্গালা—প্রিয়তম। আপনি মুখ দ্বারা চন্দ্রকে এবং কান্তি দ্বারা কামদেবকে জয় করিয়াছেন, কিন্তু তাঁহারা আমার বধে প্রতিজ্ঞা করিলেন কেন? তবে, 'আমি আপনার' ইহা মনে করিয়া যদি তাঁহারা আমার বধে প্রতিজ্ঞা করিয়া থাকেন, তাহা হইলে আমারই জয় হইয়াছে। কেন না, দেবতারা ব্যর্থ সঙ্কল্প ধারণ করেন না ॥১৪৪॥

অন্বয়:—विधुः निजांशु-निर्दग्ध-मदङ्ग-भस्मभिः मुधा लाञ्छनोन्मृजां वाञ्छति। (यतः सः) तावता अपि किं त्वदास्यतां यास्यति? (येन हि सः) वधू-वधेन एव पुनः कलङ्कितः (भवेत्) ॥१४५॥

निजांश्विति। विधुश्चन्द्रः, निजांशुभिः स्वकीयकिरणैः निर्दग्धानि यानि मदङ्गानि तेषां भस्मभिः करणैः, मुधा व्यर्थम्, लाञ्छनस्य स्वकीयकलङ्कस्य उन्मृजां मार्जनम्, वाञ्छति इच्छति। चन्द्रः खलु कलङ्कितया तव मुखसादृश्यं न प्राप्तः, तेनायमिदानीं स्वकीयकिरणैर्मां दग्ध्वा तद्भस्मभिस्तु निजकलङ्कं मार्जयितुमिच्छति तदर्थमेवेत्यर्थः। कुत एतदित्याह—यतः स चन्द्रः, तावतापि मदङ्गभस्मभिः स्वकलङ्कमार्जनेनापि किं त्वदास्यतां तव मुखतां तव मुखसादृश्यमित्यर्थः, यास्यति प्राप्स्यति; अपि तु कथमपि नेत्यर्थः। येन हि स विधुः, वधूवधेनैव मत्स्वरूपस्त्रीहत्ययैव, पुनरपि, कलङ्कः अपवाद एव कलङ्कश्चिह्नमस्य सञ्जात इति कलङ्कितो भवेत्।

अत्र विधोस्तया लाञ्छनोन्मृजावाञ्छनासम्बन्धेऽपि तदसम्बन्धादतिशयोक्तिः, त्वदास्यता त्वदास्यसादृश्यमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना, अपवादचिह्नयोर्भेदेऽपि कलङ्कपदश्लेषेण तयोरभेदाध्यवसायादपरा चातिशयोक्तिः, विरलनलाञ्छनोन्मृजावैफल्यात् लाञ्छनान्तरप्राप्तेर्विषमालङ्कारः, छेकानुप्रासश्चेत्येतेषां च सृष्टिः। पूर्वरागो रसः, माधुर्यं गुणः, वैदर्भी च रीतिः ॥१४५॥

বাঙ্গালা—চন্দ্র, নিজ কিরণ দ্বারা আমার সমস্ত অঙ্গ দগ্ধ করিয়া, সেই ভস্মদ্বারা অনর্থক তাঁহার কলঙ্ক মুছিয়া ফেলিবার ইচ্ছা করিতেছেন। কেন না, তাহাতেও কি তিনি

प्रसीद यच्छ स्वशरान् मनोभुवे स हन्तु मां तैर्धृतकौसुमाशुगः ।
त्वदेकचित्ताहमसून् विमुञ्चती त्वमेव भूत्वा तद्वज्जयानि तम् ॥१४६॥
स्तुतिः सुराणां गुणगायनी यदि त्वदङ्घ्रिमग्नस्य जनस्य किं ततः ।
स्तवैः रवेरप्सु कृताप्लवैः कृते न मुद्वती जातु भवेत् कुमुद्वती ॥१४७॥

আপনার মুখের সাদৃশ্য লাভ করিতে পারিবেন? (কখনই না)। কারণ, ঐরূপ করাইলে আবারও তিনি কলঙ্কিত হইবেন ।১৪৫।

अन्वयः—(हे प्राणेश !) प्रसीद, स्वशरान् मनोभुवे यच्छ, धृत-कौसुमाशुगः स तैः मां हन्तु । अहं त्वदेकचित्ता असून् विमुञ्चती (सती) त्वम् एव भूत्वा तद्वत् तं जयानि ॥१४६॥

प्रसीदेति । हे प्राणेश ! प्रसीद, स्वशरान् निजलौहमयबाणान्, मनोभुवे कामाय, यच्छ देहि ; धृतां कौसुमां कुसुममयाः आशुगा बाणा येन स तथोक्तः । अतएव तैः कुसुममयैर्बाणैर्मां केवलं पीडयत्येव न पुनर्निःशेषतो हन्तुमर्हतीति भावः । स कामः, तैः त्वद्दत्तलौहमयबाणैः, मां हन्तु निःशेषतो मारयतु । ननु तेन ते किं नाम फलमित्याह अहं त्वयि एकमेकतानं चित्तं यस्याः सा त्वदेकचित्ता, असून् प्राणान्, विमुञ्चती परित्यजन्ती सती, परजन्मनि त्वमेव भूत्वा, तद्वत् त्वमिव, सौन्दर्यादिभिस्तं कामम्, जयानि । एतेनात्मानं प्रति कामस्य महीयानत्याचारः, कामं प्रति चात्मनो महीयानाक्रोशः, मरणेऽपि नलं प्रत्यात्मनः स्वैकान्तानुरागश्च सूचितः ।

अत्र तद्वदिति श्रौतोपमालङ्कारः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।

मरणकाले चिन्त्यमानस्य पदार्थस्य परजन्मनि प्राप्तिमाह भगवद्गीतायाम्—

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः ॥१४६॥

বাঙ্গালা—প্রাণেশ্বর ! প্রসন্ন হউন, আপনি আপনার লৌহময় বাণগুলি কামদেবকে দান করুন ; পুষ্পময়বাণধারী সেই কামদেব আপনার প্রদত্ত সেই লৌহময় বাণ দ্বারা আমাকে বধ করুন । আমি আপনার প্রতি একাগ্রচিত্ত অবস্থায় প্রাণত্যাগ করিয়া, পরজন্মে আপনি হইয়া তুল্য ভাবে সেই কামদেবকে জয় করিব ।১৪৬।

अन्वयः—स्तुतिः यदि सुराणां गुणगायनी (वर्तते, तदा) ततः त्वदङ्घ्रिमग्नस्य जनस्य किम् ? । अप्सु कृताप्लवैः स्तवैः रवेः कृते (सति), कुमुद्वती जातु मुद्वती न भवेत् ॥१४७॥

ननु सर्व देवोऽपि देवानेव स्तौति तत् कथं तानपहाय मानुषमात्रे मयि त्वमनुरक्तासीत्याह स्तुतिरिति । स्तुतिः "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिवेदः, यदि सुराणामिन्द्रादीनां देवानाम्, गुणानां गायनी कीर्तनकारिणी इति गुणगायनी गुणकीर्तनपरायणा वर्तते, तदा ततः गुणगानात्, तव अङ्घ्रौ चरणे मग्नस्य तदेकानुरक्तस्य निविष्टस्य, जनस्य मनुष्यरूपस्य लोकस्य, किं भवति ? अपि तु किमपि नेत्यर्थः । यदाहि अप्सु जले, कृताप्लवैः सन्ध्यावन्दनार्थं कृतस्नानैर्जनैः, रवेः सूर्यस्य, स्तवैः सूर्योपस्थानादिरूपैः स्तोत्रैः कृते सति, कुमुद्वती चन्द्रं विना अन्यानुरक्ता कुमुदिनी, जातु कदाचिदपि, मुद्वती आनन्दवती, न भवेत् । तथा च यदा रवेः स्तवे कृते न कुमुद्वत्या ह्रदयगताऽऽनन्दः, तदा देवैः देवानां गुणगाने कृते तान् प्रति ममोदासीनस्य नानुरागः इति भावः ।

अत्रवाक्यद्वयार्थयोः सादृश्ये दृष्टान्तालङ्कारः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।

गायनीति "ण्युट् च" इति गायतेः स्त्रियां ण्युट् प्रत्ययः ।१४७।

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोम्मृजाम् ।
त्वदास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः ॥१४५॥

तौ विधुस्मरौ, मम वधे, कुतः कथम्, कृतप्रतिज्ञौ जातौ, तयोर्न तापदानारम्भादित्यभिप्रायः । स्वयमेव समाधत्ते—अहं तव सम्बन्धिनी, इति मनसि कृत्वा यदि तौ मम वधे कृतप्रतिज्ञौ जाताविति सम्बन्धः ; तत्तदा, मया जितम् सर्वोत्कर्षेण स्थितम् । कथमित्याह यत, अमरा देवा, मोघं व्यर्थं सङ्कल्पं मनोभावं धरन्तीति ते तादृशाः, न भवन्ति । त्रिलिति लोकवार्तायाम् । तथा च देवा यद्यत् सङ्कल्पयन्ति तत्तदेव भवति । तेन देवावेव विधुस्मरौ मां तव पत्नीं सङ्कल्प्य मम वधे यदि कृतप्रतिज्ञौ जातौ, तदा जन्मान्तरेऽवश्यमेव तव पत्नी भविष्यामीति मया जितमेवेति भावः ।

अत्र "प्रस्तुतानामप्रस्तुतानां वा तुल्यधर्माभिसम्बन्धे तुल्ययोगिता" इत्युक्तत्वात् प्रस्तुतयोरेव विधुस्मरयोर्जितत्वे एकक्रियया सह कर्मतयाभिसम्बन्धात् तुल्ययोगिता, रिपोर्नलस्य प्रतिकारकरणासमर्थाभ्यां विधुस्मराभ्यां कृताया नलसम्बन्धिन्यां भैम्यां प्रति वधप्रतिज्ञाया नलस्योत्कर्षसाधकत्वात् प्रत्यनीकम्, जितं मयेत्यस्यार्थं प्रति चतुर्थपादस्य वाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां च सृष्टिः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।

"प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि । तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ।" इति दर्पणे—प्रत्यनीकलक्षणम् ॥१४४॥

বাঙ্গালা—প্রিয়তম ! আপনি মুখ দ্বারা চন্দ্রকে এবং কান্তি দ্বারা কামদেবকে জয় করিয়াছেন, কিন্তু তাঁহারা আমার বধে প্রতিজ্ঞা করিলেন কেন ? তবে, 'আমি আপনার' ইহা মনে করিয়া যদি তাঁহারা আমার বধে প্রতিজ্ঞা করিয়া থাকেন ; তাহা হইলে আমারই জয় হইয়াছে । কেন না, দেবতারা ব্যর্থ সঙ্কল্প ধারণ করেন না ॥১৪৪॥

অন্বয়ঃ—विधुः निजांशु-निर्दग्ध-मदङ्ग-भस्मभिः मुधा लाञ्छनोम्मृजां वाञ्छति । (यतः स.) तावता अपि किं त्वदास्यतां यास्यति ? (येन हि स.) वधू-वधेन एव पुनः कलङ्कितः (भवेत्) ॥१४५॥

निजांश्विति । विधुश्चन्द्रः, निजांशुभिः स्वकीयकिरणैः निर्दग्धानि यानि मदङ्गानि तेषां भस्मभिः करणैः, मुधा व्यर्थम्, लाञ्छनस्य स्वकीयकलङ्कस्य उन्मृजां मार्जनम्, वाञ्छति इच्छति । चन्द्रः खलु कलङ्कितया तव मुखसादृश्यं न प्राप्तः ; तेनायमिदानीं स्वकीयकिरणैर्मां दग्ध्वा तद्भस्मभिः तु निजकलङ्कं मार्जयितुमिच्छति तदर्थमेवेत्यर्थः । कुत एतदित्याह—यतः स चन्द्रः, तावतापि मदङ्गभस्मभिः स्वकलङ्कमार्जनेनापि किं त्वदास्यतां तव मुखतां तव मुखसादृश्यमित्यर्थः, यास्यति प्राप्स्यति ; अपि तु कथमपि नेत्यर्थः । येन हि स विधुः, वधूवधेनैव स्त्रीहत्ययैव, पुनरपि, कलङ्कः अपवाद एव कलङ्कचिह्नमस्य सञ्जात इति कलङ्कितो भवेत् ।

अत्र विधोस्तया लाञ्छनोन्मृजावाञ्छनासम्बन्धेऽपि तत्सम्बन्धाभिधानादतिशयोक्तिः, त्वदास्यता त्वदास्यसादृश्यमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना, अपवादचिह्नयोर्भेदेऽपि कलङ्कपदेनैव तयोरभेदाध्यवसायादपरा चातिशयोक्तिः, चिरन्तनलाञ्छनोन्मृजावैफल्यात् लाञ्छनान्तरप्रापणयोत्पत्तेश्च विषमालङ्कारः, छेकानुप्रासश्चेति तेषां च सृष्टिः । पूर्वरागो रसः, माधुर्यं गुणः, वैदर्भी च रीतिः ॥१४५॥

বাঙ্গালা—চন্দ্র, নিজ কিরণ দ্বারা আমার সমস্ত অঙ্গ দগ্ধ করিয়া, সেই ভস্মদ্বারা অনর্থক তাঁহার কলঙ্ক মুছিয়া ফেলিবার ইচ্ছা করিতেছেন। কেন না, তাহাতেও কি তিনি

तवास्मि मां घातुकमप्युपेक्षसे मृषामरं हा मरगौरवात् स्मरम्।
अवेहि चाण्डालमनङ्गमङ्ग ! तं स्वकाण्डकारस्य मधोः सखा हि सः ॥१५०॥
लघौ लघावेव पुरः परे बुधै-र्विधेयमुक्तं जनमात्मतेजसः।
तृणे तृणेढि ज्वलनः खलु ज्वलन् क्रमात् करीषद्रुमकाण्डमण्डलम् ॥१५१॥

বাঙ্গালা—ইন্দ্রের বজ্রের ভয় হইতেও রক্ষা করারূপ অস্ত্রধারিগণের যে ব্রত আছে এবং যে ব্রত, স্ত্রী বা পুরুষ সমস্ত রক্ষার্থীর প্রতিই সাধারণভাবে প্রযুক্ত হইয়া থাকে; আপনার সেই মহাব্রত নষ্ট হইয়া গিয়াছে। কেন না, আপনি কামদেবের পুষ্পময় বাণ হইতেও আমাকে রক্ষা করিতেছেন না ॥১৪৯॥

अन्वयः—अस्मि तव, हा अमरगौरवात् मां घातुकम् अपि मृषा अमरं स्मरम् उपेक्षसे। अङ्ग ! तम् अनङ्गं चाण्डालम् अवेहि; हि सः स्वकाण्डकारस्य मधोः सखा ॥१५०॥

तवेति। अस्मि अहं तव त्वदीयैव। तथापि हा कष्टम्, अमरगौरवात् देवत्वाभिमानेन पूज्यत्वज्ञानात्, मां घातुकं हन्तारमपि, मृषामरं नियतमकार्यकारित्वात् मिथ्यादेवम्, स्मरं कामम्, उपेक्षसे, न खल्वेतदुचितं त्वादृशेन वीरेणेति भावः। ननु देववधे महदेव पापं भवेदित्याह—अङ्ग ! हे महावीर! तमनङ्गं कामम्, चाण्डालम्, अवेहि जानीहि। हि यस्मात्, सः अनङ्गः, स्वकाण्डान् निजपुष्पमयबाणान् करोतीति तस्य, मधोर्वसन्तस्य, सखा। तथा च तदानीं चाण्डाल एव बाणनिर्माताऽऽसीत्, पुष्पाणि च कामस्य बाणाः; तानि च वसन्तकाल एव करोति, तेन च वसन्तश्चाण्डालः, ततश्च कामोऽपि तस्य चाण्डालस्य वसन्तस्य सख्युः स सर्वचाण्डाल एव जात इति तद्वधे न गुरुतरं पापमित्याशयः।

अत्र अनङ्गचाण्डालयोर्भेदेऽपि तयोरभेदाध्यवसायाद् अतिशयोक्तिरलङ्कारः, स्वकाण्डकारस्येत्यत्र श्लेषानुप्राणितेन स सज्यते। पूर्ववदेव रसः, प्रसादो गुणः, वैदर्भी च रीतिः।

"काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु" इत्यमरः।

घातुकमिति "लषपतपद—" इत्यादिना उकञ्, तस्य च नित्यादित्वात् नामिन्द्रयं षष्ठीनिषेधात् द्वितीयैव। काण्डं करोतीति काण्डकारं कर्मण्यण् ॥१५०॥

বাঙ্গালা—আমি আপনারই, অথচ কাম আমাকে প্রহার করিতেছে; হায়! তথাপি আপনি দেবতার গৌরবে ঐ মিথ্যা দেবতাটাকে উপেক্ষা করিতেছেন!! হে মহাবীর! আপনি কামটাকে চণ্ডাল বলিয়াই জানুন। যে হেতু, সে কাম, নিজবাণনির্মাতা বসন্তের সখা ॥১৫০॥

अन्वयः—बुधैः पुरः लघौ लघौ एव परे आत्मतेजसः उपभोजनं विधेयम्। ज्वलनः खलु तृणे ज्वलन् [सन्] क्रमात् करीषद्रुमकाण्डमण्डलं तृणेढि ॥१५१॥

ननु अमरगौरवात् कामं नोपेक्षे किन्तु दुर्बलत्वादिकमेवाह लघाविति। बुधैर्धीमद्भिः, पुरः प्रथमम्, लघौ लघाविव क्षुद्रे क्षुद्र एव, परे शत्रौ, आत्मतेजसो निजप्रतापस्य, उपभोजनं प्रयोगम्, विधेयं कर्तव्यम्। यथाक्रमं महति महतीति भावः। तदेवाह ज्वलनस्तेजस्विना प्रथमं वर्तितव्यम्। उक्तमेव वाक्यान्तरेणाह। तृणे प्रथमं तृणादौ, ज्वलन् प्रदीप्तः सन् अग्निः, क्रमात् करीषाणां शुष्कगोमयानां द्रुमकाण्डानां वृक्षस्कन्धा-

सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्पता मयि ।
गिरापि वक्ष्यन्ति मखेषु तर्पणा-दिदं न देवा मुखलज्जयैव ते ॥१५२॥
व्रजन्तु ते तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे ।
न सर्वथा तानपि न स्पृशेद्दया न तेऽपि तावन्मदनस्त्वमेव वा ॥१५३॥

...मण्डलं समुद्रम्, तथैव दहति । तथाप्रबलोऽपि सर्वेषु कर्त्तव्यत्वात् दुर्बलोऽपि कामः प्रथमं जेतव्य एवेति भावः ।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासेन च युज्यते । पूर्वरागो रसः, माधुर्यं गुणः, वैदर्भी च रीतिः ।

व्रणद्धीति "व्रण छि सायाम्" इति रुधादिगणधातोर्वर्त्तमानायाः प्रथमपुरुषैकवचने रूपम् ॥१५१॥

বাঙ্গালা—বুদ্ধিমান্ বীরগণ প্রথমে ক্ষুদ্র ক্ষুদ্র শত্রুর উপরেই আপন প্রতাপের উন্মেষনা করিবেন। দেখুন—অগ্নিও প্রথমে তৃণে প্রজ্বলিত হইয়া, ক্রমে বৃক্ষ বেশময় এবং সাগরের শুষ্কি দগ্ধ করিয়া থাকেন ॥১৫১॥

अन्वयः—स्वयंवरायां मयि [या] अनुकम्पता, अयं तव कियान् वा सुरापराधः । ते देवाः मखेषु तर्पणात् मुखलज्जया एव गिरा अपि इदं न वक्ष्यन्ति ॥१५२॥

"दिवस्तु ते दक्षमखे समागताः" इति कलिकातापुस्तकीयपाठः [illegible] । स्वयंवरायां ... मयि, या तव अनुकम्पता दयालुता, अयं तव कियान् वा, सुरेषु इन्द्रादिषु देवेषु अपराधः, अपि तु कियानपि न अतीवस्वल्प इत्यर्थः । तथा न ... तान् देवान् प्रत्याख्याय ... तेन ... नैव ... अपराधो भविष्यतीति । किन्तु भवान् तथा निमित्तमेव मामनुकम्प्य तत्र ... केवल ... पूरयतीति ... तदापराध इति न ... कर्त्तव्यमिति भावः । अत्र [illegible]

[illegible]

বাঙ্গালা—[illegible]

[illegible]

इतीयमालेख्यगतेऽपि वीचिते त्वयि स्मरव्रीड़समस्यया नया ।
पदे पदे मौनमयान्तरोपिणी प्रवर्त्तिता सारवसारसाविनी (१) ॥१५४॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किन्नु छत्ताङ्गुलीकः ।
ज्ञात्वा मित्रं मधुमधिवनस्थानमन्तश्चरित्वा
सख्याः प्राणान् हरति हरितस्त्वद्वयस्त्वज्ज्वुपन्तान् ॥१५५॥

भाव । अथ तेषु दया आगच्छेदित्यत्र किं प्रमाणमित्याह दया तानपि देवान्, सर्वदा न स्पृशेत् न सम्बध्नी-यादिति न, अपि तु ममानुनयादिना सर्वथा स्पृशेदेवेत्यर्थः । यत ते देवा मदनो निर्दयः कामोऽपि तावन्न भवन्ति, या कि वा त्वमेव निर्दयो नल एवापि न भवन्ति ।

अत्र तृतीयपादार्थं प्रति चतुर्थपादवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः । पूर्ववत् रस, प्रसादो गुणः, वैदर्भी च रीतिः ॥१५३॥

বাঙ্গালা—সে দেবতারাও বরং স্বয়ংবরসভায় আগমন করুন, আমি তাঁহাদিগকে প্রসন্ন করিয়াই আপনাকে বরণ করিব। তাঁহাদের আমার প্রতিও সর্ব প্রকারেই দয়া আসিবে না, ইহা হইতে পারে না। কারণ, সে দেবতারা ত কামদেবও নহেন, কিম্বা আপনিও নহেন ।১৫৩।

अन्वयः—(हे नल ।) आलेख्यगते अपि त्वयि वीक्षिते (सति) स्मरव्रीडसमस्यया अनया इयं पदे पदे मौनमयान्तरोपिणी इव सारव सार साविनी प्रवर्त्तिता ॥१५४॥

इतीति । हे नल । आलेख्यगतेऽपि पटादौ चित्रितेऽपि त्वयि, वीक्षिते दृष्टे सति, स्मरव्रीडाभ्यां [illegible] समस्या-[illegible]-समस्यया कदाचित् कामवशा कदाचित् लज्जावशा [illegible], अनया [illegible], इति पूर्वोक्तप्रकारेण, पदे पदे मध्ये मध्ये [illegible] इत्यर्थः, मौनमयं मौनस्वरूपम् [illegible] [illegible] [illegible] रोपिणी इतीति मौनमयान्तरोपिणी इव नदीकल्पा, [illegible] [illegible] सारवाणि मधूनि तेषां [illegible] [illegible] [illegible] नदी, [illegible] प्रवर्त्तिता [illegible] ।

अत्र मौनमयेत्यादौ [illegible] [illegible], [illegible] [illegible] [illegible], [illegible] तथा [illegible] । पूर्ववत् रस, प्रसादो गुणः, वैदर्भी च रीतिः ।

"[illegible] [illegible]" इति वा ॥१५४॥

বাঙ্গালা—মহারাজ ! আপনাকে চিত্রিত অবস্থায় দেখিয়াও, ইনি [illegible] [illegible] [illegible] [illegible] [illegible] হইয়া, এই [illegible] [illegible] [illegible] [illegible] এই [illegible] [illegible] [illegible] নদী প্রবর্ত্তিত করিয়া থাকেন ।১৫৪।

अन्वय—[illegible] [illegible] ([illegible]) [illegible] ([illegible]) [illegible] [illegible] [illegible] [illegible] ([illegible]) [illegible] [illegible] [illegible] [illegible] । [[illegible]] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्राणान् हरति; हरित [illegible] [illegible] [illegible] ॥१५५॥

---

[१] [illegible] ।

अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् ।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥१५६॥

किञ्चित् सोल्लुण्ठनमाह चण्डाल इति । यो न स्पृश्यते, चण्डालत्वात्—अमङ्गलत्वेन स्पर्शनायोग्यत्वादिति भावः । न वा दृश्यते, वने लुक्कायितत्वात् अनङ्गत्वाद्वा आशयः । एतेन तत्कन्यान्तःपुरराक्षिपुरुषैः रक्षा निष्फलेति सूचितम् । स, विषमाः पञ्चसंख्यकत्वादयुग्माः भयङ्कराश्च विशिखा बाणा यस्य सः, अनङ्गः, कामः, त्वयि नले, जयति सौन्दर्य्येणोत्कृष्टे सति वीर्य्येण विजयमाने च सति, क्रुधा पुनर्नाशचेपप्रभृतिकामक्रोधात् तथादित्यादिव [illegible] यस्य स तथोक्तः, चण्डालः किन्नु स्यातः, अभिचारेण नृशंसकार्य्यकारित्वादित्यभिप्रायः । कथमेतदित्याह—यतः सः, अधिवने वनमध्ये स्थानं स्थितिर्यस्य तम्, वसन्तस्य चण्डालमित्रत्व च वनस्थितेः स्वाभाविकत्वादिति भावः, मधुं वसन्तं मधुनामकञ्च, मित्रं सहायम्, कृत्वा, अन्तर्दयाभ्यन्तरे गृहाभ्यन्तरे च, चरित्वा गत्वा, ते तव, सख्या दमयन्त्याः, प्राणान् हरति नाशयति । बालिकायाः प्राणहरणमेव अस्य सत्कार्य्यमिति भावः । हरितो दिशः, तत् चण्डालकर्तृकं त्वत्सखीप्राणहरणजनितम्, त्वदयशस्तव सुख्यातिम्, कुयशो त्वयि उपेक्षमाणे सेवन्तामाश्रयन्तामिति यावत् । इदमेव सोल्लुण्ठनं वाक्यम् । "उपकृतं बहु तत्र किमुच्यते" इत्यादिवत् विपरीतलक्षणया यशो नितान्तमेवायश इत्यर्थः । तथा च चण्डालेनानेन एतस्याः प्राणहरणे तव महती निन्दा दिक्षु विकीर्णा भविष्यति । अतः शीघ्रमेवैना रक्षणेन रक्षेति भावः । अन्यानि व्याख्यानान्तराणि सुधीभिर्विवेचनीयानि ।

अमानवे चण्डालस्य भयात् तत्समर्थनाद्ध्य गृह्नन्दे हालङ्कारः, तं प्रति च परवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, ईषत्सुग्रामस्येति स सृष्टिः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।

मन्दाक्रान्ता वृत्तम्—"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ ग-युग्मम्" इति लक्षणात् ॥१५५॥

বাঙ্গালা—যাহাকে স্পর্শ করা যায়না, দর্শনও করা যায় না, সেই বিষম শর কাম-দেব কি আপনি জয় করিলে পর হিংসাক্রুদ্ধ চণ্ডাল বলিয়া বিখ্যাত হইয়াছে? যে হেতু সে বনবাসী মধুকে সহায় করিয়া, ভিতরে গমনপূর্বক আপনার সখীর প্রাণ হরণ করিতেছে। এখন সমস্ত দিক্ আপনার সেই যশের সেবা করুক ॥১৫৫॥

অন্বয়ঃ—অথ স, জগতীপতিঃ অপত্রপয়া নতমৌলিঃ (সন্) ভীমভুবা এব রহ অভিহিতাং নিজাম্ অমরৈঃ সহ রাজসমাজগতিম্ অভ্যুপগত্য যযৌ ॥১৫৬॥

अथेति । अथ दूतीवाक्यानन्तरम्, स जगतीपतिर्भूपतिर्नलः, अपत्रपया लज्जया [illegible] नतमौलिरवनतमस्तकः सन्, भीमभुवा दमयन्त्यैव, रहो एकान्ते, अभिहितां भणितां [illegible] [illegible] आत्मनः [illegible], निजां स्वकीयाम्, अमरैरिन्द्रादिभिर्देवैः सह, राजसमाजे [illegible] गतिं गमनम्, अभ्युपगत्य अङ्गीकृत्य, ययौ इन्द्रादिसमीपं जगाम । एतेन भाव-[illegible] सूचितम् [illegible] ।

अत्र [illegible], [illegible] गुणः, वैदर्भी च रीतिः ।

तोटकं वृत्तम्—"इह तोटकमम्बुधिसैः प्रथितम्" इति लक्षणात् ॥१५६॥

বাঙ্গালা—তাহার পর, [illegible]

तदखिलमिह भूतं भूतगत्या जगत्याः
पतिरभिलपति स्म स्वात्मदूतत्वतत्त्वम् ।
त्रिभुवनजनयावद्वृत्तसाक्षात्कृतिज्ञ-
क्षतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥१५८॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१५९॥

—०—

अन्वयः—जगत्याः पतिः इह भूतम् अखिलं तत् स्वात्मदूतत्वतत्त्वम् भूतगत्या त्रिभुवन-जन यावद्वृत्त-वृत्तान्त साक्षात्-कृति-कृतिषु इन्द्रादिषु द्राक् निरस्तानन्दम् अभिलपति स्म ॥१५८॥

तदिति । जगत्याः पतिर्भूपतिर्नलः, इह दमयन्तीसमीपे, भूतं सञ्जातम्, अखिलं समस्तम्, तत्, स्वात्मनो दूतत्वस्य दौत्यस्य तत्त्वं स्वरूपम्, भूतगत्या सत्यप्रकारेण, त्रिभुवनजनानां यावन्तो वृत्ताः समग्रा वृत्तान्तास्तेषां साक्षात्कृतिषु स्वस्वप्रणिधानेनैव प्रत्यक्षीकरणेषु कृतिनः स्वस्वान्तर्यामित्वादेव निपुणास्तेषु । अतएव दमयन्त्या स्वयमेव प्रत्याख्यानं कृतमिति विदित्वा नलं प्रतीन्द्रादयो न रुष्टा इति भावः । इन्द्रादिषु इन्द्रादिदेवचतुष्टय-समीपे, द्राक् सत्वरम्, निरस्तो दौत्ये साधितकार्य्यतया दूरीकृत आनन्दो यस्मिन् कर्म्मणि तद् यथा स्यात्तथा, अभिल-पति स्म उक्तवान् ।

अत्र छेकानुप्रासोऽलङ्कारः । स्वात्मशब्दयोः पर्य्यायतया अर्थं गतपुनरुक्तता दोषः । स च स्वीयदूतत्वतत्त्व-मिति पाठेन परिहार्य्यः । ओजो गुणः, गौड़ी च रीतिः ।

मालिनी वृत्तम् । तल्लक्षणमुक्तम् ॥१५८॥

বাঙ্গালা—দময়ন্তীর নিকটে নিজের দৌত্যকার্য্য সকল যেরূপে হইয়াছিল, নলরাজা সত্বর যাইয়া ইন্দ্রপ্রভৃতির নিকট সে সমস্তই যথাযথভাবে বলিলেন ; ইন্দ্রপ্রভৃতিও ত্রিভুবনের সমস্ত লোকের সমস্ত বৃত্তান্ত প্রত্যক্ষ করিতে নিপুণ ছিলেন বলিয়া, নলের প্রতি তাঁহারা অসন্তুষ্ট হইলেন না ।১৫৮॥

श्रीहर्षमिति । संदृब्धं ग्रथितं रचितमित्यर्थः अर्णवस्य समुद्रस्य वर्णनं येन तस्य तथोक्तस्य । अर्णव-वर्णनात्मको ग्रन्थोऽप्यनेन रचित इति तात्पर्य्यम् । तस्य श्रीहर्षस्य, कृताविति शेषः । व्यरंसीत् विरतः समा-प्तोऽभूत् ।

नानानय विविधशास्त्रार्थबलात् स्वदेशे स्थित्वा नलोपुरमितौ हरिदासशर्म्मा ।
नाग-श्रुति द्विप शशाङ्कमिते शकाब्दे भाद्रे चतुर्थदिवसे नवमं सिषेव ॥

इति श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां नैषधचरितटीकायां
नवमीसमाख्याया नवमः सर्गः समाप्तः ॥०॥

दशमः सर्गः ।

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च लब्धपाराः (१)
स्वयंवरं प्रत्यरिवैरिकाय-च्यूहच्छ्रियः श्रोजितयत्नराजः (२) ॥१॥
नाभूदभूमिः क्षरवायचानां नावेदिगन्ता कुलजः कुमारः ।
नास्वादयन्वा धरणेः कपोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥२॥

अन्वयः — [illegible]

[illegible]

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरलङ्घैः प्रसभेन हर्त्तुम् ।
द्रष्टुं परैस्तान् परिकर्त्तुमन्यैः (१) स्वमालयेषाः ककुभो बभूवुः ॥३॥

लोकैरशेषैरवनेः श्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्त्ति तत्तज्जनयन्त्यथार्त्ति-विश्रान्तिमापुः ककुभां विभागाः ॥४॥

नेति । [illegible] । तादृशस्य निमन्त्रितत्वादिति भावः । कुमारी राजपुत्रमात्रम्, [illegible] ... अपि न दमयन्त्या रूपगुणादिश्रवणात् [illegible] ... कुमार इति [illegible] ... अपि नु [illegible] ... तथा राज्ञा कुमारीविवाहकाले नृपतीनाम्, [illegible] ... अन्योऽपि [illegible] ... अथवा [illegible] ... [illegible] ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

तलं ययेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः ।
भैमीं स लब्धामिव तत्र मेने यः प्राप भूभृद्भवितुं पुरस्तात् ॥५॥
नृपः पुरस्थैः प्रतिरुद्धवर्त्मा [१] पश्चाज्जनैः [२] कश्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥६॥

श्रियं लक्ष्मीस्वरूपाम्, तां दमयन्तीम्, उद्दिश्य लक्ष्यीकृत्य, प्रयाणे प्रस्थाने, विहिते कृते सति, ककुभां दिशाम्, विभागाः पूर्वादयो भागाः, स्वेषु आत्मसु पतिं निर्विशमानैः तैः सर्वैर्जनैर्या यन्त्रणा सङ्कटता तया या आर्त्तिः पीड़ा तस्या विश्रान्तिं विरामम्, आपुर्लेभिरे इव ।

अत्रावनेः श्रियमिति निरङ्गं केवलरूपकम्, विश्रान्तिमापुरिवेति प्रतीयमाना क्रियोत्प्रेक्षा, छेकानुप्रासश्चेति संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ॥४॥

বাঙ্গালা—দিগ্জাত সমস্ত লোকগুলি ভূতলের লক্ষ্মীস্বরূপা সেই দময়ন্তীকে লক্ষ্য করিয়া প্রস্থান করিলে, পূর্বপ্রভৃতি দিগ্বিভাগগুলি, নিজের উপরের সেই সেই লোকের ভারনিবন্ধন পীড়ার যেন বিশ্রাম লাভ করিল ॥৪॥

अन्वयः—विकीर्णाः तिला यथा तलं न ईयुः, तथा सैन्यैः राजपथाः बभूवुः । तत्र यः भूभृत् पुरस्तात् भवितुं प्राप, सः भैमीं लब्धाम् इव मेने ॥५॥

तेषां गमनप्रकारं तावदाह तलमिति । विकीर्णाः विक्षिप्ताः, तिलाः स्वनामख्यातशस्यविशेषाः, यथा तलं भूतलम्, न ईयुर्न जग्मुः, अवकाशालाभादिति भावः । तथा सैन्यैः, राजपथाः बभूवुः सङ्कटा जाता इत्यर्थः । तत्र राजपथेषु, यो भूभृत् राजा, पुरस्तादग्रवर्त्ती भवितुं प्राप शशाक, स भूभृत्, भैमीं दमयन्तीम्, लब्धामिव मेने लब्धवान्, आनन्दभरादिति भावः ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः । गुणरीती पूर्ववत् ॥५॥

বাঙ্গালা—নিক্ষিপ্ত তিলও যাহাতে ভূতলে পড়িতে না পারে, এমন ভাবে সৈন্যগণ দ্বারা রাজপথগুলি সঙ্কীর্ণ হইয়াছিল । তাহাতে যে রাজা অগ্রবর্ত্তি হইতে পারিলেন, তিনিই দময়ন্তীকে যেন লাভ করিয়াছেন বলিয়া মনে করিলেন ॥৫॥

अन्वयः—पुरस्थैः जनैः प्रतिरुद्धवर्त्मा कश्चन नृपः पश्चात् (वर्त्तिभिः) जनैः नुद्यमानः (सन्) यन्त्रस्थसिद्धार्थ-पदाभिषेकं लब्ध्वा अपि स्वम् असिद्धार्थम् अमन्यत ॥६॥

नृप इति । पुरस्थैरग्रवर्त्तिभिर्जनैः, प्रतिरुद्धं वर्त्म गमनमार्गो यस्य स तादृशः, कश्चन कश्चित् नृपः, पश्चाद्वर्त्तिभिर्जनैः, नुद्यमानः शीघ्रं याहीति प्रेर्यमाणः सन्, यन्त्रस्थस्तैलनिष्कासनयन्त्रस्थितो यः सिद्धार्थः सर्षपः, तस्य पदे स्थाने अभिषेकं स्थितिम्, लब्ध्वापि, तैलनिष्कासनयन्त्रे सर्षपो यथा केनचित् काष्ठेन उपरिस्थकाष्ठेन पश्चाद्दमनेन निपिष्टो भवति, तद्वदसौ नृपः उभयोरन्तरे तिष्ठन् निष्पिष्यमाण इत्यर्थः, स्वमात्मानम्, असिद्धार्थम्, अकृतार्थम्, अमन्यतेति विरोधः, अनिष्पन्नप्रयोजनमिति तत्परिहारः, विमर्द्दनेन दमयन्त्या अन्यस्य वरणसम्भवादिति भावः ।

अत्रेयमेव विरोधाभासोऽलङ्कारः, यन्त्रस्थसिद्धार्थस्य पदमेव पदमिति सादृश्यापादनं भेदे, छेकानुप्रासश्चेति संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"सिद्धार्थस्तु पुमान् सर्षपेऽपि च सिद्धकर्मणि" इति मेदिनी ॥६॥

---

(१) प्रतिरुद्धवर्त्मा । (२) पश्चाज्जनैः ।

राज्ञां पथि स्त्यानतयानुपूर्व्या विलङ्घनाशक्तिविलम्बभाजाम् ।
आह्वानसंज्ञानमिवाग्रकम्पै-र्ददुर्विदर्भेन्द्रपुरीपताकाः ॥७॥
प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः ।
भुवस्तले कुण्डिनगामिराज्ञां तद्वासुकेरश्वतरोऽन्वगच्छत् ॥८॥

বাঙ্গালা—সম্মুখবর্ত্তী লোকেরা সম্মুখের পথ রুদ্ধ করিয়া রহিয়াছিল এবং পিছনের লোকেরা ঠেলিতেছিল ; এই অবস্থায় কোন রাজা, যানিবস্থিত সর্ষপের স্থানে অবস্থান করিয়া, আপনাকে অকৃতকার্য্য মনে করিতে লাগিলেন ।৬।

अन्वयः—विदर्भेन्द्र-पुरी पताकाः अग्रकम्पैः पथि स्त्यानतया आनुपूर्व्याः विलङ्घनाशक्तिविलम्बभाजां राज्ञाम् आह्वानसंज्ञानं ददुः इव ॥७॥

राज्ञामिति । विदर्भेन्द्रस्य भीमराजस्य या पुरी कुण्डिननगरी तस्याः पताकाः, अग्रकम्पैः प्रान्तभागसञ्चालनैः, हस्तसञ्चालनैरिवेति भावः, पथि स्त्यानतया जनैः सङ्कटतया हेतुना, आनुपूर्व्याः अग्रपश्चाद्भावस्य, विलङ्घने अतिक्रमणे अशक्त्या असामर्थ्येन विलम्बं भजन्त इति तेषां राज्ञाम्, आह्वानस्य संज्ञानं सङ्केतम्, ददुरिव । अन्योऽपि विलम्बेनागच्छता हस्तकम्पनसङ्केतेनाह्वानं ददाति ।

अत्र वाच्या क्रियोत्प्रेक्षालङ्कारः । गुणरीती पूर्ववत् ॥७॥

বাঙ্গালা—রাজপথ জনসঙ্কীর্ণ হইয়াছিল ; তাই অগ্রপশ্চাদ্ভাব অতিক্রম করিবার শক্তি না থাকায় অনেক রাজা বিলম্ব করিতেছিলেন ; সুতরাং কুণ্ডিননগরীর পতাকাগুলি যেন স্ব স্ব প্রান্তদেশ কম্পন দ্বারা তাঁহাদের আহ্বানের সঙ্কেত করিতেছিল ।৭।

अन्वयः—भुवः तले अटकः कर्कः प्राग्भूय कुण्डिनगामि सकम्बलम् उच्चैः राज्ञां यत् नागबलम् आचकर्ष, अश्वतरः तत् अन्वगच्छत् । (पक्षान्तरे) भुवः तले कर्कोटकः प्राग्भूय कुण्डिनगामि सकम्बलम् उच्चैः वासुकेः यत् नागबलम् आचकर्ष, अश्वतरः तत् अन्वगच्छत् ॥८॥

प्रागिति । भुवस्तले पृथिवीतले, अटतीत्यटः शीघ्रगामी च एष अटकः, कर्कः श्वेताश्वः, प्राग्भूय अग्रवर्त्ती भूत्वा, कुण्डिनगामि, सकम्बलं कम्बलाख्यपृष्ठास्तरणसहितम्, उच्चैः महत्, राज्ञाम्, यत् नागबलं हस्तिसैन्यम्, आचकर्ष आकृष्टवान् स्वशीघ्रगमनप्रदर्शनेन शीघ्रमेव निकटमानीतवानित्यर्थः ; अश्वतरो गर्दभाद्वडवाया जातः तत् नागबलम्, अन्वगच्छत् अनुगतवान् शीघ्रमेवानुसृतवानिति तात्पर्य्यम् । राज्ञां च तादृशं सैन्यम्, तत्पश्चात् हस्तिसैन्यम्, तत्पश्चाच्च भारवाही अश्वतरगणः कुण्डिनं जगामेति निष्कर्षः । पक्षान्तरे तु भुवः पृथिव्याः, तले निम्नदेशे पाताले इत्यर्थः, कर्कोटकस्तदाख्यो नागविशेषः, प्राग्भूय अग्रवर्त्ती भूत्वा, कुण्डिनगामि, सकम्बलं कम्बलनामकनागसहितम्, उच्चैः महत्, वासुकेरनन्तनागस्य च यत् नागबलं सर्पसैन्यम्, आचकर्ष उद्‌नीतवान् ; अश्वतरस्तदाख्योऽपि नागविशेषः, तत् वासुकेः नागबलम्, अन्वगच्छत् अनुगतवान् । भीमराजेन स्वयंवरसभायां पातालवासिनां सर्पाणामपि निमन्त्रितत्वात् अग्रे कर्कोटकाख्यो नागः, तत्पश्चाद्वासुकेर्नागसैन्यम्, तत्पश्चाच्च अश्वतराख्यो नागः कुण्डिनपुरं ययाविति स्थूलार्थः ।

अत्र निमन्त्रणेनोभयपक्षयोरपि प्रस्तुतत्वात् द्विविधयोरपि कर्कोटक इत्येतयोरश्वतरयोश्च एकया आचकर्षेति क्रियया अन्वगच्छदिति क्रियया चान्वयात् श्लेषानुप्राणित तुल्ययोगितात्रयम्, छेकानुप्रासश्चेति संसृष्टिः । बन्धा-र्थस्य दुरूहत्वादोजो गुणः, गौडी च रीतिः ।

"कर्कः कर्केतने वह्नौ शुक्लाश्वे दर्पणे घटे" इति मेदिनी । "कर्कोटकः सान्नाग्-कोद्रवयवमेदयोः"

आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः।
विस्पष्टमापद्दिशा जनेषु (१) रूपं पतित्यागदशानुरूपम्॥९॥
आखण्डलो दण्डधरः हुताशः पाशीति नाथैः ककुभां चतुर्भिः।
भैम्येव बद्धा स्वगुणेन क्रष्टैः ययौ तदुद्वाहरसान्न शेषैः (२)॥१०॥

इति विश्वः। "अम्बरं कुलिशाभयोः। नागभेदे प्राकारे भंकल्ये कम्बल जले।" इति हेमचन्द्रः। "श्वानं श्वेतं मरर्षेषु क्लीब क्षीरकरङ्गयोः" इति विश्वाप्रकाशः। "गर्दभाश्वतरामाते खरास्वतरवेसरा" इति च॥८॥

বাঙ্গালা—ভূতলে শীঘ্রগামী শ্বেত ঘোটকগণ অগ্রবর্ত্তী হইয়া, দুগ্ধিননগরগামী, কম্বলাবৃত এবং সুবৃহৎ ব্রাহ্মণদের যে হস্তিসৈন্য আবর্ত্তন করিয়াছিল; তাঁহাদের অশ্বতরগণও তাহার অনুসরণ করিয়াছিল। আবার পাতালে কর্কোটকনাগ অগ্রগামী হইয়া, দুগ্ধনগামী কম্বলনাগযুক্ত এবং অতিবৃহৎ বাসুকির যে সর্পসৈন্য আবর্ত্তন করিয়াছিল, অশ্বতরনামক নাগ তাহার অনুসরণ করিয়াছিল॥৮॥

অন্বয়ঃ—আগচ্ছদুর্বীন্দ্র-চমূ-সমুত্থৈঃ ভূরেণুভিঃ পাণ্ডুরিতা দিশঃ মুখশ্রীঃ জনেষু পতিত্যাগদশানুরূপং রূপং বিস্পষ্টম্ আপৎ॥৯॥

আগচ্ছদিতি। আগচ্ছতাম্ উর্বীন্দ্রাণাং রাজ্ঞাং চমূঃ সেনাঃ সমুত্থৈঃ সমুত্থিতৈঃ, ভূরেণুভিঃ ধূলিভিঃ, পাণ্ডুরিতা ধূসরবর্ণীকৃতা, দিশঃ বধ্বাঃ, মুখশ্রীঃ আননশোভা বদনশোভা চ, জনেষু লোকেষু, পত্যুঃ স্বামিনঃ ত্যাগদশায়াঃ পরিত্যাগাবস্থায়াঃ অনুরূপং যোগ্যম্, রূপং নানাকৃতিম্, বিস্পষ্টং সুব্যক্তং যথা তথা, আপৎ প্রাপ্তবতী। যথা পতিবিচ্ছেদদশায়াং পতিব্রতায়াঃ মুখশ্রীঃ "বিয়োগে মলিনা ক্ষমা" ইতি কথনাৎ মলিনা ভবতি, তথা অধিপতিশূন্যায়াঃ দিশঃ মুখশ্রীরপি সৈন্যোত্থিতধূলিভির্মলিনা ভূতেতি ভাবঃ।

অত্র শ্লিষ্টশব্দেন কার্য্যসম্বন্ধেন চ দিগ্‌বধ্বোঃ পতিব্রতাস্ত্রীব্যবহারসমারোপাৎ সমাসোক্তিরলঙ্কারঃ স চ অনুপ্রাসেন সংসৃজ্যতে। প্রসাদো গুণঃ, বৈদর্ভী চ রীতিঃ॥৯॥

বাঙ্গালা—আগমনকারী রাজগণের সৈন্য হইতে উত্থিত ধূলিসমূহ, দিক্‌সমূহের মুখশ্রীকে ধূসরবর্ণ করিয়া ফেলিল, তখন সেই মুখশ্রী পতিবিরহদশার উপযুক্ত আকৃতি জনসাধারণের নিকট সুস্পষ্টরূপে সূচনা করিতে লাগিল॥৯॥

অন্বয়ঃ—আখণ্ডলঃ দণ্ডধরঃ হুতাশঃ পাশী ইতি চতুর্ভিঃ ককুভাং নাথৈঃ ভৈম্যা স্বগুণেন বদ্ধা ক্রষ্টৈঃ ইব [সদ্ভিঃ] তদুদ্বাহরসাৎ যযে, [কিন্তু] শেষৈঃ ন যযে॥১০॥

আখণ্ডল ইতি। আখণ্ডলঃ ইন্দ্রঃ, দণ্ডধরঃ যমঃ, হুতাশঃ অগ্নিঃ, পাশী বরুণঃ, ইতি চতুর্ভিঃ ককুভাং দিশাম্ নাথৈঃ অধিপতিভিঃ, ভৈম্যা দময়ন্ত্যা, স্বগুণেন নিজসৌন্দর্য্যাদিনা রজ্জ্বা চ, বদ্ধা ক্রষ্টৈঃ ইব সদ্ভিঃ তস্যাঃ দময়ন্ত্যাঃ যৎ উদ্বাহরসাৎ পরিণয়ানুরাগাৎ, যযে তৎ স্বয়ংবরস্থানং গম্যতে; কিন্তু শেষৈঃ অন্যৈঃ দিক্‌পতিভিঃ, ন যযে, তদনুরাগাভাবাদিতি ভাবঃ।

অত্র গুণেনেতি শ্লিষ্ট শব্দে উৎপ্রেক্ষা, ক্রষ্টৈরিবেতি বাচ্যা ক্রিয়োৎপ্রেক্ষা অনয়োশ্চাঙ্গাঙ্গিভাবেন সঙ্করঃ। গুণরীতী পূর্ব্ববৎ॥১০॥

বাঙ্গালা—ইন্দ্র, যম, অগ্নি ও বরুণ এই চারি জন দিক্‌পাল, নিজগুণ দ্বারা বদ্ধ

---

(১) … পরিষ্কুটম্। [২] যযাবিত্যত্র গম্যতে ন শেষৈঃ।

भैमीविवाहं सहते स्म कस्मादर्द्धं तनुर्या गिरिजात्मभर्त्तुः।
तेनाव्रजन्त्या विदधे विदर्भानीशानयानाय तयान्तरायः ॥१४॥
स्वयंवरं भीमनरेन्द्रजाया दिशः पतिर्न प्रविविश शैवः।
प्रयातु भारं स निवेश्य कस्मिन् अद्दिर्महीगौरवसासहिः कः (१) ॥१५॥

अन्वयः—वामः स कामः जातौ न प्रवणः, वित्ते न प्रवणः, गुणे [च] न प्रवणः, [किन्तु] सौन्दर्ये एव प्रवणः। (अतएव) स्वच्छः स्वर्मैचित-कुत्सितवेरः कुवेरः तां क्षितनारीं प्रति न अगात् ॥१३॥

जाताविति। वामः अविनयस्वभावत्वात् कुटिलः, स प्रसिद्धः, कामः कन्दर्पः युवजनाभिलाषो वा, जातौ कौलीन्ये, न प्रवणः उन्मुखो भवति केवलं कौलीन्यं वीक्ष्यैव न प्रवर्त्तत इत्यर्थः। एवमन्यत्रापि। वित्ते धने न प्रवणः, गुणे विद्यादौ च न प्रवणः। किन्तु केवले सौन्दर्ये एव प्रवणो भवति सुन्दरं सुन्दरीं वा वीक्ष्यैव प्रवर्त्तत इत्यर्थः। अत एव स्वच्छेन निर्मलेन निर्मलत्वात् सत्यवादिनेत्यर्थः। स्वर्मेण निजवासपर्वतेन कैलासेन साचिता सूचिता दृष्टा कुत्सा कुरूपत्वं यस्य स तादृशो वेरः शरीरं यस्य स तथोक्तः, कुवेरो नाम दिक्पालः, तां क्षितनारीं दमयन्तीम्, प्रति लक्ष्यीकृत्य, न अगात् न स्वयंवरं गतवान्। तथा च कुवेरो देवजातिः सुतरां कुलीनः, धनाधिपतिः, विद्यादिगुणवांश्च, तथापि कुत्सितशरीरत्वात् तस्य कुत्सितत्वं प्रति सत्यवादिनं स्वर्मैलस्यैव साक्षित्वात् दमयन्त्याः कामासम्भवेन तत्स्वयंवरं न गत इति भावः।

अत्र गमनाभावं प्रति पूर्वार्द्धवाक्यार्थस्य स्वच्छेत्यादिपदार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः, पूर्वार्द्धे अन्त्यानुप्रासः, परार्द्धे च छेकानुप्रासः इत्येतेषां संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः।

"वेरं कलेवरे क्लीब वार्ताकौ कुङ्कुमेऽपि च" इति मेदिनी। अञ्जसा स्तौति स्तिऽना "एकस्वरात् विभाषा" इति पक्षे इत्वम् ॥१३॥

বাঙ্গালা—কুটিলস্বভাব কাম জাতির প্রতি, ধনের প্রতি, কিম্বা গুণের প্রতি উন্মুখ নহে; কিন্তু একমাত্র সৌন্দর্য্যের প্রতিই উন্মুখ হইয়া থাকে। এই জন্যই কুবের বরনারীরত্ন দময়ন্তীকে লক্ষ্য করিয়া গমন করেন নাই। কারণ, তাঁহার দেহের কুরূপতা, তাঁহার নিজের বাসস্থান নির্ম্মল কৈলাসপর্ব্বতই দেখিয়াছে ॥১৩॥

অন্বয়ঃ—या गिरिजा आत्मभर्त्तुः अर्द्धं तनुः (सा) कस्मात् आत्मभर्त्तुः भैमीविवाहं सहते स्म। तेन विदर्भान् अव्रजन्त्या तया ईशानयानाय अन्तरायः विदधे ॥१४॥

भैमीति। या गिरिजा पार्वती, आत्मभर्त्तुः शिवस्य, अर्द्धं तनुः अर्द्धशरीरभूता, शिवस्यार्द्धनारीश्वरत्वादिति भावः। सा गिरिजा, कस्मात् तौ, आत्मभर्त्तुः भैमीविवाहं सहते स्म सोढुं शक्नोति स्म, अपि तु कस्मादपि नैवेत्यर्थः। तेन तद्धेतुना, विदर्भान् अव्रजन्त्या तया गिरिजया, ईशानस्य दिक्पतेः यानाय विदर्भगमनाय, अन्तरायो विघ्नः, विदधे कृतः। एकार्द्धस्य अगमने अपरार्द्धस्य गमनासम्भवात् गिरिजाया अगमनमेव विघ्न इति भावः।

अत्र छेकानुप्रासोऽलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः ॥१४॥

বাঙ্গালা—যে পার্ব্বতী নিজভর্ত্তার শরীরের অর্দ্ধাংশ, তিনি সে নিজভর্ত্তার দময়ন্তীকে বিবাহ করা কি প্রকারে সহ্য করিবেন? (কোন প্রকারেই নহে)। তাই পার্ব্বতী বিদর্ভদেশে না যাইয়া, ঈশানের যাওয়ার বিঘ্ন করিলেন ॥১৪॥

---

(१) सासहिरिति।

ययौ विमृश्योर्द्ध्वदिशः पतिर्न स्वयंवरं वोचितधर्म्मशास्त्रः ।
व्यलोकि लोके श्रुतिषु श्रुतो वा (१) समं विवाहः क्व पितामहेन ॥१६॥
भैमीनिरस्तं स्वमवेत्य दूती-(२) मुखात् किलेन्द्रप्रमुखा दिगीशाः (३) ।
स्वदे (४) मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः ॥१७॥

अन्वयः—शेषः दिशां पतिः भीमनरेन्द्रजायाः स्वयंवरं न प्रविवेश । सः कस्मिन् भारं निवेश्य प्रयातु, कं अहिं महीगौरवसासहिं ॥१५॥

स्वयमिति । शेषः अनन्तो नाम दिशां पतिः, भीमनरेन्द्रजायाः स्वयंवरं स्वयंवरसभाम्, न प्रविवेश । कथमित्याह—सः शेषः, कस्मिन् जने, भारं पृथिवीम्, निवेश्य स्थापयित्वा, प्रयातु गच्छतु, अपि तु कस्मिन्नपि नेत्यर्थः । ननु पाताले बहवः सर्पाः सन्ति तेषामेकस्मिन् निवेश्य प्रयात्वित्याह—कं अहिं सर्पान्तरम्, महीगौरवस्य पृथिवीभारस्य सासहिं अतिशयेन सहनक्षमम्, अपि तु कोऽपि नेत्यर्थः ।

अत्र प्रवेशाभावं प्रति तृतीयपादवाक्यार्थौ हेतुरिति काव्यलिङ्गमलङ्कारो छेकानुप्रासेन संसृष्टः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"सासहिवावहिचाचलिपापतिवावदयोऽपि नामभूताः स्युरा रुदाः" इत्याख्यातवृत्तौ दुर्गः ॥१५॥

बाङ्गाला—दिक्‌पति अनन्त दमयन्तीर स्वयंवर सभाय गमन करियाछिलेन ना । कारण तिनि काहार उपरे पृथिवीर भार स्थापन करिया याइबेन, कोन् सर्प पृथिवीर भार सह्य करिते समर्थ छिल ? ।१५।

अन्वयः—वीचितधर्म्मशास्त्रः ऊर्द्ध्वदिशः पतिः विमृश्य स्वयंवरं न ययौ । पितामहेन समं (पौत्र्याः) विवाहः लोके क्व व्यलोकि ? श्रुतिषु क्व श्रुतः वा ? ॥१६॥

ययाविति । वीचितं पर्य्यालोचितं धर्म्मशास्त्रं येन सः तादृशः, ऊर्द्ध्वदिशः पतिर्ब्रह्मा, विमृश्य दमयन्त्या विवाह आत्मनो न कर्त्तव्य इति विविच्य, तस्याः स्वयंवरं न ययौ । ननु तस्या विवाहः कथमात्मनो न कर्त्तव्य इत्याह—पितामहो ब्रह्मैव पितामहः पितृपिता तेन, समं सह, विवाहः पौत्र्याः परिणयः, लोके लोकसमाजे, क्व कुत्र, व्यलोकि केन दृष्टः, अपि तु क्वापि नेत्यर्थः, तथा श्रुतिषु वेदेषु तन्मूलकेषु स्मृतिशास्त्रेषु च, क्व कुत्र, केन श्रुतो वा, अपि तु क्वापि नेति तात्पर्य्यम् । प्रत्युत "न समानगोत्रां न समानप्रवरां भार्य्यां विन्देत मातृतस्त्वापञ्चमात् पितृतस्त्वासप्तमात्" इति विष्णुप्रभृतिभिर्निषिद्ध एवासौ विवाह इति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, ब्रह्मपितृपित्रोर्भेदेऽपि पितामहपदश्लेषेण तयोरभेदाध्यवसायादतिशयोक्तिश्च, अनयोरङ्गाङ्गिभावेन सङ्करः, छेकानुप्रासेनापि पुनरसौ संसृज्यते । गुणरीती पूर्ववत् ।

"पितामहो विरिञ्चौ स्यात् तातस्य जनकेऽपि च" इति मेदिनी ॥१६॥

बाङ्गाला—यिनि चिरकाल धर्म्मशास्त्र पर्य्यालोचना करियाछेन, सेइ ऊर्द्ध्वदिकेर पति ब्रह्मा विशेष विवेचना करिया दमयन्तीर स्वयंवरे गियाछिलेन ना । कारण, पितामहेर सहित पौत्रीर विवाह लोकसमाजे के कोथाय देखियाछे ? किम्बा वेदे वा स्मृतिशास्त्रे के कोथाय शुनियाछे ? ॥१६॥

अन्वयः—ते इन्द्रप्रमुखाः दिगीशाः दूतीमुखात् स्वं भैमीनिरस्तं किल अवेत्य चित्तस्य मान्द्यं स्वदे मुखेन्दौ च वितत्य राजसमाजम् ईयुः ॥१७॥

(१) स्मृतौ वा । (२) ...अवेत्य दूत्याः । (३) ...दिगिन्द्राः । (४) स्वन्दे...।

नलभ्रमेणापि भजेत भैमी कदाचिदस्मानिति शेषिताशा ।
अभूत्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥१८॥
प्रयस्यतां तद्भवितुं सुराणां दृष्टेन पृष्टेन परस्परेण ।
तद्वैतसिद्धिर्न बतानुमेने (१) स्वाभाविकात् कृत्रिममन्यदेव ॥१९॥

भैमीति । ते इन्द्रप्रमुखा दिगीश्वराश्चत्वारो दिक्पालाः, स्वस्वदूतीनां मुखात् स्व स्वनामाननमाननम्, भैम्या दमयन्त्या निरस्तं प्रत्याख्यातम्, ज्ञात्वा निश्चयेन, अतीव श्रान्त्वा, चित्तस्य मनसः, मान्द्यम् उत्कर्षहानिलोपाद्-पाटवनाशमभिनयं, सदे सदनवेणे, मुखेन्दौ मुखचन्द्रेषु च, चित्तं विलाप्य, सदे मान्द्यमस्तं मुखेन्दौ मान्द्यं नाविन्दं विषादेन, राजवाज्ञ स्वय वधीरराजतमान्, ईयुर्गतवन्तः ।

अत्र चित्त-सद-मुखेन्दुष्वनाद्यानां परस्परभेदेऽपि मान्द्यपदस्य श्लेषाभेदाध्यवसायादतिशयोक्तिरलङ्कारस्तेन चानु-प्रासेन च सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"मृदाम्बादग्निर्मान्द्यं मन्दान्यम्" इत्यमरः ।

अनिलव वीचा मुखाम्बुखेन्दादिषु नयनैश्च तावेतत्प्रवनश्चवनम्बन् । स्वद इति "स्वदी अर्थे" इति निपातः ॥१७॥

বাঙ্গালা—সেই ইন্দ্রপ্রভৃতি দিক্‌পালগণ, দূতীগণের মুখ হইতে দময়ন্তী যে আপনা-দিগকে প্রত্যাখ্যান করিয়াছেন, তাহা নিশ্চয়রূপে জানিয়া, চিত্তের মান্দ্য সদনে এবং মুখচন্দ্রে প্রকাশিত করিয়া, স্বয়ংবররাজসভায় গমন করিলেন ॥১৭॥

अन्वयः—भैमी कदाचित् नलभ्रमेण अस्मान् भजेत अपि इति शेषिताशा सा महेन्द्रादिचतुष्टयी अलीकरूपा काचित् चतुर्नली अभूत् ॥१८॥

नलेति । भैमी दमयन्ती, कदाचित्, नलभ्रमेण नल एवायमिति भ्रान्त्या, अस्मान् अस्माकमन्यतमम् भजेत वरणाध्यवसायेन वृणीत । अपि सम्भावनायाम् । इति इत्थं शेषिता तया प्रत्याख्यानेऽपि शेषितवती परिरक्षिता, अत्र-सम्भावनया तु ईषन्मात्र रक्षिता आशा यया सा, सा महेन्द्रादीनां दिक्पालानां चतुष्टयी अलीकरूपा मिथ्या-स्वरूपा, काचिदद्भुता, चतुरा नलानां समाहार इति चतुर्नली नलचतुष्टयरूपा अभूत् ।

अत्र उत्प्रेक्षालङ्कारः, प्रसादो गुणः, वैदर्भी च रीतिः ॥१८॥

प्रियावियोगक्वथितात् किमैलात् [१] चन्द्राद् ग्रहग्रहीतैर्ग्रहपीड़िताच्च [२] ।
भाताद्भवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पम् ॥२२॥

नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान् विधिराहृताऽस्यै ।
स्पर्द्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥२३॥

नलमुखतुल्यमुखप्राप्त्यर्थेति पुनर्द्वितीया उक्तिः इति दोषः भिन्नार्थप्रतिपादनेन सन्देहापाताद्दूषणमित्यर्थः तदीतु प्रहृदितुम्, अलं समर्थम्, नाभूत्, स्वस्वमुखेषु नलमुखस्य सद्भावमन्यादिति भावः ।

अत्र पदस्ये दोषोऽलङ्कारः । द्वितीयपादे आस्यपदेन प्रक्रम्य आननपदाभिधानात् प्रकृतिविपर्ययो भग्नप्रक्रमता-दोषः । 'प्रिय निजास्येन नलास्यभानम्' इति पाठेन चासौ परिहार्यः । गुणरीती पूर्ववत् ।

"वर्हिर्मुखा: क्रतुभुजः" इत्यमरः । "वर्हिः कुशहुताशयो" इति विश्वः ॥२१॥

বাঙ্গালা—তখন ইন্দ্রপ্রভৃতি দেবগণ নিজ নিজ মুখ দ্বারা নলমুখের শোভা লাভ করিতে পারিয়াছিলেন না, সুতরাং তাঁহাদের অনন্যাননত্বও পুনরুক্তিদোষ খণ্ডন করিতে সমর্থ হইয়াছিল না ।২১।

अन्वयः—ते प्रियावियोगक्वथितात् ऐलात् ग्रहपीड़ितात् चन्द्रात् भवेन भातात् स्मरत अपि गृहीतैः सारैः किं स्वं नलानुकल्पं कल्पयन्ति स्म ॥२२॥

प्रियेति । ते इन्द्रादयो देवाः, प्रियावियोगेन उर्वशीविरहानलेन क्वथितात् निष्पक्वात्, ऐलात् पुरूरवसो नृपात्, ग्रहपीड़ितात् राहुणा विमर्द्दितात् चन्द्रात्, तथा भवेन महादेवेन, भातात् दग्धात्, स्मरतोऽपि कामदेवाच्च, गृहीतैः आनीतैः, सारैः श्रेष्ठभागैः करणैः किम्, स्वम् आत्मानमात्मानम्, नलस्य दमयन्तीविरहपीड़ितस्येति भावः अनुकल्पं प्रतिनिधिम्, कल्पयन्ति स्म कुर्वन्ति स्म नलः खलु तदानीं दमयन्तीविरहपीड़िततया उर्वशीविरहपीड़ितस्य पुरूरवसः, राहुमर्द्दितस्य चन्द्रस्य, हरनयनाग्निदग्धस्य कामस्य च तुल्य आसीत् । अतस्तेभ्यः सारग्रहणमन्तरेण नलानुरूपता न स्यादिति भावः । अन्येनापि क्वथनेन निष्पीड़नेन दाहेन च वस्तुनः सार आकृष्यते ।

अत्र सारत्वरूपैकगुणेन सह ऐलादीनामप्रस्तुतानामन्वयात्तुल्ययोगिता, साच्या क्रियोत्प्रेक्षा चानयोरङ्गाङ्गि-भावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासेन संसृज्यते । अनुकल्पमित्यनेन तथापि नलाधिकर्षो व्यज्यत इति वस्तुना वस्तुध्वनिः । प्रसादो गुणः, वैदर्भी च रीतिः ॥२२॥

বাঙ্গালা—উর্বশীর বিরহপীড়িত পুরূরবা, রাহুপীড়িত চন্দ্র এবং শিবনয়নদগ্ধ কামদেব হইতে সার আকর্ষণ করিয়া, তাহা দ্বারাই কি ইন্দ্রপ্রভৃতি দেবগণ, নিজ নিজ রূপের অনুকরণ করিয়াছিলেন ? ।২২।

अन्वयः—भैमी तैः नलस्य इयत् अन्तरं पश्यतु इति (विभाव्य इव) विधिः अस्यै भूपान् आहृत; दिगीशान् अपि स्पर्द्धां कारयित्वा तेभ्यः तस्य एव प्रथिमानम् अर्थ आख्यत् (इव) ॥२३॥

ननु दमयन्ती नलमेव वरिष्यतीति जानन्तोऽपि राजानो देवाश्च कथं तत्र समागताः [illegible] भैमी दमयन्ती, तैर्नृपैः सह, नलस्य इयत् एतावत्, अन्तरं भेदम्, पश्यतु इति [illegible] विधिः, अस्यै भैम्यै, भूपान् अन्यान्यान् नृपान्, आहृत आनीतवान् । [illegible] तदुत्कर्षख्यापनार्थमेव इति भावः । तथा दिगीशान् इन्द्रादीन् दिक्पालान्, [illegible]

(१) क्वथितादिवैलात् । (२) चन्द्राच्च राहुग्रहपीड़िताच्च ।

सभा नलश्रीयमकैर्यमाद्यै र्नलं विनाभूद्धृतदिव्यरत्नैः।
भामाङ्गनप्राघुणिके चतुर्भि-र्देवद्रुमैर्द्यौरिव पारिजाते ॥२४॥

तत्रागमद्वासुकिरीशभूषा-भस्मोपदिग्धस्फुटगौरदेहः।
फणीन्द्रवृन्द-प्रणिगद्यमान-प्रमोद-जीवाद्यनुजीविवादः ॥२५॥

कारयित्वा, तेभ्यो दिगीशेभ्यः, तस्य नलस्यैव, प्रथिमानं महत्त्वम्, अस्यै भैम्यै, आख्यत् कथितवानिव। अन्यथा सोऽपि कथं नलरूपं धारयन्तीत्याशयः।

अत्रोभयार्द्धगतस्य प्रतीयमानक्रियोत्प्रेक्षाद्वयस्य संसृष्टिः। गुणरीती पूर्ववत् ॥२३॥

বাঙ্গালা—অন্যান্য রাজাদের সহিত নলের এতখানি বৈষম্য রহিয়াছে ইহা দময়ন্তী প্রত্যক্ষ দর্শন করুক ইহা ভাবিয়াই যেন বিধাতা দময়ন্তীর জন্য অন্যান্য রাজাদিগকে স্বয়ংবরে আনয়ন করিয়াছিলেন; আবার দিক্‌পালগণকেও নলের রূপ ধরাইয়া, তাঁহার সহিত স্পর্দ্ধা করাইয়া, সেই দিক্‌পালগণ হইতেও নলেরই প্রাধান্য যেন দময়ন্তীকে বলিয়াছিলেন ।২৩।

अन्वयः—पारिजाते भामाङ्गनप्राघुणिके (सति) धृतदिव्यरत्नैः चतुर्भिः देवद्रुमैः द्यौः इव, धृतदिव्यरत्नैः नलश्रीयमकैः चतुर्भिः यमाद्यैः नलं विना सभा अभूत् ॥२४॥

नलात् पूर्वमिन्द्रादयः सभायां गता इत्याह सभेति। पारिजाते तदाख्ये देववृक्षविशेषे, भामायाः सत्यभामाया अङ्गनस्य चत्वरस्य प्राघुणिके अतिथौ सति, श्रीकृष्णेनानीय सत्यभामाया अङ्गने स्थापिते सतीत्यर्थः, धृतानि स्वभावत एवोत्पादनेन गृहीतानि दिव्यानि रत्नानि यैस्तादृशैः, चतुर्भिः मन्दार-सन्तान-कल्पवृक्ष-हरिचन्दनरूपैः, देवद्रुमैर्देवतरुभिः, द्यौः स्वर्गभूमिरिव, धृतानि सौन्दर्यसम्पादनाय परिहितानि दिव्यानि रत्नानि रत्नमयाभरणानि यैस्तादृशैः, नलस्य या श्रीः शोभा तस्याः यमकैर्योजकैः, चतुर्भिः यमाद्यैर्यमेन्द्राग्निवरुणैः करणैः, नलं विना, सा सभा अभूत्। एकस्यैव पारिजातस्याभावे यथा चतुर्भिरपि देवतरुभिः स्वर्गभूमिः शोभिता नाभूत्, तथा एकस्यैव नलस्याभावे चतुर्भिरपि नलसदृशैर्देवैः सा सभा शोभिता नाभूदित्यर्थः।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासेन संसृज्यते। गुणरीती पूर्ववत् ॥२४॥

বাঙ্গালা—পারিজাত বৃক্ষ সত্যভামার উঠানে আসিলে, দিব্যরত্নধারী চারিটি দেবতরু দ্বারাও স্বর্গভূমি যেমন হইয়াছিল, দিব্যরত্নালঙ্কারশালী এবং নলমূর্ত্তিধারী যমপ্রভৃতি চারিজন দিক্‌পাল দ্বারাও, কেবল নলের অভাবে সেই সভাটী তেমন হইয়াছিল ।২৪॥

अन्वयः—ईश-भूषा-भस्मोपदिग्ध-स्फुट गौर-देहः फणीन्द्र वृन्दप्रणिगद्यमान प्रमोद-जीवाद्यनुजीवि वादः वासुकिः तत्र आगमत् ॥२५॥

"राजसु" इत्यादिना नागानां प्रस्थानमुक्तम्, इदानीं तेषां सभायामुपस्थितिमाह तत्रेति। ईशस्य महादेवस्य भूषार्थं यद्भस्म तदेव उपदिग्धः अङ्गरागस्तेन स्फुटः, स्पष्टं गौरः श्वेतवर्णो देहो यस्य स तथोक्तः, तथा फणीन्द्राणां सर्पश्रेष्ठानां वृन्देन समूहेन प्रणिगद्यमानः उच्यमानः प्रमोद-जीवादिः अनुजीविनां सेवकानां वादो वाक्यं यस्य सः तादृशः, वासुकिर्नागराजः, तत्र स्वयंवरसभायाम्, आगमत्। एतेन तस्य सानुचरमागमनं सूचितम्।

अत्र छेकानुप्रासोऽलङ्कारः। समासबाहुल्यादोजो गुणः, गौडी च रीतिः ॥२५॥

বাঙ্গালা—সর্পরাজ বাসুকি সেই সভায় আগমন করিলেন, মহাদেবের দেহ ভূষিত করিবার জন্য যে ভস্মরূপ অঙ্গরাগ রাখিয়াছিল, তাহা দ্বারা তাঁহার দেহ স্পষ্ট

द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापेऽसुरभूमिभूपैः।
तत्कालमालम्बि न केन यूना स्मरेषु पत्त्रानिलतूललीला ॥२६॥
रम्येषु हर्म्येषु निवेशनेन सपर्य्यया कुण्डिननाकनाथः।
प्रियोक्तिदानादरनम्रताद्यै-रुपाचरच्चारु स राजचक्रम् ॥२७॥
चतुःसमुद्रीपरिखे नृपाणा-मन्तःपुरे वासितकीर्त्तिदारे।
औदार्य्य-दाक्षिण्यदयादमानां (१) चतुष्टयी रक्षणसौविदल्ला ॥२८॥

উচ্চবর্ণ হইয়াছিল এবং প্রধান প্রধান সর্পগণ তাঁহার উদ্দেশে 'প্রসীদ' 'জীব' ইত্যাদি সেব-কের ন্যায় উচ্চারণ করিতেছিল।২৫।

অন্বয়—असुरभूमिभूपैः द्वीपान्तरेभ्यः तत् पुटभेदनं क्षणात् अवापे। तत्काले केन यूना स्मरेषु पत्त्रानिल तूल-लीला न अलम्बि ॥२६॥

द्वीपेति। असुरभूमीनाम् असुरराज्यानां भूपैः राजभिः, द्वीपान्तरेभ्यो यवादिभ्यः, तत् पुटभेदनं कुण्डिन नगरम्, क्षणात् सपदि, अवापे प्राप्तम्। कथमेतदित्याह-तत्कालं तस्मिन् समये, केन यूना तरुणेन, स्मरेषूणां कामबाणानां ये पत्त्राः कङ्कपत्त्राणि तेषां यः अनिलो वेगजनितो वायुस्तेन तूलस्य लीला सञ्चलनरूपावस्था, न अलम्बि न आश्रिता, अपि तु सर्वेणैव यूना अवलम्बीत्यर्थः। वायुचालितस्तूलो यथा क्षणादेव स्थानान्तरं याति तथा कामचालिता जगद्युवान एव झटिति तत्रागच्छन्निति सरलार्थः।

अत्र पूर्वार्द्धं प्रति परार्द्धवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, तूलस्येव लीलेति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना चानयोरङ्गाङ्गिभावेन सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः।

"पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्" इत्यमरः।

तत्कालमिति "अभिविधौ कालाध्वमानात्" इति द्वितीया ॥२६॥

বাঙ্গালা—অসুররাজ্যের রাজারা অন্যান্য দ্বীপ হইতে ক্ষণকাল মধ্যেই আসিয়া সেই কুণ্ডিননগরে উপস্থিত হইলেন। কারণ, তৎকালে পৃথিবীর কোন্ যুবক, কামবাণের কঙ্ক-পত্রের বায়ুবেগে তূলার অবস্থা না পাইয়াছিল।২৬।

অন্বয়—स कुण्डिन-नाकनाथः रम्येषु हर्म्येषु निवेशनेन सपर्य्यया प्रियोक्तिदानादरनम्रताद्यैः राज-चक्रं चारु उपाचरत् ॥२७॥

रम्येष्विति। स कुण्डिन-नाकनाथः कुण्डिनेन्द्रो भीमः, रम्येषु सुन्दरेषु, हर्म्येषु अट्टालिकासु, निवेशनेन स्थापनेन, सपर्य्यया स्नानादिद्वारा शुश्रूषया, प्रियोक्त्या दानेन वसनाभरणाद्युपहारवितरणेन आदरेण सम्माननेन नम्रताद्यैर्विनयादिभिश्च राजचक्रं समागतनृपतिसमूहम्, चारु मनोहरं यथा स्यात्तथा, उपाचरत् सत्कृतवान्।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः। गुणरीती पूर्ववत् ॥२७॥

বাঙ্গালা—সেই কুণ্ডিননগরের রাজা ভীম, মনোহর অট্টালিকায় সংস্থাপন, স্নান-প্রভৃতি দ্বারা শুশ্রূষা, প্রীতিকর বাক্যপ্রয়োগ, উপহার দান, আদর ও বিনয়াদি দ্বারা উপ-স্থিত রাজগণের সুন্দর সৎকার করিলেন।২৭।

অন্বয়—चतुःसमुद्रीपरिखे वासित-कीर्त्ति-दारे नृपाणाम् अन्तःपुरे औदार्य्य दाक्षिण्य दया दमानां चतुष्टयी रक्षणसौविदल्ला (भवति) ॥२८॥

---

(१) दाम दया इत्यत्र नातिदोषः।

अभ्यागतैः कुण्डिननासवस्य परोक्षवृत्तेष्वपि तेषु तेषु ।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वस्यो ऽपि नावापि नृपैर्विशेषः ॥२९॥

अङ्के विदर्भेन्द्रपुरस्य शङ्के न रुक्ममौ नैष तया समाजः ।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥

ननु सार्वभौमोऽपि भीमः कथमधीनान् नृपतीनुपाचरदित्याह चतुरिति । चतुर्णां समुद्राणां समाहार इति चतुःसमुद्री सैव परिखा यस्य तस्मिन्, वाचिता च स्थापिताः कीर्त्तिरेव दारा नियन्त्राम्भडिम्भो यत्र तस्मिन्, अन्तःपुरे इविवीरुपे अवरोधे, औदार्ये दातृत्वम्, दाक्षिण्यं सरलता, दया कृपा, दमो जितेन्द्रियता च तेषां चतुष्टयी चातुर्यमेव, रक्षणाय तत्कीर्त्तिदाराणां रक्षार्थं सौविदल्ला कञ्चुकिनी भवति । तथा च यथा अन्तःपुरे स्थापितायाः महिष्या रक्षणार्थं कञ्चुकिनी स्थाप्यते, तथा भूमण्डले स्थापितायाः कीर्त्तेरपि रक्षणार्थं राज्ञभिरौदार्यादिगुणचतुष्टयं स्थाप्यते । अत एव सार्वभौमोऽपि भीमस्तत्कीर्त्तिरक्षणार्थमेव अधीनानपि नृपतीनुपाचरदिति भावः ।

अतएवात्र अप्रस्तुताद्राजसामान्यात् प्रस्तुतस्य राजविशेषस्य भीमस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, समस्तवस्तुविषयं साङ्गरूपकञ्च, अनयोरङ्गाङ्गिभावेन सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"सौविदल्लाः कञ्चुकिनः" इत्यमरः ॥२८॥

বাঙ্গালা—চারিটী সমুদ্রই যাহার পরিখাস্বরূপ এবং যাহার ভিতরে কীর্ত্তিরূপ মহিষীকে স্থাপন করা হইয়াছে, ভূমণ্ডলরূপ রাজাদের সেই অন্তঃপুরের মধ্যে সেই কীর্ত্তিরূপ মহিষীকে রক্ষা করিবার জন্য উদারতা, সরলতা, দয়া এবং জিতেন্দ্রিয়তা এই চারিটী গুণ [illegible] কঞ্চুকীকে স্থাপন করা হইয়া থাকে ॥২৮॥

अन्वयः—अभ्यागतैः नृपैः कुण्डिननासवस्य परोक्षवृत्तेषु अपि तेषु तेषु जिज्ञासितस्वेप्सितलाभलिङ्ग [illegible] न अवापि ॥२९॥

[illegible] अभ्यागतैः नृपैः, कुण्डिननासवस्य कुण्डिनेन्द्रस्य भीमस्य, परोक्षवृत्तेष्वपि [illegible] तेषु तेषु [illegible] विषये, जिज्ञासित [illegible] स्वस्य [illegible]

[illegible]

বাঙ্গালা—[illegible]

[illegible]

[illegible]

पुरे पथिद्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभोऽपि किर्म्मीरमकारि तेषां महीभुजामाभरणप्रभाभि: ॥३१॥
विलासवैदग्ध्यविभूषणश्री-स्तेषां तथाभूत् परिचारकेऽपि ।
अज्ञासिषु: स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कञ्चित् ॥३२॥

रैनारायणस्य, जठरे उदरे, जगत् त्रिभुवनम्, प्रलयकाले न सम्ममौ इति न, तत्रैव एष समाज आगन्तुकराजसमूह, विदर्भेन्द्रपुरस्य कुण्डिननगरस्य अङ्के क्रोडे अभ्यन्तरे इत्यर्थ, न सम्ममौ नावकाशं लेभे इति न, अपि तु सम्मनावेवेति अहं मन्ये, तस्यातिविशालत्वादिति भाव ।

अत्र नाक्षेपनालङ्कार, हत्यनुप्रासश्चानुप्रासश्चेति च चटि । गुणरीती पूर्ववत् ॥३०॥

বাঙ্গালা—অগস্ত্যের হস্তে যেমন সমুদ্র ধরিয়াছিল এবং নারায়ণের উদরে যেমন ত্রিভুবন ধরিয়াছিল, তেমনই এই রাজসমূহ কুণ্ডিননগরের ভিতরে ধরিয়াছিল ইহা আমি মনে করি ।৩০।

अन्वय:—तत्र पुरे (शिल्पिभि) उत्सव वाञ्छया एव पथि द्वार-गृहाणि चित्रीकृतानि । तेषां महीभुजाम् आभरणभाभि नभ: अपि किर्म्मीरम् अकारि ॥३१॥

पुर इति । तत्र पुरे, उत्सवस्य विवाहानोदस्य वाञ्छयैव इच्छयैव, पन्थानो राजमार्गाश्च द्वाराणि च गृहाणि च तानि सर्वाण्येव, चित्रीकृतानि रङ्गादिना नानावर्णाङ्कितानि, शिल्पिभिरिति शेष । तथा तेषां महीभुजाम् आगतानां राज्ञाम्, आभरणप्रभाभि, नभोऽपि तदञ्चनाकाशमपि, किर्म्मीर चित्र नानावर्णमिति यावत्, अकारि कृतम् । तदेव आश्चर्यमिति भाव ।

अत्र नभस: किर्म्मीरकरणासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कार । गुणरीती पूर्ववत् ।

"चित्र किर्म्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमर ॥३१॥

বাঙ্গালা—শিল্পিগণ উৎসববৃদ্ধি করিবার ইচ্ছাবশতই সেই নগরের পথ, দ্বার ও গৃহসকল চিত্র করিয়াছিল এবং আগন্তুক রাজগণের অলঙ্কারের কিরণে সে স্থানের আকাশটাকেও চিত্র করিয়াছিল ।৩১।

अन्वय:—तेषां परिचारके अपि तथा विलासवैदग्ध्यविभूषणश्री अभूत्, यथा स्त्री शिशु-बालिशा तम् आगतं कञ्चित् नायकम् एव अज्ञासिषु ॥३२॥

विलासेति । तेषामागन्तुकानां राज्ञाम्, परिचारकेऽपि भृत्येऽपि का कथा अन्येऽपि, तथा तादृशी, विलास कटाक्षविक्षेपादिशृङ्गारचेष्टा वैदग्ध्यं सर्वविषयेषु चातुर्यं तस्या युक्ता विभूषणानां विशिष्टालङ्काराणां श्री शोभेति सा तदीया, अभूत् आसीत्, यथा स्त्रिय शिशव बालिशा मूर्खलोकाश्च ते तादृशा, तं परिचारकम्, आगतं कञ्चित् नायकमेव प्रधानं राजानमेव, अज्ञासिषुरज्ञासिषुर्ज्ञातवन्त ।

अत्र परिचारके स्त्रीशिशुबालिशानां नायकत्वभ्रमाद्भ्रान्तिमानलङ्कार । गुणरीती पूर्ववत् ॥३२॥

বাঙ্গালা—আগন্তুক রাজগণের কোন কোন ভৃত্যেরও তেমনই বিলাস, চতুরতা এবং অলঙ্কারের শোভা ছিল; যাহাতে স্ত্রীলোক, বালক এবং মূর্খলোকেরা সেই ভৃত্যকেই আগন্তুক কোন প্রধান রাজা বলিয়া মনে করিয়াছিল ।৩২।

अस्वेदगात्राश्चलचामरौघै-रमीलनेत्राः प्रतिवस्तुचित्रैः ।
अम्लानमाला विपुलातपत्रै-र्देवा नृदेवाश्च भिदां न भेजुः [१] ॥३३॥
अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिः सौवर्गवर्गो न जनैरचिह्नि ॥३४॥

अन्वयः—चल-चामरौघैः अस्वेदगात्राः प्रतिवस्तुचित्रैः अमीलनेत्राः विपुलातपत्रैः अम्लानमालाः देवाः नृदेवाश्च भिदां न भेजुः ॥३३॥

अस्वेदेति । चलचामरौघैः आन्दोलननिबन्धनचञ्चलचामरसमूहैरुपलक्षिताः, स्वभावत एव अस्वेदगात्रा घर्म्मरहिताङ्गाश्च । अन्यत्र तु चलचामरौघैः आन्दोलनवशात् चञ्चलचामरसमूहवातैः करणैः, अस्वेदगात्रा श्रीष्मापगमाद्घर्म्मशून्यगात्राः । प्रतिवस्तुषु गृहमार्गभूषणादिषु सर्व्वेष्वेव पदार्थेषु चित्रैर्दर्शननिबन्धनविस्मयैरुपलक्षिताः स्वभावत एव अमीलनेत्रा निर्निमेषनयनाश्च । अन्यत्र तु प्रतिवस्तुषु चित्रैर्दर्शननिबन्धनाश्चर्य्यैः करणैः, अमीलनेत्रा निमेषशून्यनयनाः । तथा विपुलातपत्रैर्विशालच्छत्रैरुपलक्षिताः, अम्लाना देवतरुजातत्वात् स्वभावत एवापर्य्युषिता मालाः पुष्पमाल्यानि येषां ते तादृशाश्च । अन्यत्र तु विपुलातपत्रैर्विशालच्छत्रावरणैर्हेतुभिः, अम्लाना आतपतापहेतोऽपि अविकृता मालाः साधारणपुष्पमाल्यानि येषां ते तथोक्ताश्च । देवा इन्द्रादयो देवताः, नृदेवा नरेन्द्रा आगता राजानश्च, भिदां भेदं वैपम्यमिति यावत्, न भेजुः न प्रापुः, अपि तु पूर्व्वोक्तधर्म्मसमूहवत्त्वात् अभेदमेव भेजुरित्यर्थः ।

अत एवात्र देवनृदेवगणयोर्भेदेऽप्यभेदाध्यवसायादतिशयोक्तिरलङ्कारः, अभेदभजनं प्रति अस्वेदगात्रादिपदार्थानां हेतुत्वात् काव्यलिङ्गञ्च, अनयोरङ्गाङ्गिभावेन सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ॥३३॥

বাঙ্গালা—স্বভাবতই দেবগণের গাত্রে ঘর্ম্ম হয় না, নয়নে নিমেষ থাকে না এবং দেবতরুজাত পুষ্পের মালা ম্লান হয় না; আবার তাঁহাদের উভয়পার্শ্বে চামর আন্দোলিত হইতেছিল, মস্তকে বিশাল ছত্র ধারণ করিয়াছিল এবং তাঁহারা প্রত্যেক বস্তু দর্শন করিয়াই বিস্ময়াপন্ন হইতেছিলেন। এ দিকে রাজাদেরও উভয়পার্শ্বে চামর আন্দোলিত হইতে থাকায় গাত্রে ঘর্ম্ম জন্মিয়াছিল না, প্রত্যেক বস্তুর বৈচিত্র্যদর্শনে নয়নে নিমেষ ছিল না এবং মস্তকের উপরে বৃহৎ ছত্র ধারণ করায় ফুলের মালাগুলি ম্লান হইয়াছিল না। অতএব তখন দেবগণও রাজগণ পরস্পর ভেদ অবলম্বন করিয়াছিলেন না ।৩৩।

অন্বয়ঃ—জনৈঃ দিগ্ভ্যঃ समेतेषु अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिः वाग्भिः व्यवहारवत्सु नरेषु सौवर्गवर्गः न अचिह्नि ॥३४॥

भाषायामपि राजभिः सह देवानां भेदो नासीदित्याह अन्योन्येति । जनैः कुण्डिनपुरवासिभिर्लोकैः, दिग्भ्यो नानादूरदेशेभ्य इत्यर्थः, समेतेषु समागतेषु, अन्योन्यभाषायाः परस्परवाक्यस्य अनवबोधे परस्परवैषम्यात् अज्ञानाभावविषयी या भीतिर्भयं तस्या हेतोः, संस्कारेण निर्वृत्ताः संस्कृत्रिमाः संस्कृताख्यास्ताभिः सर्व्वदेशसाधारणीभिरिति भावः, वाग्भिर्भाषाभिः, व्यवहारवत्सु व्यवहारं कुर्व्वत्सु, नरेषु राजादिमानुषेषु मध्ये, सौवर्गाः स्वर्गीयाणामिन्द्रादीनां नित्यसंस्कृतभाषाभाषिणामित्याशयः देवानां वर्गः समूहः, न अचिह्नि न पृथक्तया लक्षितः आकारवेशभूषादीनां समानत्वात् तदानीमुक्तहेतोः सर्व्वेषामेव संस्कृतभाषाव्यवहारेण भाषाया अपि च समानत्वादिति भावः ।

---

(१) न स्वेदिनश्चामरमारुतेन निमेषनेत्राः प्रतिवस्तुचित्रैः । म्लानस्रजो नातपवारणेन देवा नृदेवाश्च विभिन्नतत्र ॥

বাঙ্গালা — 'আ'র বন্ধু এই সখীর মুখখানিই হইবে' এইভাবে রাজ দের ... প্রত্যেক সেই সেইরূপ ইচ্ছার বিষয়ীকৃত সখীমুখের প্রতি নিজনয়নপ্রান্ত হইতে দময়ন্তী কর্পূর ও কস্তুরীর প্রবাহ সমর্পণ করিতেছিলেন ॥১০২॥

अन्वयः—आनन्दितोर्वीन्द्रमुखारविन्दैः स्मितेच्छु-दन्तच्छदकम्प किञ्चिद्दिगम्बरीभूत-रदांशुवृन्दैः कौमुदीनां हृदि मदं नुदन्तीम् ॥१०३॥

स्मितेति । आनन्दितानि आनन्देन प्रफुल्लीकृतानि उर्वीन्द्राणां राज्ञां मुखान्येव अरविन्दानि पद्मानि यैस्तैः ; स्मितेच्छोर्ईषद्धास्य कर्तुमिच्छतो दन्तच्छदयोरोष्ठाधरयोः कम्पेन चलनेन किञ्चिद्दिगम्बरीभूता ईषन्निरावरणा अन्तनाम्नः व्यक्तीभूता इत्यर्थः ये रदा दन्तास्तेषाम् अंशुवृन्दैः किरणसमूहैः करणैः, कौमुदीनां ज्योत्स्नानाम्, हृदि मनसि स्थितम्, मदं शुभ्रत्वाहङ्कारम्, नुदन्तीं खण्डयन्तीम् ; कौमुदीनामरविन्दविकासकत्वात् एषाम् तद्विकासकत्वादिति भावः ।

अत्रदन्तांशुवृन्दैः मदनोदनं प्रति उर्वीन्द्रमुखारविन्दानन्दनार्थस्य हेतुत्वात् काव्यलिङ्गम्, मुखारविन्देति निरङ्ग रूपकम्, कौमुदीमदनोदनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, इत्यासामङ्गाङ्गिभावेन सङ्करः ।
समासबाहुल्यादोजो गुणः, गौडी च रीतिः ॥१०३॥

বাঙ্গালা—দময়ন্তীর ওষ্ঠদ্বয় মৃদু হাস্য করিবার ইচ্ছায় কম্পিত হইলে, তাঁহার দন্তসমূহ ঈষৎ প্রকাশ পাইল, তখন সেই দন্তসমূহের কিরণসমূহ রাজগণের মুখারবিন্দকে প্রফুল্ল করায়, জ্যোৎস্নার মনের অহঙ্কার নষ্ট করিতে লাগিল ॥১০৩॥

अन्वयः—अन्वयः स्पष्टः ॥१०४॥

प्रत्यङ्गेति । प्रत्यङ्गं हस्तपादादिसर्वाङ्गेषु या भूषा अलङ्कारास्तासु या अङ्काः चिह्नीभूता मणयस्तेषां छलेन, येषु अङ्गेषु यानि पतितानि तेषु तेष्वङ्गेषु निश्चलानि स्थिरीभूतानि लोकानां नेत्राणि यस्याः ताम् । तथा हारस्य अग्रे नितम्बे जाग्रत् प्रकाशमानो यो नलदम्भ्रा ... रश्मिः किरणैः पीना स्थूला इति नाभे-र्गर्तः अन्धकारो यस्याः ताम् ।

अत्र मणिषु लोचनत्वारोपाच्छलादिशब्देन ... सापह्नवं रूपकम्, इत्यनयोः सङ्करः । पूर्वसमासबाहुल्यादोजो गुणः, गौडी च रीतिः ॥१०४॥

বাঙ্গালা—দময়ন্তীর প্রত্যেক অঙ্গের ... 'হল, তাহার

तद्गौरसारस्मितविस्मितेन्दु-प्रभाशिरःकम्परुचोऽभिनेतुम्।
विपाण्डुतामण्डितचामराली-नानामरालीकृतलास्यलीलाम् ॥१०५॥
तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम्।
स्वयं धृतामप्सरसां प्रसादं स्रजं हृदो मण्डनमर्पयन्तीम् ॥१०६॥

স্তনে তাঁহার যে অঙ্গে লোকের নয়ন পড়িয়াছিল, সেই অঙ্গেই তাহা নিশ্চল হইয়া রহিয়াছিল। আর হারের নিম্নদেশে যে মরকতমণি গাঁথা ছিল, তাহার কিরণে তাঁহার নাভি-গর্ত্তের অন্ধকারকে বৃদ্ধি করিয়াছিল ॥১০৪॥

अन्वयः—सान्वय एवायं श्लोक ॥१०५॥

तदिति। तस्या दमयन्त्या गौरः शुभ्रवर्ण एव सारः स्थायी यस्य तत् गौरसारं यत् स्मितं मन्दहास्यं तेन तत्सौन्दर्यदर्शनेनेत्यर्थः विस्मिता आश्चर्यान्विता या इन्दुप्रभा चन्द्रस्य ज्योत्स्ना तस्या यं शिरःकम्पो विस्मयसूचकं मस्तकसञ्चालनं तस्य रुचं शोभाम्, अभिनेतुम् अनुकर्तुम्, विपाण्डुतया विशेषशुभ्रवर्णेन मण्डिता भूषिता या चामराणाम् आली श्रेणी सैव नानामराल्यो बहुतरा हंस्यस्ताभिः कृता लास्यस्य नृत्यस्य लीला विलासो यस्याः ताम्, मन्दहास्यं कुर्वतीं चामरैर्वीज्यमानाञ्चेति निष्कर्षः।

अत्र इन्दुप्रभाया विस्मितत्वासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिः, चामराल्येव नानामरालीति निरङ्गं केवलरूपकम्, मरालीं मरालीति यमकम्, छेकानुप्रासश्चेति संसृष्टिः। गुणरीती पूर्ववत् ॥१०५॥

বাঙ্গালা।—দময়ন্তীর মন্দহাস্য শোভায়, চন্দ্রের জ্যোৎস্না বিস্ময়াপন্ন হইয়া মস্তকসঞ্চালন করিয়াছিল, সেই শোভার অনুকরণ করিবার জন্য, শুভ্রতাশোভিত চামরশ্রেণীরূপ হংসীগণ নৃত্যলীলা করিতেছিল ॥১০৫॥

अन्वयः—तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम् अप्सरसां स्वयं धृतां स्रजं हृदः मण्डनं प्रसादम् अर्पयन्तीम् (इव) ॥१०६॥

तदिति। तस्या दमयन्त्या अङ्गं भुज्यन्त इति भोगाः [illegible]

[illegible]

[illegible] ॥१०६॥

বাঙ্গালা।—[illegible]

तारा रदानां वदनस्य चन्द्रं कचाः कचालाश्च नभो जयन्तीन् ।
आकण्ठमच्छोदि तव भवूनि मनोस्तः कस्य न मोदयन्तीन् ॥१०
अनङ्गवागङ्कितकेवलाङ्गीं स्तवाविकाध्यननिवेद्यलक्ष्मीन् ।
इमां विमानेन सभा विगन्तो परावपाङ्गै त्व राजराजि ॥१०८॥
आलोकनी तत्र न कोऽपि भूपस्तत्र त्रिं [illegible]जोवनद्र तस्य ।
उत्तेजुरङ्गानि मुदा न यस्य विनिद्र[illegible]ङ्कु रदन्तुगानि ॥१०९॥

अङ्गुष्ठमूर्द्ध्ना च निपीडितायाः मध्येन भागेन च मध्यमायाः।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥११०॥

अस्मिन् समाजे मनुजेश्वराणां [१] तां खञ्जनाक्षीमवलोक्य केन।
पुनः पुनर्लोलितमौलिना न भ्रुवोरुदक्षेपितरां द्वयी वा ॥१११॥

स्वयंवरस्याजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः।
इदं मुदा विह्वलचित्तभावादवादि खण्डाक्षरजिह्मजिह्मम् ॥११२॥

राणि उच्चावचानि सन्ति, न उल्लेसुः हर्षं न प्रापुः. असौ तादृशः, कोऽपि भूपो राजा, तत्र सभायाम्, नासीत्, दमयन्त्याः सौन्दर्य्यदर्शनेन सर्व एव राजानो रोमाञ्चिताङ्गा जाता इत्यर्थः।

अत्र भावोदयालङ्कारश्छेकानुप्रासेन स सृज्यते। प्रसादो गुणः, वैदर्भी च रीतिः ॥१०९॥

বাঙ্গালা—দময়ন্তীর শরীরের সৌন্দর্য্য দেখিয়া সকলেরই বিস্ময় জন্মিয়াছিল, সুতরাং যাঁহার অঙ্গ, অনুরাগানন্দে উদ্গত রোমাঞ্চ দ্বারা উঁচু নীচু হইয়া প্রীতি লাভ না করিয়াছিল; এমন কোন রাজাই সে সভায় ছিলেন না ॥১০৯॥

अन्वयः—तत्र केन जनेन भैमीम् अवलोक्य अङ्गुष्ठमूर्द्ध्ना च मध्यमायाः मध्येन भागेन च निपीडितायाः तर्जनी न आस्फोटि नाम ॥११०॥

अङ्गुष्ठेति। तत्र सभायाम्, केन जनेन, भैमीं दमयन्तीम्, अवलोक्य, अङ्गुष्ठस्य वृद्धाङ्गुलेर्मूर्द्ध्ना अग्रदेशेन च, मध्यमाया अङ्गुलेः, मध्येन भागेन च, निपीडितम् अवनतीकृतम् अग्रं यस्याः सा तादृशी, तर्जनी अङ्गुली, न आस्फोटि न स्फोटिता, न स्फोटनशब्दः कृतः, अपि तु सर्वैरेवेत्यर्थः। अयं खलु रम्यपदार्थदर्शने लोकस्वभाव इत्याशयः। नाम सम्भावनायाम्।

अत्रार्थापत्तिरलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः ॥११०॥

বাঙ্গালা—সেই সভায় কোন্ ব্যক্তি দময়ন্তীকে দেখিয়া, বুড়ে আঙ্গুলের অগ্রভাগ ও মধ্যমা অঙ্গুলির মধ্যভাগ দিয়া চাপিয়া ধরিয়া, তর্জনী অঙ্গুল না ফুটাইয়াছিল ॥১১০॥

अन्वयः—अस्मिन् समाजे मनुजेश्वराणां (मध्ये) केन, तां खञ्जनाक्षीम् अवलोक्य पुनः पुनः लोलितमौलिना (सता) भ्रुवोः द्वयी वा न उदक्षेपितराम् ॥१११॥

अस्मिन्निति। अस्मिन् समाजे सभायाम्, मनुजेश्वराणां राज्ञां मध्ये केन जनेन, तां खञ्जनौ पक्षिविशेषौ इव अक्षिणी चक्षुषी यस्यास्तां दमयन्तीमवलोक्य, पुनः पुनर्लोलितमौलिना कम्पितमस्तकेन सता, भ्रुवोर्द्वयी वा न उदक्षेपितराम् अतिशयेनोत्क्षिप्ता, अपि तु सर्वैरेवेत्यर्थः।

अत्राप्यर्थापत्तिरलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः ॥१११॥

বাঙ্গালা—সেই সভায় রাজাদের মধ্যে কোন্ ব্যক্তি সেই খঞ্জননয়না দময়ন্তীকে দেখিয়া, বার বার মস্তক কম্পিত করিয়া, ভ্রূযুগল উত্তোলিত না করিয়াছিলেন ॥১১১॥

अन्वयः—अथ भूमिनाथैः भैमीं स्वयंवरस्य अजिरम् आजिहानां विभाव्य मुदा विह्वलचित्तभावात् इदं खण्डाक्षर-जिह्मजिह्मम् अवादि ॥११२॥

स्वयंवरस्येति। अथ राज्ञां रोमाञ्चानन्तरम्, भूमिनाथैः राजभिः, भैमीं दमयन्तीम्, स्वयंवरस्य तदनुष्ठानाय, अजिरम् अङ्गनम्, आजिहानाम् आगताम्, विभाव्य दृष्ट्वा, मुदा आनन्देन, विह्वलचित्तभावात् विह्वल-

---

(१) मनुजवरेण।

रम्भादिलोभात् कृतकर्म्मभिर्मा शून्यैव भूर्भूत् सुरभूमिपान्थैः ।
इत्येतयालोपि दिवोऽपि पुंसां व मत्यमत्यप्सरसा रसायाम् ॥११३॥
रूपं यदाकर्ण्य जनाननेभ्य स्तत्तद्दिगन्तादयमागमाम ।
सौन्दर्य्यसारादनुभूयमाना दस्यास्तदस्मादद्य नाकनीयः ॥११४॥

स्खलनात्, इदं वस्तुनाऽप्रकारम्, खुरैः रुग्णपूर्वैः रङ्गोत्थादिभिरित्यर्थः, चवर्वैर्घर्षे जिह्वा कुटिला जिह्वा दधिन् अकरोत् तदन्या तद, अनादि उक्तम् ।

अत्र च्छेकानुप्रासवृत्त्यनुप्रासयो संसृष्टि । प्रसादो गुण, वैदर्भी च रीतिः ।

आजिह्मतामिति "कौटिल्य गतौ" इत्यस्मानिम प्रयोग. ॥११२॥

বাঙ্গালা—অনন্তর, দময়ন্তী স্বয়ংবরসভার প্রাঙ্গণে আসিয়াছেন দেখিয়া আনন্দে অন্তঃকরণ আকুল হওয়ায় রাজারা এই রূপ বলিতে লাগিলেন ; তখন অসম্পূর্ণ অক্ষর উচ্চারণ করায় তাঁহাদের জিহ্বা যে বক্র হইয়াছিল, তাহা বুঝা গিয়াছিল ॥১১২॥

अन्वयः—रम्भादिलोभात् कृतकर्म्मभिः सुरभूमिपान्थैः भूः शून्या एव मा भूत् इति अप्सरसा एतया पुंसां दिवः अपि रसाया वैमत्यम् अलोपि ॥११३॥

रम्भेति । रम्भादीनामप्सरसां लोभाल्लोभवशात्, कृतानि कर्म्माणि स्वर्गजनकानि यागयुद्धादीनि यैस्तैः सुरभूमि स्वर्गलोकस्य पान्थैः पथिकैः स्वर्गं [illegible]रित्यर्थः, भूः पृथिवी, शून्यैव मा भूदिति विचार्य्य-त्यर्थः, सौन्दर्य्ये अप्सरसोऽतिक्रान्ता [illegible] अप्सरसोऽपि [illegible] एतया दमयन्त्या, पुंसां [illegible] दिवोऽपि स्वर्गादपि, रसाया पृथिव्याम्, वैमत्यमनिच्छा, अलोपि नाशिता, [illegible] पृथिव्यामेव स्थितीच्छा सम्पादितेत्यर्थः ।

अत्र मतौ [illegible] वाचकोऽलङ्कारः, इत्यनुप्रासच्छेकानुप्रासयोश्च तेषां च संसृष्टिः । गुणरीती पूर्ववत् ।

दिव इति "अपादानेऽधिकरणे च कर्म्मणोरप्रवृत्तिविषये" इति पञ्चमी । अपरिवाचे ॥११३॥

বাঙ্গালা—স্বর্গের রম্ভাপ্রভৃতি অপ্সরাদিগের সম্ভোগলোভে, পুরুষেরা যুদ্ধযাগাদি কার্য্য করিয়া, স্বর্গের পথিক হইয়া যাওয়ায় পৃথিবী যেন শূন্য হইয়া যায় না এইরূপ বিবেচনা করিয়াই যেন অপ্সরা অপেক্ষাও সুন্দরী ইনি, পুরুষদিগের স্বর্গাভিলাষ পৃথিবীর প্রতি অনিচ্ছা লোপ করিয়াছেন ॥১১৩॥

अन्वयः—अयं जनाननेभ्यः अस्याः यत् रूपम् आकर्ण्य तत्तद्दिगन्तात् आगमाम, तत् अस्याः अनुभूयमानात् सौन्दर्य्यसारात् अकनीयः न ॥११४॥

रूपमिति । वयं जनानन जनेभ्यो मुखेभ्यः, अस्याः दमयन्त्याः, यत् रूप सौन्दर्यम्, बहु प्रचुर यथा [illegible], आकर्ण्य श्रुत्वा, तत्तद्दिगन्तात् [illegible], तत् रूपम्, अस्याः अनुभूयमानात् [illegible] सौन्दर्य्यसारात्, अकनीयः अल्पतरं न, अपि तु अल्पतरमेवेत्यर्थः । [illegible] श्रुतरूपेण [illegible] तावत् श्रुतमस्येव भूयानिति भावः ।

अत्र [illegible] व्यतिरेकोऽलङ्कारः । गुणरीती पूर्ववत् ।

आगमामेति आङ्पूर्वकगमेः अद्यतन्या (लुङ्) उत्तमपुरुषबहुवचने [illegible] रूपम् ॥११४॥

বাঙ্গালা—আমরা লোকমুখে ইঁহার যে রূপ অনেক শুনিয়া সেই সেই দিগন্ত হইতে আসিয়াছি, সেই রূপ, বর্ত্তমান এই রূপ অপেক্ষা অল্পতর নহে নহে ॥১১৪॥

व्यधत्त सौधे रतिकामयोस्तद्भक्तं वयोऽस्या हृदि वासभाजोः।
तदग्रजाग्रत्पृथुशातकुम्भकुम्भौ न सम्भावयति स्तनौ कः ॥१२२॥

अस्या भुजाभ्यां विजिताद्विसात् किं पृथक् करोऽस्मिन्नपि (?) तत्प्रसूनम्।
इहेष्यते तत्र रुहाः स्त्रियः कैर्न गीयते वा कर एव तोत्रैः ॥१२३॥

[illegible] । यतो नभस्य एतेषामेतारतम्यं वक्तुमर्हति [illegible] विहाय मनरदम्भतोरेव नयन-[illegible] । [illegible] सर्वतान्या निवेदित इति भावः । [illegible] हेतुत्वात् काव्यलिङ्गम्, [illegible] क्रियोत्प्रेक्षा वा, तारतम्योल्लिखी-[illegible] । महाकवी गुणः, वैदर्भी च रीतिः । [illegible] ॥१२१॥

বাঙ্গালা—'তারতম্যজিজ্ঞাসু লোকেরা পদ্মের সহিত ইহার নয়নযুগলের তারতম্য, উভ-[illegible] নিকট জিজ্ঞাসা করুক' এইরূপ অভিপ্রায় করিয়াই যেন বিধাতা [illegible] ইহার ভিতরে [illegible] করিয়াছেন ॥১২১॥

अन्वयः—तद्भक्तं वयः अस्याः हृदि वासभाजोः रतिकामयोः सौधं व्यधत्त (इव)। [illegible] तदग्र-जाग्रत् पृथु शात-कुम्भ कुम्भौ न सम्भावयति ॥१२२॥

व्यधत्तेति । तयो रतिकामयोरेव भक्तं [illegible], वयो यौवनं [illegible] अस्या दमयन्त्या, हृदि हृदये, [illegible] अस्या एव [illegible], तयोः सौधयोरग्रे उपरिभागे जाग्रती [illegible] शातकुम्भस्य सर्वस्य कुम्भौ [illegible], न सम्भावयति न मन्यते, [illegible] । तदा च [illegible] । [illegible] । महाकवी गुणः, वैदर्भी च रीतिः ॥१२२॥

বাঙ্গালা—[illegible]

अन्वयः—अस्याः भुजाभ्यां विजितात् विसात् [illegible] ॥१२३॥

अस्या इति । अस्या दमयन्त्याः, भुजाभ्यां [illegible]

नमः करेभ्योऽस्तु विधेर्न वास्तु स्पृष्टं धियाप्यस्य न किं पुनस्तैः।
स्पर्शादिदं स्याल्लुलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपम् ॥१२६॥
इमां न स्रष्टीमसृजत् कराभ्यां वेधाः कुशाध्यासनकर्कशाभ्याम्।
शृङ्गारधारा मनसा न शान्तिविश्रान्तिधन्वाध्वमहीरुहेण ॥१२७॥

ज्ञानर्तिं वर्त्तते, इति विषये, न अस्माकम्, योग्याया एतत्तुल्यस्त्र्या अनुपलम्भनम् अनुपलब्धिरेव वर्त्तते। तथा च मर्त्त्यलोके यद्यस्या तुल्या कापि तिष्ठेत् तदा उपलभ्येत, अत नोपलभ्यत इति नास्त्येवेति भाव। अत तर्हि स्वर्गे पाताले, वा तिष्ठेदित्याह—यदि नाके स्वर्गे, अथवा अधोभुवने पाताले, अस्ति योग्या तिष्ठति, तदा तात-स्तत्र ततस्तत आगतस्य स्वर्गात् पातालाद्वा अत्रोपस्थितस्य लोकस्य देवगणस्य नागगणस्य वा बाध [illegible] च घर्षं, न स्यात्। अत स्वर्गे पाताले अपि अस्या योग्या नास्त्येवेति भावः।

अत्रोपमानानुपादानात् लुप्तोपमालङ्कारः। उपजाती पूर्ववत्।

ततस्तत आगत इति तावतत, एवमादित्वादपि रूपम् ॥१२५॥

বাঙ্গালা—মর্ত্ত্যলোকে ইহার তুলনা করিবার জন্য, ইহার তুল্য অন্য রমণী আছে, এ বিষয়ে সে তুল্য রমণী আমাদের জ্ঞান গোচর হইতেছে না। তার পর, স্বর্গে কিম্বা পাতালেও যদি ইহার তুল্য রমণী থাকিত, তাহা হইলে সেই সেই লোক হইতে আগত লোকদিগের এখানে সংঘর্ষ হইত না ॥১২৫॥

अन्वयः—विधेः करेभ्यः नमः अस्तु, वा न अस्तु। अस्य धिया अपि न स्पृष्टम्, किं पुनः [illegible] तैः। हि इदं शिल्पं स्पर्शात् लुलितं स्यात्। अनङ्गतया मनोभुवः अनुरूपम् ॥१२६॥

नम इति। विधेर्ब्रह्मणः, करेभ्यो हस्तेभ्यः, अस्माकं नमोऽस्तु; अस्याः सृष्टिकारकतया निरतिशय-नैपुण्यवत्त्वेन पूजनीयत्वादिति भावः। वा अथवा, न नमोऽस्तु, सृष्टिकारकत्वस्याभावादित्याशयः। ननु कथं न सृष्टिकारकत्वमित्याह—अस्य विधेः, धिया बुद्ध्यापि, न स्पृष्टम्, इदं शिल्पमिति शेषः; किं पुन-स्तैर्हस्तैः स्पृष्टं भवेदित्यर्थः। अतो न सृष्टिकारकत्वमिति भावः। अथ कथं न स्पृष्टमित्याह—हि यस्मात्, इदं दमयन्तीरूपमतिकोमलं शिल्पम्, स्पर्शात् हस्तादिना धारणात्, लुलितं मर्दितं स्यात्। तदा केन नाम सृष्टमित्याह—अनङ्गतया अङ्गाभावात् स्पर्शाभावेनैतदर्थं, मनोभुवः कामस्यैव, अनुरूपं सृष्टौ योग्यम्। अतः कामेनैव सृष्टमिदमित्याशयः।

अत्र स्पर्शात् लुलितत्वासम्बन्धेऽपि तत्सम्बन्धादेशात् अतिशयोक्तिः, मनोभुवः सृष्टानुरूपत्वसम्बन्धेऽपि तत्-सम्बन्धादया अतिशयोक्तिरित्यनयोर्निर्विरोधेन [illegible] सृष्टिः। उपजाती पूर्ववत् ॥१२६॥

বাঙ্গালা—বিধাতার চারি খানা হাতকেই প্রণাম করি; অথবা সে গুলিকে প্রণাম করা হইবে না। কারণ, তাঁহার বুদ্ধিও এই শিল্পটিকে স্পর্শ করে নাই, তাহাতে সে হাত স্পর্শ করিবে কি করিয়া। যেহেতু, এমন কোমল শিল্প, স্পর্শ করিলে এলাইয়া যাইত। অতএব অঙ্গ না থাকায় কামদেবের পক্ষেই ইহা সৃষ্টি করিবার যোগ্য ॥১২৬॥

अन्वयः—वेधाः कुशाध्यासनकर्कशाभ्याम् कराभ्याम् इमाम् न असृजत्, शान्ति-विश्रान्ति-धन्वाध्व-महीरुहेण मनसा (अपि) शृङ्गारधाराम् इमाम् न असृजत् ॥१२७॥

इमामिति। वेधा विधाता, कुशस्य कुशाङ्कुरस्य अध्यासनेन [illegible] कर्कशाभ्यां कठिनाभ्याम् कराभ्यां [illegible], तां कोमलाङ्गीम्, इमां दमयन्तीम्, न असृजत् न निर्मितवान्, कठिनस्पर्शेन कोमल-[illegible] [illegible] लुलितत्वप्रसङ्गादिति भावः। अथ तदा [illegible] [illegible] [illegible]—[illegible] [illegible]

उल्लास्य धातुस्तुलिता करेण श्रोणी किमेषा स्तनयोर्गुरुर्वा ।
तेनान्तराले त्रिभिरङ्गुलीनाम् उदीतमध्यत्रिवलीविलासा ॥१२८॥
निद्रामृतोद्यन्नवनीतजाङ्गीम् एतां क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाभूत् निद्रालुना दुर्घटमम्बुजेन ॥१२९॥

रसस्य विश्रान्तये विश्रामाय धन्वाध्वनि मरुभूमिपथे महीरुहेण वृक्षस्वरूपेण केवलशान्तरसाश्रयेणेत्यर्थः, मनसापि, शृङ्गारधारा शृङ्गाररसप्रवाहरूपाम्, इमां न असृजत्, विपरीतेन विपरीतसृष्ट्यसम्भवादिति भावः ।

अत्र वेधसः सृष्टिसम्बन्धेऽपि तदसम्बन्धादतिशयोक्तिः, सृष्ट्यसम्भवं प्रति कुशेत्यादिपदार्थस्य शान्तीत्यादिपदार्थस्य च हेतुत्वात् काव्यलिङ्गद्वयम्, दमयन्त्यां शृङ्गारधारात्वारोपात् मनसि धन्वाध्वमहीरुहत्वारोपाच्च निरङ्ग केवलरूपकद्वयञ्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । सन्धार्थस्य दुरुहत्वादोजो गुणः, गौडी च रीतिः ।

"समानौ मरुधन्वानौ" इत्यमरः ।

एतदनुरूपश्लोको यथा विक्रमोर्वश्याम्— "अस्याः सर्गविधौ" इत्यादि ॥१२७॥

বাঙ্গালা—সর্বদা কুশাঙ্কুরের থাকায় বিধাতার হাত দুইখানা, কঠিন হইয়া রহিয়াছে; সুতরাং তাহা-দ্বারা তিনি এই কোমলাঙ্গীকে সৃষ্টি করিতে পারেন নাই। আবার তাঁহার মনটীও, শান্তরসের বিশ্রামের জন্য মরুপথের বৃক্ষস্বরূপ হইয়াছে; অতএব তিনি সে মন দ্বারাও, শৃঙ্গাররসের প্রবাহরূপা এই দময়ন্তীকে সৃষ্টি করিতে সমর্থ হন নাই ॥১২৭॥

अन्वय—एषा श्रोणी गुरुः स्तनयोः वा गुरुः (इति ज्ञातुं) धातुः करेण उल्लास्य तुलिता किम्? तेन अङ्गुलीनां त्रिभिः अन्तरालैः उदीत-मध्य-त्रिवली विलासा किम् ॥१२८॥

उल्लास्येति । एषा दमयन्ती, श्रोणी नितम्बावच्छेदे, गुरुर्विशालत्वाद्भारवती, स्तनयोः स्तनयुगावच्छेदे वा गुरुः, इति ज्ञातुं धातुर्ब्रह्मणः, करेण हस्तेन, उल्लास्य उत्तोल्य, एषा तुलिता परिमिता किम् । तेनैव हेतुना, धातुस्तस्यामङ्गुलीनां त्रिभिरन्तरालैरभ्यन्तरैः कारणैः, उदीता उत्पन्ना मध्ये मध्यभागे त्रिवलीविलासो यस्याः सा तादृशी जाता किम् ।

अत्र वाच्ययोः क्रियोत्प्रेक्षयोर्मिथो निरपेक्षतया संसृष्टिः । अकरुणा रामामुत्कण्ठासम्प्रतया न न्यूनपदत्वदोषः । प्रसादो गुणः, वैदर्भी च रीतिः ॥१२८॥

বাঙ্গালা—ইনি নিতম্বের দিকে ভারী? না স্তনের দিকে ভারী? ইহা জানিবার জন্য বিধাতার হস্তই কি ইহাকে তুলিয়া ধরিয়া মাপিয়াছিল? সেই জন্যই চারিটী আঙ্গুলের তিনটী ফাঁক দিয়া মধ্যে তিনটি থর বাহির হইয়াছে কি? ॥১২৮॥

अन्वयः—इन्दुः एतां निद्रामृतोद्यन्नवनीतजाङ्गीं क्रमोन्मीलितपीतिमानं कृत्वा आत्मना अस्याः मुखम् अभूत् । (किन्तु) निद्रालुना अम्बुजेन दुर्घटम् ॥१२९॥

निद्रेति । इन्दुश्चन्द्रः, एतां दमयन्तीम्, निजामृतात् उद्यत् उत्पद्यमानं यत् नवनीतं तत्सारस्तज्जान्या-यन्त इति तानि तादृशानि अङ्गानि यस्यास्तां तथोक्ताम्, तथा क्रमेण उन्मीलितं प्रकाशितः पीतिमा पीतत्वं यस्याः ताञ्च, नवनीतस्यापि क्रमेण पीतिमोत्पत्तेरिति भावः, कृत्वा, आत्मना स्वयम्, अस्या दमयन्त्याः, मुखम् अभूत् । ननु पद्ममप्यस्या मुखं भवितुमर्हतीत्याह— निद्रालुना रूसदस्यचन्द्रामृतसम्पर्कात् सङ्कोचशीलेन, अम्बुजेन पद्मेन, दुर्घटम्, अस्या मुखं घटयितुमशक्यम् । अतश्चन्द्र एव मुखमभूदिति भावः । इयं नवनीतवत् कोमलाङ्गी क्रमप्रकाशितपीतवर्णा चन्द्रमुखी चेति निष्कर्षः ।

अत्र चन्द्रो मुखभवनाद्यसम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिः । गुणरीती पूर्ववत् ॥१२९॥

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि पुष्पैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥१३०॥
कृतिः स्मरस्यैव न धातुरेषा नास्या हि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसापि वेधा निर्जीयते स स्मरकिङ्करेण ॥१३१॥
गुरोरपीमां भणदोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् ।
श्रमः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥१३२॥

বাঙ্গালা—চন্দ্র, স্বকীয় অমৃতদ্বারা নানা দ্বারা ইহার অঙ্গ নির্মাণ করিয়া, তাহাতেই ক্রমশঃ পীতবর্ণ প্রকাশ করিয়া, পরে নিজেই ইহার মুখ হইয়াছেন, কিন্তু চন্দ্রসম্পর্কবশতঃ সঙ্কোচশালী পদ্ম ইহার মুখ নির্মাণ করিতে পারিত না ॥১২৯॥

अन्वयः—चारुः सः मधुः एव अस्याः कारुः, (येन सः) मलयानिलेन श्वासं वितेने, पुष्पैः अमूनि अङ्गकानि विदधे, पिकपञ्चमेन (च) वाचं चकार ॥१३०॥

अस्या इति । चारुः कुसुमविकासादिना मनोहरः । अतएव चार्वाणिना सृजतीति भावः । स प्रसिद्धः मधुर्वसन्त एव, अस्या दमयन्त्याः, कारुः शिल्पी निर्मातेति यावत् । येन हि सः, मलयानिलेन दक्षिणवायुना, अस्याः श्वासं वितेने निर्ममे, श्वासस्यापि तद्वत् सुखसुगन्धित्वादित्याशयः । पुष्पैश्चम्पकादिभिः, अमूनि अङ्गकानि विदधे चकार, चम्पकादीनामिवाङ्गानां पीतत्वकोमलत्वादिदर्शनादित्यभिप्रायः । तथा पिकस्य कोकिलस्य पञ्चमेन स्वरेण, वाचं वाक्यम्, चकार तथैव मधुरत्वादिति भावः । मलयादीनां वसन्तस्योपकरणत्वात् स एव तैरस्या निर्मातेति तात्पर्यम् ।

अत्र वसन्तस्य निर्माणासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ॥१३०॥

বাঙ্গালা—মনোহর সেই বসন্তকালই ইহার নির্মাতা। কারণ, সেই বসন্তকাল মলয়বায়ু দ্বারা শ্বাস নির্মাণ করিয়াছে; চম্পকপ্রভৃতি পুষ্প দ্বারা এই সকল অঙ্গ সৃষ্টি করিয়াছে এবং কোকিলের পঞ্চম স্বর দ্বারা বাক্য প্রস্তুত করিয়াছে ॥১৩০॥

अन्वयः—एषा स्मरस्य एव कृतिः, न धातुः । हि अस्याः शिल्पी इतरकारुजेयः न (भवति) । स्मरकिङ्करेण वयसा अपि रूपस्य शिल्पे स वेधा निर्जीयते ॥१३१॥

कृतिरिति । एषा दमयन्तीरूपा, स्मरस्य कामस्यैव, कृतिर्निर्माणम्, किन्तु न धातुर्ब्रह्मणः कृतिः । तत्र हेतुमाह — हि यस्मात्, अस्या दमयन्त्याः, शिल्पी निर्माता, इतरैः कारुभिः शिल्पिभिः, जेयो जेतव्यो न भवति, अस्याः सर्वश्रेष्ठसौन्दर्यवत्त्वेन एतच्छिल्पिनोऽपि सर्वश्रेष्ठत्वादिति भावः । अथ ब्रह्मापि इतरशिल्पिजेयो न भवतीति तस्यापि ... रूपस्य सौन्दर्यस्य शिल्पे निर्माणे, वयसा यौवनेनापि, स्मरस्य किङ्करेण ... स वेधा ब्रह्मा, निर्जीयते सर्वथैव पराभूयते । तथा च ब्रह्मणा ... निर्मीयते, ... यौवनेन । तेन स्मरकिङ्करेणैव यौवनेन वेधसो जेतव्यत्वात् निर्जित इति भावः ।

अत्र स्मरस्य कृतसम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिः, तथा धातुर्निषेधनात् स्मरस्य कृतित्वसाधनादपह्नुतिश्च तयोः सङ्करः । गुणरीती पूर्ववत् ॥१३१॥

বাঙ্গালা—কামদেবই ইহাকে নির্মাণ করিয়াছেন, বিধাতা নহে। কারণ, ইহার নির্মাতা অন্য কোন শিল্পীর জেতব্য হইতে পারেন না। কিন্তু কামকিঙ্কর যৌবন রূপের শিল্পে, সৌন্দর্য্যশালিনী ... বিধাতাকে পরাজিত করিয়াছে ॥১৩১॥

आख्यातुमच्छिन्नजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु ।
गाथासुधाश्लेषकलाविलासैरलञ्चकाराननचन्द्रमिन्द्रः ॥१३३॥
स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा ।
हैमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मे न कापि ॥१३४॥

अन्वयः—इमां भणत् गुरोः अपि श्रीठकण्ठं निरुक्ति गर्वं छिदया विनेतुम्, भवं विहाय मुक्तिं गतानाम् अनुतापनाय स्मरस्य एव श्रमः ॥१३२॥

ननु स्मरस्य तन्निर्माणे किं प्रयोजनमित्याह गुरोरिति । इमां दमयन्तीम्, भणत् वर्णयत्, गुरोरपि अन्यस्य का कथा स्वयं बृहस्पतेरपि, श्रीठकण्ठम् कर्म्म, निरुक्तौ अन्यैर्वर्णयितुमशक्यस्यापि विषयस्य निर्वचनविषये यो गर्वः अहङ्कारस्तस्य छिदया खण्डनेन, विनेतुं त्वया निरुक्तिः पुनर्न कर्त्तव्या इति शिक्षयितुम्, तथा भवं संसारम्, विहाय मुक्तिं गतानां जीवन्मुक्तानां नारदादीनाम्, अनुतापनाय 'हा दमयन्तीयुक्तं संसारं विहाय कथं वयं मुक्ताः स्मः' इत्यमनुतापं जनयितुञ्चेत्यर्थः, स्मरस्य कामस्यैव, श्रमो दमयन्त्या निर्माणे परिश्रमः, न पुनर्ब्रह्मादेरिति भावः ।

अत्रापि स्मरस्य श्रमासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिः, एवशब्दार्थतात्पर्य्येण ब्रह्मादिव्यपोहनादार्थी परिसंख्या चानयोरङ्गाङ्गिभावेन सङ्करः । गुणरीती पूर्ववत् ।

श्रीठकण्ठमिति प्राण्यङ्गत्वादेकवचनम् ॥१३२॥

বাঙ্গালা—স্বয়ং বৃহস্পতিরও, ওষ্ঠ এবং কণ্ঠ যখন ইহাকে বর্ণনা করিবার ইচ্ছা করে, তখন তাহাদের নিরূপণের অহঙ্কারকে চূর্ণ করিয়া, তাহাদিগকে শিক্ষা দিবার জন্য এবং সংসার পরিত্যাগ করিয়া জীবন্মুক্ত নারদপ্রভৃতির অনুতাপ জন্মাইবার জন্য, কামদেবেরই এই পরিশ্রম ॥১৩২॥

अन्वयः—तदेकाङ्गनिखातदृक्षु इन्द्रः अच्छिन्नजसर्वपीतां भैमीम् आख्यातुं गाथा सुधा श्लेष-कलाविलासैः आननचन्द्रम् अलञ्चकार ॥१३३॥

आख्यातुमिति । तस्या दमयन्त्या एकस्मिन् एकैकस्मिन्नेव अङ्गे निखाता प्रवेशिता दृग् दृष्टिर्यैस्तेषु राजसु मध्ये, इन्द्रः, अच्छिन्नजैः सहस्रसङ्ख्यकैरेव नयनैः सर्वेष्वेव अङ्गेषु पीतां सादरं दृष्टाम् । अन्येषां राज्ञां द्विनयनत्वात् एकैकस्मिन्नेवाङ्गे तयोः संसक्तिः, इन्द्रस्य तु सहस्रनयनत्वात् युगपत् सर्वेष्वेवाङ्गेषु तेषां संसक्तिसम्भव इति भावः । भैमीं दमयन्तीम्, आख्यातुं वर्णयितुम्, पद्यमेव सुधा दमयन्तीविषयकत्वादमृतं तस्या या श्लेषकला श्लेषालङ्कारनिवेशविद्या तस्या विलासैः स्फुरणैः, आननचन्द्रम्, आत्मनो मुखचन्द्रम्, अलञ्चकार, श्लेषेण दमयन्तीं वर्णयामासेत्यर्थः ।

अत्र गाथासुधेति आननचन्द्रमिति च निरङ्गकेवलरूपकयोरङ्गाङ्गिभावेन सङ्करः । गुणरीती पूर्ववत् ॥१३३॥

বাঙ্গালা—অন্যান্য রাজাদের দৃষ্টি, দময়ন্তীর এক একটি অঙ্গেই সংলগ্ন ছিল, কিন্তু তাঁহাদের মধ্যে ইন্দ্রের সহস্র নয়ন একবারেই দময়ন্তীর সমস্ত অঙ্গ দর্শন করিতেছিল, তাই তিনি পদ্যরূপ অমৃতের শ্লেষকলা দ্বারা নিজের মুখচন্দ্রকে অলঙ্কৃত করিলেন ॥১৩৩॥

अन्वयः—इयं स्मितेन गौरी, दृशा हरिणी, सुस्वरकण्ठभासा वीणावती, कायप्रभया हैमी एव, अङ्गशेषैः का अपि तन्वी मे मतिं न क्रामति ॥१३४॥

स्मितेनेति । इयं दमयन्ती, स्मितेन मन्दहास्येन, गौरी शुभ्रवर्णा तदाख्या पार्वती च, दृशा चक्षुषा, हरिणी मृगी, तदाख्या अप्सराश्च, स्मितेन सहितेन ... सुस्वरः ... कण्ठस्य भासा कान्त्या, वीणावती वीणायुक्ता, तदाख्या अप्सराश्च, ... हैमी सुवर्णमयी, तदाख्या ...

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन।
व्याहृत्य (१) मर्त्त्योचितमर्थमुक्तौ-राखण्डलस्तस्य नुनोद शङ्काम् ॥१३५॥
स्वं नैषधादेशमहो विधाय कार्य्यस्य हेतोरपि नानलः सन्।
किं स्थानिवद्भावमधत्त दुष्टं तादृक् कृतव्याकरणः पुनः न ॥१३६॥

नालरोनिर्म्मितय, अङ्गाना श्रीभैरवदिष्टैरङ्गैरित्यर्थः कापि तन्वी कृशाङ्गी रमणी, मे मम, मति बुद्धिम न जानाति न आरोहति अस्याः सदृशतया मम बुद्धिगोचरी न भवतीत्यर्थः, अन्यत्र तु तन्वी कृशाङ्गी मेनकापि मेनकानार्यीश्वर्यस्यापि, मे मम मति बुद्धिम, जानाति अस्याः सदृशतया मम बुद्धिविषयी भवतीत्यर्थः।

अत्र एकस्याः दमयन्त्याः विषयभेदेनानेकधोल्लेखादुल्लेखालङ्कारः, मेनकेत्यत्र श्लेषश्च, अन्यत्र तु अन्यङ्गस्त्र्येतेषामङ्गाङ्गिभावेन सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः ॥१३४॥

বাঙ্গালা—ইনি হস্তপাদে গৌরী, নয়নে হরিণী, সুমধুর কণ্ঠে বীণাবতী এবং সর্ব্বাঙ্গের কান্তিতে মেনকাই বটেন, কিন্তু অবশিষ্ট অঙ্গ দ্বারা অন্য কোন রমণীই ইহার সদৃশী বলিয়া আমার মনে হয় না ॥১৩৪॥

অন্বয়ঃ—সবিধে ইতি স্তুবানঃ আখণ্ডলঃ শঙ্কিতমানসেন নলেন বিলোকিতঃ (সন্) উক্তৌ মর্ত্ত্যোচিতম্ অর্থং ব্যাহৃত্য তস্য শঙ্কাং নুনোদ ॥১৩৫॥

इतीति। सविधे नलस्यैव समीपे इति पूर्वोक्तप्रकारम्, स्तुवानो दमयन्तीं प्रशंसन्, आखण्डल इन्द्रः, शङ्कितं दमयन्तीसम्बन्धिरूपतया वर्णयन्नयं मदाकारधारी देवराज किं किल सन्देह इति मनो यस्य तेन तादृशेन नलेन, विलोकितः, साकूतं दृष्टः सन्, उक्तौ "जितेन गौरी" इत्यादिस्वकथनस्थले, मर्त्त्योचितं मनुष्ययोग्यम्, अर्थं मनीषितम्, व्याहृत्य व्याख्याय, तस्य नलस्य, शङ्का सन्देहम्, नुनोद निरासचकार।

अत्र मदनाङ्गैः अन्यानुप्रासोऽलङ्कारः। गुणरीती पूर्ववत् ॥१३५॥

বাঙ্গালা—ইন্দ্র নলের নিকটেই এই রূপ দময়ন্তীর প্রশংসা করিতেছিলেন, তাঁহাতে নলের মন সন্দিগ্ধ হইল এবং তিনি ইন্দ্রের প্রতি দৃষ্টিপাত করিলেন, তখন ইন্দ্র, নরলোকের মনুষ্যাদেশে অর্থ ব্যাখ্যা করিয়া, নলের আশঙ্কা দূর করিলেন ॥১৩৫॥

অন্বয়ঃ—অহো স কার্য্যস্য হেতোঃ স্বং নৈষধাদেশং বিধায় অপি অনলঃ সন্ [illegible] (সন্) কিং স্থানিবৎ দুষ্টং ভাবম্ অধত্ত ॥১৩৬॥

स्वमिति। [illegible]

[illegible]

---

(१) [illegible]

इयमियमधिरथ्यं याति नेपथ्यमञ्जुर्विशति विशति वेदीमुर्वशी सेयमुर्व्याः।
इति जनजनितैः सानन्दवादैर्विजज्ञे नलहृदि परभैमीवर्णनाकर्णनाशिः ॥१३७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥

—०—

च "नहोधः" इत्यनेन हकारस्य धकारादेशं विधाय पुनः स्थानिवद्भावे कृते धान्तत्वाभावात् "झषस्तथोर्धोऽधः" इति क्तप्रत्ययतकारस्य धकारो भवितुं नार्हति। अतः स्थानिवद्भावस्य दुष्टत्वम्। स च तेन कृतः, अतएव च तथाविधविदुषस्तदाश्चर्य्यमेवेति भावः।

अत्र द्वितीयार्थः शब्दशक्तिमूलो वस्तुध्वनिरेव। वन्धार्थस्य दुरूहतया ओजो गुणः, गौड़ी च रीतिः ॥१३६॥

বাঙ্গালা—হায়! ইন্দ্র স্বকার্য্য সিদ্ধির জন্য, নিজের উপরে নলের আকৃতি সন্নিবেশিত করিয়া, নলস্বরূপ মনুষ্য হইয়াও, পূর্ব্বশ্লোকের মনুষ্যোচিত ব্যাখ্যা করিয়া, বাস্তবিক ইন্দ্রের ন্যায় দূষিত অভিপ্রায় কেন ব্যক্ত করিলেন ॥১৩৬॥

अन्वयः—नेपथ्यमञ्जुः इयम् इयम् अधिरथ्यं याति, सा इयम् उर्व्याः उर्वशी वेदीं विशति विशति इति जनजनितैः सानन्दवादैः नलहृदि परभैमीवर्णनाकर्णनाशिः विजज्ञे ॥१३७॥

इयमिति। नेपथ्येन वेशेन मञ्जुर्मनोहरा, इयमियं दमयन्ती, अधिरथ्यं समासान्तवर्त्तिरथ्यायाम्, याति गच्छति, तथा सा प्रसिद्धा, इयम् उर्व्याः पृथिव्याः उर्वशी दमयन्ती, वेदीं सभावेदीकाम् विशति विशति। एतेनैव भाविसर्गसूचनं वेदितव्यम्। इति इत्थम्, जनजनितैर्लोककृतैः, सानन्दवादैः सहर्षं कोलाहलैः, नलस्य हृदि चित्ते विद्यमाना, परेषामन्येषां या भैम्या दमयन्त्या वर्णना तस्या आकर्णनेन श्रवणं तस्य आशिः प्राप्तिः, विजज्ञे विज्ञिता, तादृशीबहुकोलाहलेन तिरस्कृतत्वात् तादृगभैमीवर्णनाश्रवणं कर्त्तुं नलो न शशाक इत्यर्थः।

अत्र उर्वशीदमयन्त्योर्भेदेऽपि तदभेदाध्यवसायादतिशयोक्तिश्छेकानुप्रासयमकयोः संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः। मालिनी वृत्तम् ॥१३७॥

বাঙ্গালা—'বেশভূষা শোভিতা এই এই দময়ন্তী রাস্তায় যাইতেছেন; এই সেই পৃথিবীর উর্ব্বশী সভাবেদীতে প্রবেশ করিতেছেন প্রবেশ করিতেছেন' এই রূপ লোককৃত আনন্দ কোলাহল নলের মনে অন্যান্যের কৃত দময়ন্তী বর্ণনার শ্রবণ প্রাপ্তিতে বাধা দিল ॥১৩৭॥

श्रीहर्षमिति। न केवलं काव्यमात्रे तर्केष्वपि न्यायादिष्वपि, असमः निरुपमः श्रमः, शिक्षाभ्यासो यस्य तस्य, तस्य श्रीहर्षस्य।

[illegible]
[illegible]
[illegible]
[illegible]

—०—

एकादशः सर्गः ।

तां देवतामिव मुखेन्दुवलत्प्रसादामद्धा रसादनिमिषेण निभालयन्तीम् ।
लाभाय चेतसि धृतस्य वरस्य भैम-भूमीन्द्रजा तदनु राजसभां बभाज ॥१॥
तन्निर्मलावयवभित्तिषु तद्विभूषा-रत्नेषु च प्रतिफलन्निजदेहदम्भात् ।
दृश्या परं न हृदयेन न केवलं तैः सर्वाङ्गमेव सुतनुर्युवभिर्न्यमज्जि ॥२॥

अन्वयः—तदनु भैम भूमीन्द्रजा चेतसि धृतस्य वरस्य लाभाय मुखेन्दुवलत्प्रसादां रसात् अनिमिषेण अद्धा निभालयन्तीं देवताम् इव तां राजसभां बभाज ॥१॥

[illegible]

[illegible]

अथ प्राक् सूचित राजवर्णनात्मकमेकादशसर्गमारभते तामिति । तदनु [illegible] भैम-भूमीन्द्रजा दमयन्ती, चेतसि धृतस्य [illegible], वरस्य [illegible] मुखचन्द्रे [illegible], अनिमिषेण अद्धा [illegible], [illegible] अनिमिषेण अद्धा [illegible] निभालयन्तीम्, देवताम् इव, तां राजसभाम् [illegible] ॥

अत्र पूर्वोपमालङ्कारः, [illegible] ।

अस्मिन् सर्गे वसन्ततिलका वृत्तम् ॥१॥

সাঙ্গালা—[illegible]

[illegible]

অন্বয়—[illegible]

[illegible]

[illegible]

সাঙ্গালা—[illegible]

[illegible]

यामन्तरा वसुमतीमपि गाधिजन्मा यद्यन्यमेव निरमास्यत नाकलोकम्।
चारुः स यादृगभविष्यदभूद्विमानैः तादृक् तदभ्रमवलोकितुमागतानाम्॥३॥
कुर्वद्भिरात्मभवसौरभसम्प्रदानं भूपालचक्रचलचामरमारुतौघम्।
आलोकनाय दिवि सञ्चरतां सुराणां तत्रार्चनाविधिरभूदधिवासधूपैः॥४॥
तत्रावनीन्द्रचयचन्दनचन्द्रलेप-नेपथ्यगन्धमयगन्धवहप्रवाहम्।
आलीभिरापतदनङ्गशरानुकारी (१) संरुध्य सौरभमगाहत भृङ्गवर्गः॥५॥

अन्वयः—गाधिजन्मा यां वसुमतीम् अपि अन्तरा यदि अन्यम् एव नाकलोकं निरमास्यत, (तदा) सः यादृक् चारुः अभविष्यत्; अवलोकितुम् आगतानां विमानैः तदभ्रं तादृक् चारु अभूत्॥३॥

यामिति। गाधिजन्मा विश्वामित्रः, यां स्वर्गम्, वसुमतीमपि भूतलञ्च, अन्तरा मध्ये स्वर्गमर्त्ययोर्मध्ये इत्यर्थः, यदि अन्यमेव नाकलोकं स्वर्गलोकम्, निरमास्यत त्रिशङ्कोरवस्थानायाकरिष्यत्, तदा स नाकलोकः, यादृक् चारुर्मनोहरः, अभविष्यत्, अवलोकितुं स्वयंवरं द्रष्टुम्, आगतानां देवानाम्, विमानैः करणैः, तदभ्रं स्वयंवरसभाया उपरितनमाकाशम्, तादृक् चारु अभूत्।

अत्र "यदि स्यान्मण्डले सक्तम्" इत्यादिदर्पणोदाहरणवत् असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः। गुणरीती पूर्ववत्॥३॥

বাঙ্গালা—স্বর্গ ও মর্ত্ত ইহার মধ্য স্থানে বিশ্বামিত্র যদি আর একটা স্বর্গলোক সৃষ্টি করিতেন, তাহা হইলে তাহা যেমন সুন্দর হইত, স্বয়ংবর দেখিবার জন্য আগত দেবগণের বিমানসমূহ দ্বারাও সেই স্বয়ংবরসভার উপরের আকাশ তেমনই সুন্দর হইয়াছিল ॥৩॥

अन्वयः—तत्र भूपाल-चक्र-चल-चामर मारुतौघम् आत्मभव सौरभ सम्प्रदानं कुर्वद्भिः अधिवासधूपैः आलोकनाय दिवि सञ्चरतां सुराणाम् अर्चनाविधिः अभूत्॥४॥

कुर्वद्भिरिति। तत्र स्वयंवरसभायाम्, भूपालचक्रस्य राजगणस्य चलानि आन्दोलनात् चञ्चलानि यानि चामराणि तेषां मारुतौघं वायुसमूहम्, आत्मभवस्य स्वोत्पन्नस्य सौरभस्य सम्प्रदीयते अनेनेति सम्प्रदानं देवगणान्तिके उपस्थितिकारणम्, कुर्वद्भिः चामरवातमवलम्ब्यैव उत्तिष्ठद्भिरित्यर्थः, अधिवासधूपैः सभाधिवासनार्थनिष्पादितैर्धूपैः करणैः, आलोकनाय स्वयंवरदर्शनाय, दिवि आकाशे, सञ्चरतां भ्रमताम्, सुराणां देवानाम्, अर्चनाविधिः पूजाविधानमभूत्।

अत्र अधिवासधूपानां चामरवातमात्रेण सुरसम्बन्धाभावेऽपि तत्सम्बन्धादतिशयोक्तिर्वृत्त्यनुप्रासेन स सृज्यते। प्रसादो गुणः, पाञ्चाली च रीतिः॥४॥

বাঙ্গালা—সেই স্বয়ংবরসভায় রাজগণের নিকটে যে সকল চামর আন্দোলিত হইতেছিল, তাহার বায়ুকে যে নিজোৎপন্ন সৌরভ আশ্রয় করিয়াছিল, সেই ধূপ দ্বারাই, দর্শনার্থ আকাশে বিচরণকারী দেবগণের পূজাবিধান হইয়াছিল ॥৪॥

अन्वयः—तत्र आपतदनङ्गशरानुकारी भृङ्गवर्गः आलीभिः अवनीन्द्र-चय चन्दन-चन्द्र-लेप नेपथ्य-गन्धमय-गन्धवह-प्रवाहं संरुध्य सौरभम् अगाहत॥५॥

तत्रेति। तत्र स्वयंवरसभायाम्, आपतन्त आगच्छन्तो ये अनङ्गशराः कामवाणास्तान् अनुकरोतीति स तथोक्तः, बाणवदेव सरलगामित्वात् तथैवमदकारित्वाच्चेति भावः, भृङ्गवर्गो भ्रमरसमूहः, आलीभिः श्रेणीभिः।

---

(१) ...शरानुसारी।

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी-सर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्लुतपताकतयाभिनिन्युर्मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥६॥
सम्भाषणं भगवती सदृशं विधाय वाग्देवता विनयवन्धुरकन्धरायाः ।
ऊचे चतुर्दशजगज्जनतानतास्याः तत्रान्विता सदसि दक्षिणपक्षमस्याः ॥७॥

अतएव वायुः रोधजन्मा इत्यर्थः । अवनीन्द्रवृन्दस्य राजवृन्दस्य अङ्गवनचन्दनैः चन्दनकर्पूरयोरङ्गरागैः स एव नैपध्ये विमलस्य गन्धनः सौरभस्यापि यो गन्धवहनवाही वायुर्जातः सन्, संरुध्य आवध्य, सौरभं तस्य गन्धम्, अरोहत आस्वादितवान् तारम्ये गान्धमवदित्यर्थः ।

अत्र मार्गावलोकनाद्यारम्भे ज्ञानुषङ्गो इत्यनुमानसर्वेत्तेषां च हृदिः । समासबाहुल्यादोजो गुणः, गौडी च रीतिः ।

"घनतारघण्डत्व च तितसौ हितवालुका" इत्यमरः ॥५॥

বাঙ্গালা—সেই স্বয়ংবরসভায় যে সমস্ত রাজা উপবিষ্ট ছিলেন, তাঁহাদের শরীরে যে সকল চন্দন ও কর্পূরের অনুলেপ ছিল, বায়ুপ্রবাহ তাহার সৌরভ লইয়া ছুটিতে ছিল; তখন আগত কামবাণের অনুকারী ভ্রমরগণ শ্রেণী দ্বারা সেই বায়ুপ্রবাহকে অবরুদ্ধ করিয়া, তাহার সৌরভ ভোগ করিতে লাগিল ॥৫॥

अन्वयः—उत्तुङ्ग मङ्गल-मृदङ्ग-निनाद भङ्गी सर्वानुवाद-विधि-बोधित साधु मेधाः सौधस्रजः प्लुतपताकतया जनेषु निज ताण्डव पण्डितत्वम् अभिनिन्युः (इत्यहं) मन्ये ॥६॥

उत्तुङ्गेति । उत्तुङ्गा अत्युच्चा ये मङ्गलमृदङ्गाः माङ्गलिकमुरजानां निनादाः शब्दास्तेषां या भङ्गाः प्रकारविशेषास्तासां च सर्वानुवादविधिः समस्तवादनविषये तदनुकरणव्यापारस्तेन बोधिता सम्यक् ज्ञापिता साध्वी उत्तमा मेधा स्वकीयधारणाशक्तिर्याभिस्ताः, सौधस्रजः अट्टालिकापङ्क्तयः, प्लुता वायुभरेण चञ्चलिता पताका यासु तासां भावस्तया हेतुना, जनेषु सभ्यजनानां समीपेषु, निजं स्वकीयं ताण्डवस्य उद्धतनृत्यस्य पण्डितत्वं नैपुण्यम्, अभिनिन्युः दर्शयामासुः, इत्यहं मन्ये । अन्यः अपि नर्तकः समस्तवादनप्रावृत्त्यनुसरणेन निजमेधां प्रकटयन्नात्मनः ताण्डवनैपुण्यं सभ्येषु प्रदर्शयति ।

अत्र एवम् सौधस्रजः अप्रस्तुतनर्तकीव्यवहारसमारोपात् समासोक्तिरलङ्कारः, वाच्या उत्प्रेक्षा वा, इत्यनुमानसम्बन्धे ज्ञानुषङ्गो लेशानां च हृदिः । वृत्तरीती पूर्ववत् ॥६॥

বাঙ্গালা—স্বয়ংবরসভার অট্টালিকাগুলি, মাঙ্গলিক মৃদঙ্গের উচ্চ ধ্বনির সমস্ত অবস্থার অনুসরণ দ্বারা আপনাদের উত্তম মেধাশক্তি জানাইয়া দিয়া, চঞ্চল পতাকা দ্বারা সভ্যগণের নিকটে আপনাদের নৃত্যকৌশল দেখাইতে লাগিল ইহা আমি মনে করি ॥৬॥

अन्वयः—भगवती चतुर्दश-जगज्जनता-नतस्या वाग्देवता विनय वन्धुर कन्धरायाः अस्याः सदृशं सम्भाषणं विधाय तत्र सदसि अस्याः दक्षिणपक्षम् अन्विता (सती) ऊचे ॥७॥

सम्भाषणमिति । भगवती षडैश्वर्यसम्पन्ना । अत एव तस्याः राजसदसि संस्थितायामपि । चतुर्दशानां जगतां भुवनानां जनतया लोकसमूहेन नतस्या पूज्या । तेन च सभ्यजनैरपि वन्दनीया इव । वाग्देवता सरस्वती, विनयेन वन्धुरा नम्रा कन्धरा ग्रीवा यस्यास्तस्याः, अस्याः दमयन्त्याः, सदृशं योग्यम्, सम्भाषणं विधाय तत्र सदसि सभायाम्, अस्याः दमयन्त्याः एव दक्षिणपक्षं दक्षिणपार्श्वम् अनुसृत्य, अन्विता सती, ऊचे उक्तवती ।

अत्र ... ...

अभ्यागमन्मखभुजामिह कोटिरेषा येषां पृथक् कथनमब्दशतातिपाति ।
अस्या वृणीष्व मनसा परिभाव्य कञ्चित् यं चित्तवृत्तिरनुधावति तावकीना ॥८॥
एषा त्वदीक्षणरसादनिमिषता या स्वाभाविकानिमिषतामिलिता यथाभूत् ।
आस्ये तथैव तव नन्वधरोपभोगैर्मुग्धे ! विधावमृतपानमपि द्विधास्तु ॥९॥
एषां गिरिः सकलरत्नफलस्तरुः सः प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्वन्नाभाति बिन्दुभिरिव स्फुरितः पयोभिः ॥१०॥

বাঙ্গালা—বাগাধিষ্ঠাত্রী এবং চতুর্দশ ভুবনস্থ লোকেরই নমস্যা সরস্বতীদেবী, বিনয়নম্রমস্তকা দময়ন্তীর উপযুক্ত সম্ভাষণ করিয়া, সেই সভায় তাঁহার দক্ষিণ পার্শ্বে থাকিয়া বলিতে লাগিলেন ॥৭॥

অন্বয়ঃ—ইহ एषा मखभुजां कोटिः अभ्यागमत् येषां पृथक् कथनम् अब्दशतातिपाति । तावकीना चित्तवृत्तिः अस्या यं कञ्चित् अनुधावति, मनसा परिभाव्य (तं) वृणीष्व ॥८॥

अभ्यागमदिति । हे दमयन्ति । इह सभायाम् एषा दृश्यमाना, मखभुजां देवानाम्, कोटिः सङ्ख्या, कोटिसङ्ख्यका देवा इत्यर्थः, अभ्यागमत् आगता, येषां मखभुजाम्, पृथक् कथनं पृथक् पृथक् वर्णनम्, अब्दशत वर्षशतम् अतिपतति अतिक्रामतीति तत् तादृशं शतवत्सरैरपि वर्णयितुमशक्यमित्यर्थः । एतेन तासाम् अत्यन्तास्था प्रदर्शितेति बोध्यम् । तावकीना त्वदीया, चित्तवृत्तिः, अस्या मखभुजां कोटेः मध्ये, यं कञ्चित्, अनुधावति विषयीकरोतीति, मनसा परिभाव्य विचार्य तं वृणीष्व ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ॥८॥

বাঙ্গালা—এই স্বয়ংবরসভায় কোটিসংখ্যক দেবতারা আসিয়াছেন, যাঁহাদের পৃথক্ পৃথক্ বর্ণনা করা শত বৎসরেও পারা যায় না। তোমার মনোবৃত্তি ইহার মধ্যে যে কোন দেবতার উপরে যায়, তুমি মনে মনে বিবেচনা করিয়া তাঁহাকে বরণ করিতে পার ॥৮॥

অন্বয়ঃ—ननु मुग्धे । एषा त्वदीक्षणरसात् एषा अनिमिषता यथा स्वाभाविकानिमिषता-मिलिता (सती) द्विधा अभूत्, तथा एव तव आस्ये विधौ अधरोपभोगैः, अमृतपानम् अपि द्विधा अस्तु ॥९॥

एषामिति । ननु मुग्धे । हे सुन्दरि । एषां देवानां तव ईक्षणे दर्शने रसादनुरागाद्धेतोः, एषा दृश्यमाना, अनिमेषता निमेषशून्यता, यथा स्वाभाविक्या अनिमिषतया मिलिता सती, द्विधा द्विप्रकारा कृत्रिमा इदानीन्तनी स्वाभाविकी चिरन्तनी चेति द्विविधेत्यर्थः, अभूत्, तथैव, तव आस्ये मुखे मुखरूपे, विधौ चन्द्रे, अधरोपभोगैः अधरचुम्बनैः, अमृतपानमपि, द्विधा द्विप्रकारम्, अस्तु, वास्तविकचन्द्रादमृतपानं स्वाभाविकम्, तव मुखचन्द्रादमृतपानन्तु चुम्बननिमित्तमिति द्विप्रकारमस्त्वित्यर्थः ।

अत्र अनिमिषताया द्विधात्वासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिः, श्रौतोपमा, आस्ये विधाविति निरङ्गं केवलरूपकञ्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । गुणरीती पूर्ववत् ॥९॥

বাঙ্গালা—সুন্দরি ! তোমাকে দর্শন করিবার ইচ্ছায় দেবগণের এই নিমেষশূন্যতা যেমন স্বাভাবিক নিমেষশূন্যতার সহিত মিলিত হইয়া দুইপ্রকার হইয়াছে, তেমনই তোমার মুখচন্দ্রের ওষ্ঠচুম্বন দ্বারা তাঁহাদের অমৃতপানও দুইপ্রকার হউক ॥৯॥

অন্বয়ঃ—प्राग् दुग्ध-भूमि- सुरभेः एषां गिरिः सकलरत्नफलः पञ्चशाखः सः खलु तरुः मुक्ताफलं फलन सान्वय नाम तन्वन् पयोभिः बिन्दुभिः स्फुरितः इव आभाति ॥१०॥

वक्त्रेन्दुसन्निधिनिमीलिदलारविन्द-द्वन्द्वभ्रमक्षममयाञ्जलिमात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा सान्यत्र गन्तुममरैः कृपयान्वमानि ॥११॥
तत्तद्विरागमुदितं शिबिकाधरस्थाः साक्षाद्विदुः स्म न मनागपि यानधुर्य्याः ।
आसन्ननायकविरागमुखानुमेय-भेदोऽविरक्तचरितानुमया तु जज्ञे ॥१२॥

एतानिति । प्राक् प्रथमं दुग्धा भूमि पृथिव्येव सुरभिर्धेनुर्येन तस्य, एषां देवानाम्, गिरेः पर्वतस्य सुमेरोः सम्बन्धी, तत्त्वानि रत्नान्येव फलानि यस्य सः, पञ्च शाखा विटपा यस्य स, पञ्चशाखः मणिरत्नैरेव पाणिरिव च स प्रसिद्धः, तरुः कल्पद्रुः, मुक्ताफलं मौक्तिकम्, फलनेन उत्पादनेन सान्वयम् अन्वर्थं नाम मुक्ताफलेति संज्ञा यस्य तथाभूतम्, तन्वन् कुर्वन्, यथा फलनवशादेव आम्रादिकं फलं व्यपदिश्यते, तथा आत्मना फलनादेव मुक्ताफलमिति व्यपदेशं कुर्वन्निवेत्यर्थः, तथा पयोभिर्दुग्धस्य बिन्दुभिः, छुरितो रञ्जित इव आभाति शोभते । तथा च कल्पद्रुः सुमेरुपर्वतस्य हस्त इव वर्त्तते ; तत्र च कल्पद्रौ मुक्ताफलानि जायन्ते , सुमेरुश्च गोरूपधरां पृथिवीं दुग्धवान् । एवञ्च तस्य दुग्धस्य बिन्दव इव तानि मुक्ताफलानि तस्मिन् कल्पद्रौ व्याप्तानि । तेन च देवानामन्ततरस्य वरणे त्वं खलु तस्य कल्पद्रुमस्य सुमेरोश्च स्वामिनी भवेरिति भावः ।

अत्र भूमिसुरभेरिति निरङ्गं केवलरूपकम्, छुरित इवेति क्रियोत्प्रेक्षा, छेकानुप्रासश्चेति संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ॥१०॥

বাঙ্গালা—এই দেবগণের সুমেরুপর্ব্বত পূর্ব্বকালে পৃথিবীরূপ ধেনুকে দোহন করিয়াছিল; ইহারই হস্ততুল্য এবং সমস্ত রত্নের উৎপাদক কল্পবৃক্ষ, মুক্তাফলকে (মুক্তাকে) ফলনবশতঃ অন্বর্থনামা করিয়া, দুগ্ধবিন্দু দ্বারা ব্যাপ্ত হইয়াই যেন শোভা পাইতেছে ॥১০॥

अन्वयः—अथ अमरैः कृपया वक्त्रेन्दु-सन्निधि-निमीलि दलारविन्द द्वन्द्व भ्रम-क्षमम् अञ्जलिम् आत्म-मौलौ कृत्वा अपराध-भय चञ्चलम् ईक्षमाणा सा अन्यत्र गन्तुम् अन्वमानि ॥११॥

वक्त्रेन्दिति । अथ तदनन्तरं देवगणत्यागानन्तरम्, अमरैः कृपया, वक्त्रेन्दोः दमयन्त्या एव मुखचन्द्रस्य सन्निधौ सामीप्ये निमीलन्ति दलानि यस्य तथाभूतम् यत् अरविन्दद्वन्द्वं पद्मयुगलं तस्य भ्रमे भ्रान्तौ क्षमं योग्यम्, अञ्जलिं पाणिपुटमुकुलम्, आत्ममौलौ निजमस्तके कृत्वा, देवानां परित्यागनिबन्धनो योऽपराधस्तस्माद् भयं तेन चञ्चलं यथा स्यात्तथा ईक्षमाणा देवानेव पश्यन्ती, सा दमयन्ती, अन्यत्र अपरवरसन्निधाने गन्तुम्, अन्वमानि अनुमता ।

अत्र वक्त्रेन्दिति निरङ्गं केवलरूपकम्, पाणिपुटे सङ्कुचितदलपद्मयुगलभ्रमाद्भ्रान्तिमान्, छेकानुप्रासश्चेत्येतेषां संसृष्टिः । गुणरीती पूर्ववत् ॥११॥

বাঙ্গালা—তাহার পর, দময়ন্তী আপন মস্তকে অঞ্জলি বন্ধন করিলেন, তখন তাঁহার হস্তযুগল, মুখচন্দ্রের সান্নিধ্য বশতঃ যাহার দলগুলি মুদিয়া গিয়াছে, এ হেন পদ্মযুগলের ভ্রম জন্মাইতে লাগিল, এই অবস্থায় দময়ন্তী অপরাধভয়ে দেবগণের প্রতি চঞ্চল দৃষ্টিপাত করিতে লাগিলেন; তখন দেবতারা কৃপাবশতঃ তাঁহাকে অন্যত্র যাইবার অনুমতি দিলেন ॥১১॥

अन्वयः—शिबिकाधरस्थाः यानधुर्य्याः उदितं तत्तद्विरागं मनाक् अपि साक्षात् न विदुः स्म, तु आसन्न-नायक-विराग-मुखानुमेय-भेदः अविरक्त-चरितानुमया जज्ञे ॥१२॥

तदिति । शिबिकायाः अधरस्थाः अधोदेशवर्त्तिनः, यानधुर्य्याः शिबिकावाहकाः, उदितं दमयन्त्याः उदयं तस्मिन् तस्मिन् देवे विरागं विरक्तिम्, मनाक् अल्पमपि, साक्षात् प्रत्यक्षेण, न विदुः न ज्ञातवन्तः ; किन्तु

रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तौ विद्याधरेष्वधरतां वपुषैव भैम्याः ।
गन्धर्वसंसदि न गन्धमपि स्वरस्य तस्या विमृश्य विमुखोऽजनि यानिवर्गः (१) ॥१३
दीनेषु सत्स्वपि कृताफलवित्तरक्षै-र्यक्षैरदर्शि न मुखं त्रपयैव तस्याः ।
ते जानते स्म सुरशाखिपतिव्रतां किं तां कल्पवीरुधमधिक्षिति नावतीर्णाम् ॥१४॥

अधरस्थतया तदूर्द्ध्वदेशवर्त्तिवृत्तान्तस्य अज्ञातुयत्वादिति भाव । तु किन्तु, आसन्नानां निकटवर्त्तिनां नायकानां देवानां विषण्णानि म्लानानि यानि मुखानि तैरनुमेय यत् भैम्या विरक्तिचरित्रं परित्यागरूपं विरागाचरणं तेन अनुमया अनुमानेन जनः तत्तद्विरागं ज्ञातवन्त ।

अत्र विरागज्ञानाभाव प्रति शिबिकाधरस्थपदार्थस्य हेतुत्वात् काव्यलिङ्गम्, तत्कृतविच्छित्तिवशात् तादृशचरित्तेन विरागानुमानाच्च अनुमानमलङ्कार इत्यनयोरङ्गाङ्गिभावेन सङ्कर । प्रसादो गुण, वैदर्भी च रीति ॥१२॥

বাঙ্গালা—সেই সেই দেবতার প্রতি দময়ন্তীর যে বিরাগ জন্মিয়াছিল, তাহা শিবিকার নিম্নস্থ বাহকগণ প্রত্যক্ষভাবে একটুও বুঝিতে পারিয়াছিল না; কিন্তু নিকটবর্ত্তী দেবগণের বিষন্ন মুখ দেখিয়া তাহারা দময়ন্তীর বিরাগাচরণের অনুমান দ্বারা সে বিরাগ বুঝিতে পারিয়াছিল ॥১২॥

अन्वयः—यानिवर्गः रक्षःसु निजम् अरक्षणम् अवेक्ष्य निवृत्तः, भैम्याः वपुषा एव विद्याधरेषु अधरताम् अवेक्ष्य निवृत्तः; तस्याः स्वरस्य गन्धम् अपि गन्धर्वसंसदि न विमृश्य विमुखः अजनि ॥१३॥

रक्ष स्विति । यानिनां शिबिकावाहकानां वर्गो गण, रक्षःसु राक्षसेषु, निजं स्वकीयम्, अरक्षणं खादनेन मरणात् रक्षाया अभावम्, अवेक्ष्य पर्य्यालोच्य, निवृत्तस्तेभ्य. पराङ्मुखो जात । भैम्या दमयन्त्याः, वपुषा शरीरेणैव, विद्याधरेषु, अधरतां निकृष्टताम्, अवेक्ष्य निवृत्तः, विद्याधराणां केषाञ्चित् नरशरीराश्वमुखत्वात् केषाञ्चिच्च अश्वशरीरनरमुखत्वादिति भावः । तथा तस्या भैम्याः, स्वरस्य कण्ठध्वनेः, गन्धं लेशमपि, गन्धर्वाणां संसदि समूहे, न विमृश्य अखिलेन न विविच्य, विमुखस्तत्र गन्तुं पराङ्मुख, अजनि जातः ।

अत्र भैमीकण्ठस्वरगन्धस्य गन्धर्वसंसदि सम्बन्धेऽपि तदसम्बन्धादतिशयोक्तिरलङ्कारश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते । गुणरीती पूर्ववत् ॥१३॥

বাঙ্গালা—রাক্ষসদের নিকটে গেলে আপনাদের রক্ষাই থাকিবে না ইহা পর্য্যালোচনা করিয়া শিবিকাবাহকগণ সে দিকে গেল না; দময়ন্তীর শরীর দ্বারাই বিদ্যাধরগণ নিকৃষ্ট ইহা বুঝিয়া সে দিকেও গেল না এবং দময়ন্তীর স্বরের লেশও গন্ধর্ব্বগণে নাই ইহা বিবেচনা করিয়া সে দিক্ যাইতেও পরাঙ্মুখ হইল ॥১৩॥

अन्वयः—दीनेषु सत्सु अपि कृताफलवित्तरक्षैः यक्षैः त्रपया एव तस्याः मुखं न अदर्शि । ते अधिक्षिति अनवतीर्णां सुरशाखिपतिव्रतां कल्पवीरुधं तां किं न जानते स्म ॥१४॥

दीनेष्विति । दीनेषु दरिद्रजनेषु, सत्स्वपि जगत्यां विद्यमानेष्वपि, कृता अफला तेभ्यो दानाभावादेव निष्प्रयोजना वित्तानां धनानां रक्षा यैस्तैः, अतीवकृपणैरित्यर्थः, यक्षैः त्रपया लज्जयैव तस्या दमयन्त्याः समीपे, मुखं न अदर्शि न दर्शितम् मुखं परावृत्त्य स्थितमिति भाव. । अथ तेषां त्रपैव कथमित्याह-ते यक्षा, क्षितौ पृथिव्यामित्यधिक्षिति, अनवतीर्णाम्, सुरशाखी कल्पवृक्ष एव पतिस्तस्य व्रतमिव व्रतम् आचारानुरूपं लोकेभ्यो दानं यस्यास्ताम् । किञ्च सुरशाखी कल्पवृक्षस्तत्सदृशो नल इत्यर्थस्तस्य पतिव्रता साध्वीं भार्य्याम् । कल्पवीरुधं

---

(१) -- यानवर्गः ।

यान्याः (१) ततः फणभृतामधिपं सुरौघान्माञ्जिष्ठमञ्जिमविगाहिपदीठलक्ष्मीन् ।
तां मानसं निखिलवारिचयान्नवीना हंसावलीमिव घना गमयाम्बभूवुः ॥१५॥
यस्या विभोरखिलवाङ्मयविस्तरोऽयमाख्यायते परिपतिर्मुनिभिः पुनः सा ।
उद्गत्वरा न्तरतराद्र्ध परार्ध्य भालां बालामभाषत सभा सततप्रगल्भा ॥१६॥

[illegible] दमयन्तीम्, किं न जानते [illegible] अपि तु [illegible] जानते [illegible] । तेन [illegible] ।

अत्र [illegible] ॥१४॥

বঙ্গানুবাদ—[illegible] দমযন্তীকে [illegible] না। কারণ, তাহারা, [illegible] জানিত না ॥১৪॥

अन्वयः—ततः नवीनाः घनाः हंसावली निखिल-वारि-चयात् मानसम् इव, यान्याः [illegible] पदीठलक्ष्मीं तां सुरौघात् फणभृताम् अधिपं गमयाम्बभूवुः ॥१५॥

यान्या इति । [illegible]

[illegible]

अत्र [illegible] ॥१५॥

বঙ্গানুবাদ—[illegible] ॥১৫॥

अन्वयः—[illegible] ॥१६॥

यस्या इति । [illegible]

[illegible]

---

(१) [illegible]

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन यः पट्टसूत्रपरिरम्भणशोणशोभः।
यज्ञोपवीतपदवीं भजते स शम्भोः सेवासु वासुकिरयं प्रमितः सितश्रीः ॥१७॥
पाणौ फणी भजति कङ्कणभूयमैशे-सोऽयं मनोहरमणीरमणीयमूर्त्तिः (१)।
कोटीरबन्धनधनुर्गुणयोगपट्ट-व्यापारपारगममुं भज भूतभर्त्तुः ॥१८॥

বাঙ্গালা—বাগ্মীর প্রস্তুত মহাদেব, এই বেলায় সমস্ত পদ পুষ্পকে সর্বব্যাপিকা যে সরস্বতী দেবীর পরিণাম বলিয়া থাকেন, সভায় সকলেই প্রগল্ভ হইয়া সেই সরস্বতী দেবী পুনরায় দময়ন্তীকে বলিতে লাগিলেন। তৎকালে দময়ন্তীর ললাটদেশ, উদীয়মান অর্দ্ধচন্দ্রের ন্যায় মনোহর ছিল ॥১৬॥

अन्वयः—आश्लेष-लग्न-गिरिजा-कुच कुङ्कुमेन पट्टसूत्र परिरम्भण शोण शोभः, यः शम्भोः यज्ञोपवीतपदवीं भजते, शम्भोः सेवासु प्रमितः, सितश्रीः सः अयं वासुकिः ॥१७॥

आश्लेषेति। आश्लेषेण आलिङ्गनेन लग्नं यत् गिरिजायाः पार्वत्याः कुचयोः स्तनयोः कुङ्कुमं तेन, पट्टसूत्रपरिरम्भणस्य रक्तवर्णपट्टसूत्रवेष्टनस्येव शोणा रक्तवर्णा शोभा यस्य स तथोक्तो यः शम्भोर्महादेवस्य, यज्ञोपवीतपदवीं यज्ञसूत्रस्थानम् भजते आश्रयति रमणसमयेऽपि शम्भुना यो न परित्यज्यत इत्यर्थः; अतएव शम्भोरेव सेवासु, प्रमितः सर्वदैव ज्ञातः, सितश्रीः शुभ्रकान्तिः, सोऽयं वासुकिरनन्तनागः। नागराजत्वात् शम्भोरतिप्रियत्वाच्च अयमेव वरणीय इति, पर सेवासु प्रमितत्वाद्य अयमपि न वरणीय इति च भावः।

अत्र लुप्तोपमालङ्कारश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां सङ्कीर्य्यते। गुणरीती पूर्ववत् ॥१७॥

বাঙ্গালা—শিবের আলিঙ্গন দ্বারা পার্বতীর স্তনযুগলের কুঙ্কুম লাগিয়া যাওয়ায় যাঁহার দেহকান্তি, পট্টসূত্র পরিবেষ্টনের ন্যায় রক্তবর্ণ হইয়া যায়, এ হেন যিনি মহাদেবের যজ্ঞোপবীতস্থান আশ্রয় করিয়াছেন, শুভ্রকান্তি এবং মহাদেবেরই সেবায় আসক্ত ইনি সেই বাসুকি ॥১৭॥

अन्वयः—मनोहर मणी-रमणीय-मूर्त्तिः सः अयं फणी ऐशे पाणौ कङ्कणभूयं भजति। भूतभर्त्तुः कोटीरबन्धन-धनुर्गुण योगपट्ट व्यापार-पारगम् अमुं भज ॥१८॥

पाणाविति। मनोहराभिर्मणीभिः रत्नैः रमणीया मूर्त्तिर्यस्य सः, सोऽयं फणी वासुकिः, ऐशे शिवसम्बन्धिनि पाणौ मणिबन्धे इत्यर्थः, कङ्कणभूयं कङ्कणाभरणत्वम्, भजति। अतएव भूतभर्त्तुः शिवस्य, कोटीरबन्धनं जटाजूटबन्धनं धनुर्गुणः योगपट्टमुत्तरीयविशेषश्च तेषां व्यापारो भवनं तत्तद्रूपेणावस्थानमित्यर्थः तस्य पारगं पारदर्शिनं तेषु व्यापारेषु निपुणमिति तात्पर्य्यम्, अमुं वासुकिम्, भज उपेष्व। परसेवापरायणत्वान्नैव भजेति सूचितम्।

अत्र एकस्य वासुकेः कोटीरबन्धनादावनेकस्मिन् भवनात् पर्य्यायनामालङ्कारः, रमणी-रमणीति यमकम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः। प्रसादो गुणः, पाञ्चाली च रीतिः।

“रत्नं मणिर्द्वयोः” इत्यमरः। अतएव स्त्रियां नदादित्वादीप्रत्ययः। “कोटीरः स्याज्जटाजूटः” इति वल्लः।
कङ्कणभूयमिति “भावे भुवः” इति भवतेर्भावे क्यप् ॥१८॥

বাঙ্গালা—সুন্দর সুন্দর রত্ন দ্বারা যাঁহার আকৃতিটী অতি সুন্দর হইয়াছে, ইনি সেই নাগরাজ বাসুকি মহাদেবের হস্তে কঙ্কণতা অবলম্বন করিয়াছেন। অতএব মহাদেবের

---

(१) रमणीयमूर्त्तिः।

धृत्वैकया रसनयामृतमीश्वरेन्दोरप्यन्यया त्वदधरस्य रसं द्विजिह्वः।
आस्वादयन् युगपदेव परं विशेषं निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥१९॥
आशीर्विषेण रदनच्छददंशदानमेतेन ते पुनरनर्थतया न गण्यम्।
बाधां विधातुमधरे हि न तावकीने पीयूषसारघटिते घटतेऽस्य शक्तिः ॥२०॥

মটে বুঝিবেন কর্ম, মধুর শুণ হওয়া এবং উত্তরীয় হওয়ার বিষয়ে নিপুণ এই রাজাকে তুমি বরণ কর ॥১৮॥

অন্বয়ঃ—দ্বিজিহ্বঃ একয়া রসনয়া ঈশ্বরেন্দোঃ অমৃতম্, অন্যয়া অপি ত্বদধরস্য রসং ধৃত্বা যুগপৎ এব আস্বাদয়ন্ এতদুভয়স্য বিশেষং নির্ণেতুং যদি পরং ক্ষমঃ স্যাৎ ॥১৯॥

ধৃত্বেতি। দ্বে জিহ্বে যস্য স দ্বিজিহ্বঃ, প্রকরণাদেব বাসুকিঃ সর্পঃ, একয়া রসনয়া জিহ্বয়া, ঈশ্বরেন্দোঃ শিবললাটচন্দ্রস্য, অমৃতং ধৃত্বা গৃহীত্বা, অন্যয়াপি রসনয়া, ত্বদধরস্য রসং ধৃত্বা, যুগপদেককালমেব, আস্বাদয়ন্ সম্পিবন্, এতদুভয়স্য চন্দ্রামৃতত্বদধররসয়োঃ, বিশেষং ভেদং তারতম্যমিতি যাবৎ, নির্ণেতুং যদি পরং কেবলম্, ক্ষমঃ সমর্থঃ স্যাৎ, ন পুনরন্য ইত্যর্থঃ। তেন মনুষ্যাণাং চন্দ্রামৃতপানাসম্ভবাৎ, দেবানাং তৎসম্ভবেঽপি জিহ্বাদ্বয়াভাবেন যুগপৎ পানাসম্ভবাৎ, অন্যেষাং সর্পাণাং দ্বিজিহ্বত্বেঽপি শিবকণ্ঠস্থিত্যভাবেন চন্দ্রামৃতপানাসম্ভবাৎ অদনেনাসাধারণত্বয়া বরণীয় ইত্যাশয়ঃ। যতোঽয়ং দ্বিজিহ্বঃ খলঃ, অতঃ কদাপি ন বরণীয় ইত্যপি সূচিতম্।

অত্র ধৃত্বেত্যেকয়া জিহ্বয়া অমৃতরসয়োঃ কর্মতয়াভিসম্বন্ধাত্ তুল্যযোগিতা, যুগপত্তদুভয়োরাস্বাদাসম্বন্ধেঽপি তৎসম্বন্ধাদতিশয়োক্তিশ্চেত্যনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ। প্রসাদো গুণঃ, বৈদর্ভী চ রীতিঃ ॥১৯॥

বাঙ্গালা—দ্বিজিহ্ব এই রাজাও একটি জিহ্বা দ্বারা শিবের ললাটস্থ চন্দ্রের অমৃত, আর একটি জিহ্বা দ্বারা তোমার ওষ্ঠের রস ধারণ করিয়া, একবারই সেই দুইটিকে পান করতঃ, সেই দুইটির তারতম্য নিশ্চয় করিতে যদি কেবল সমর্থ হন ॥১৯॥

অন্বয়ঃ—আশীবিষেণ এতেন তে রদনচ্ছদদংশদানম্ অনর্থতয়া পুনঃ ন গণ্যম্। হি পীযূষসার-ঘটিতে তাবকীনে অধরে বাধাং বিধাতুম্ অস্য শক্তিঃ ন ঘটতে ॥২০॥

আশীতি। আশী সর্পস্য দন্তস্তত্র বিষং যস্য তেন, এতেন বাসুকিনা, তে তব, রদনচ্ছদে অধরে দংশদানং দংশনম্, অনর্থতয়া অপকারহেতুতয়া, পুনর্ন গণ্যং তদা ন গণনীয়ম্। হি যস্মাৎ পীযূষস্য অমৃতস্য সারেণ শ্রেষ্ঠাংশেন ঘটিতে রচিতে নির্মিতে তাবকীনে ত্বদীয়ে অধরে, বাধাং বিষজন্যাং পীড়াম্, বিধাতুম্, অস্য বাসুকেঃ, শক্তিঃ সামর্থ্যম্, ন ঘটতে ভবতি বিষস্য হিংসায়া অমৃতেনাপ্রতিহতত্বাৎ । অতো নিঃশঙ্কমেনং বরং বৃণুষ্বেতি ভাবঃ। বিষধরত্বেন চ ন বরণীয় ইতি চ সূচ্যতে।

অত্র অধরস্য পীযূষসারঘটিতত্বসম্বন্ধেঽপি তৎসম্বন্ধ ইত্যতিশয়োক্তিরলঙ্কারঃ ক্ষমতাং প্রতি অমৃতসারঘটিতত্বরূপপদার্থস্য হেতুত্বাৎ কাব্যলিঙ্গমনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, তৌ চ খলেন সহ ইতি ব্যজ্যতে। প্রসাদো গুণঃ, বৈদর্ভী চ রীতিঃ ॥২০॥

বাঙ্গালা—আশীবিষ এই অনন্তনাগ তোমার অধরে যে দংশন করিবেন, সেটাকে তুমি অনর্থ বলিয়া মনে করিও না। কারণ, বিধাতা তোমার অধরটিকে অমৃতের সারাংশ দ্বারা নির্মাণ করিয়াছেন, অতএব তাহাতে বিষের পীড়া জন্মাইতে ইঁহার ক্ষমতা হইবে না ॥২০॥

तद्विस्फुरत्फणविलोकनभूतभीतेः कम्पञ्च वीक्ष्य पुलकञ्च ततोऽनु तस्याः।
सञ्जातसात्त्विकविकारधियः स्वभृत्यान् नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः ॥२१॥
तद्दर्शिभिः स्ववरणे फणिभिर्निराशैर्निःश्वस्य तत् किमपि सृष्टमनात्मनीनम्।
यत्तान् प्रयातुमनसोऽपि विमानवाहाः हाहा प्रतीपपवनाशकुनान्न जग्मुः ॥२२॥
भीसङ्कुचत्फणगणादुरगप्रधानात्तां राजसङ्घमनयन्त विमानवाहाः।
सन्ध्यानमद्दलकुलात् कमलाद्विनीय कह्लारमिन्दुकिरणा इव हासभासम् ॥२३॥

अन्वयः—ततः अनु विलक्षः उरगाधिपतिः तस्याः तद्विस्फुरत्फणविलोकनभूतभीतेः कम्पञ्च पुलकञ्च वीक्ष्य सञ्जात सात्त्विक विकार-धियः स्वभृत्यान् नृत्यात् न्यषेधत् ॥२१॥

तदिति। ततोऽनु तदनन्तरम्, विलक्षः स्वभृत्यानां निरुद्धितादर्शनात् सलज्जः, उरगाधिपतिः सर्पराजो वासुकिः, तस्या दमयन्त्याः, तस्य वासुकेर्विस्फुरन्तः सञ्चलन्तो ये फणास्तेषां विलोकनाद्दर्शनात् भूता जाता वा भीतिर्भयं तस्या इति, कम्पञ्च पुलकं रोमाञ्चञ्च, वीक्ष्य दृष्ट्वा, सञ्जाता सात्त्विकविकारेषु कम्परोमाञ्चात्मकशृङ्गारानुभावेषु धीर्बुद्धिर्येषां तान्, अस्मत्स्वामिनि वासुकावेव दमयन्त्या अनुरागात् कम्पो रोमाञ्चश्च जात इति भ्रान्तानित्यर्थः, स्वभृत्यान्, नृत्यात् उक्तभ्रमेण दमयन्तीप्राप्तिसम्भावनानिबन्धनानन्दनर्त्तनात्, न्यषेधत् निवारितवान्, भयवशादेव भैम्याः कम्परोमाञ्चाविति निश्चयादिति भावः।

अत्र भृत्यानां भैम्या भयजनितकम्परोमाञ्चयोः शृङ्गारजनितत्वभ्रमाद्भ्रान्तिमानलङ्कारः। गुणरीती पूर्ववत् ॥२१॥

বাঙ্গালা—অনন্তনাগের ফণাগুলি চালিতেছিল, তাহা দেখিয়া দময়ন্তীর ভয় জন্মিল; তাহাতে তাঁহার কম্প ও রোমাঞ্চ উৎপন্ন হইল, ইহা দেখিয়া অনন্তনাগের ভৃত্যেরা বুঝিল যে, সর্পরাজের প্রতি অনুরাগবশতই দময়ন্তীর কম্প ও রোমাঞ্চ জন্মিয়াছে, তাই তাহারা আনন্দে নৃত্য করিতে লাগিল; তখন অনন্তনাগ লজ্জিত হইয়া ভৃত্যগণকে সে নৃত্য হইতে নিবৃত্ত করিলেন ॥২১॥

अन्वयः—तद्दर्शिभिः स्ववरणे निराशैः फणिभिः निःश्वस्य किमपि तत् अनात्मनीनं सृष्टम्, यत् तान् प्रयातुमनसः अपि विमानवाहाः प्रतीपपवनाशकुनात् हाहा न जग्मुः ॥२२॥

तदिति। तद्वासुकेरेव यल्लक्ष्य द्रष्टुं शीलं येषां ते, अतएव स्ववरणे निराशैः, फणिभिः पद्मादिभिरन्यैः नागैः, निःश्वस्य दीर्घं निःश्वासं परित्यज्य, किमपि अनिर्वचनीयम्, तत्तादृशम्, अनात्मनीनम् आत्मनामहितम्, सृष्टं कृतम्। यत्, तान् फणिनः प्रति प्रयातुमनसोऽपि गन्तुकामा अपि विमानवाहाः विमानतुल्यशिविकावाहकाः, प्रतीपः प्रतिकूलः पवनः फणिगणकृतदीर्घनिःश्वासवायुरेव अशकुनम् अशुभसूचकनिमित्तं तस्मादिति, हाहा कष्टम्, न जग्मुः, तेषामन्यान्यनागानां समीपमेव न गतवन्तः।

अत्र प्रयातुमनस्त्वरूपे कारणे सत्यपि गमनरूपतत्कार्याभावात् सनिमित्ता विशेषोक्तिरलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः ॥२२॥

বাঙ্গালা—পদ্ম-মহাপদ্মপ্রভৃতি অন্যান্য নাগেরা বাসুকির সেই অবস্থা দেখিয়া, আপনাদিগকে বরণ করার বিষয়ে নিরাশ হইয়া, দীর্ঘ নিশ্বাস ত্যাগ করিয়া, আপনাদের অনির্বচনীয় তাদৃশ অহিতের সৃষ্টি করিলেন। যাহাতে শিবিকাবাহকেরা তাঁহাদের দিকে যাইতে ইচ্ছা করিলেও, হায় হায়! প্রতিকূল বায়ুরূপ অমঙ্গলকে দেখিয়া আর সে দিকে গেল না ॥২২॥

देव्याभ्यधायि भव भीरु! धृतावधाना भूमीभुजस्त्यजत (१) भीमभुवो निरीक्षाम्।
आलोकितामपि पुनः पिबतां दृशेमामिच्छा विगच्छति न वत्सरकोटिभिर्वः ॥२४॥
लोकेशकेशवशिवानपि यश्चकार शृङ्गारसान्तरभृशान्तरशान्तभावान्।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन संक्षोभयन् वितनुतां वितनुर्दधे वः ॥२५॥

अन्वय.—इन्दुकिरणाः सन्ध्या समयसङ्कुचितात् कमलात् विनीय हाटकाभं कह्लारम् इव, विलासवत्या श्री सङ्कुचन् [illegible] विनीय तां राजचक्रम् अनयत् ॥२३॥

श्रीति। इन्दोश्चन्द्रस्य किरणाः, सन्ध्यायां समयसङ्कुचन्ति दलकमलानि [illegible] कमलात् पद्मात्, विनीय अपसार्य, हाटकाभं प्रकाशशालिनम्, कह्लारं सौगन्धिकमिव, विलासवत् [illegible], श्रिया दमयन्तीपरित्यागनिबन्धनया लज्जया सङ्कुचन् [illegible] तस्मात्, [illegible] विनीय, तां दमयन्तीम्, राज्ञां भूमिपतीनां चक्रम्, अनयत्।

अत्र श्रौतोपमालङ्कारः। हाटकशब्दस्य प्रकाशार्थावाचकत्वादवाचकत्वदोषः, सौगन्धिकमिति पाठेन च तत्-समाधानम्। पुष्पिताग्रा पूर्ववत् ॥२३॥

বাঙ্গালা—চন্দ্রের কিরণ যেমন সন্ধ্যাকালে সঙ্কুচিতদল পদ্মের নিকট হইতে সরাইয়া নিয়া, প্রকাশশোভাকে সুবর্ণাভ কহলারের উপরে উপস্থিত করে, তেমন [illegible] লজ্জায় সঙ্কুচিতবর্ণ রাজার নিকট হইতে সরাইয়া নিয়া, দমযন্তীকে রাজাদের নিকট উপস্থিত করিল ॥২৩॥

अन्वयः—देव्या अभ्यधायि—(हे) भीरु! धृतावधाना भव, (हे भूमीभुजः!) (यूयम्) भीमभुवः निरीक्षां त्यजत। आलोकिताम् अपि एतां दृशा पुनः पिबतां वः इच्छा वत्सरकोटिभिः न विगच्छति ॥२४॥

देव्येति। देव्या सरस्वत्या, अभ्यधायि अभिहितम्। [illegible]

[illegible]

अत्र [illegible] ॥२४॥

বাঙ্গালা—[illegible] ॥২৪॥

---

(१) [illegible]

पुष्पेषुणा ध्रुवममूनिषुवर्षजप्त-[१]हुङ्कारमन्त्रबलभस्मितशान्तिशक्तीन्।
शृङ्गारसर्गरसिकद्व्यणुकोदरि! त्वं द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥२६॥
स्वादूदके जलनिधौ सवनेन सार्द्धं भव्या भवन्तु तव वारिविहारलीलाः (२)।
द्वीपस्य तं पतिममुं भज पुष्करस्य निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि! ॥२७॥

अन्वयः—यः लोकेश-केशव-शिवान् अपि शृङ्गार-शान्तर-समान्तर-आत्मभावान् चकार, (सः) वितनुः इषुपञ्चकेन जगतां पञ्च इन्द्रियाणि संक्षोभयन् वः मुदं वितनुताम् ॥२५॥

लोकेशेति। हे राजानः। यो वितनुः कामः, लोकेश-केशव-शिवानपि अन्येषां का कथा स्वयं ब्रह्म-विष्णु-महेश्वरानपि, शृङ्गारेण शान्तरः शान्तप्रधानो दूरीकृत इत्यर्थः, अत एव सातिशयम् आन्तरम् अन्तःकरणवर्त्ती आत्मभावः आत्मरसो येषां तान् तथोक्तान्, चकार, अशीमशक्तिशालीत्यर्थः, अतएव युष्माकं मुदो जननेऽपि शक्तिरस्त्येवेति भावः। स वितनुरनङ्गः कामः, इषूणां बाणानां पञ्चकेन, जगतां जगद्वासिनां जनानाम्, पञ्च इन्द्रियाणि चक्षुरादीनि, संक्षोभयन् विकारयन्, अतएव युष्माकमपि मुदात्मकविकारं जनयिष्यत्येवेत्याशयः; वो युष्माकम्, मुदम् अत्र सम्मेलनेनानन्दम्, वितनुतां विस्तारेण करोतु। पूर्वश्लोकेन राजानो विमनोभवा अनेन च प्रसादिता इति बोध्यम्।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः। माधुर्यं गुणः, वैदर्भी च रीतिः ॥२५॥

বাঙ্গালা—রাজগণ। যিনি ব্রহ্মা, বিষ্ণু এবং মহাদেবের অন্তঃকরণ হইতেও শৃঙ্গার-রস দ্বারা শান্তরসকে দূরীভূত করিয়া থাকেন, সে কামদেব পাঁচটী বাণ দ্বারা জগদ্বাসী লোকের পাঁচটী ইন্দ্রিয়কে বিক্ষুব্ধ করতঃ আপনাদের আনন্দ বর্দ্ধন করুন ।২৫।

अन्वयः—[हे] शृङ्गार-सर्ग-रसिक-द्व्यणुकोदरि! त्वं ध्रुवं पुष्पेषुणा इषु-वर्ष-जप्त-हुङ्कार-मन्त्र-बल-भस्मित-शान्ति-शक्तीन् अमून् द्वीपाधिपान् नयनयोः गोचरत्वं नय ॥२६॥

पुष्पेषुणेति। शृङ्गारस्य रसस्य सर्गे सृष्टौ रसिकम् अनुरागि यत् द्व्यणुकं तद्वत् सूक्ष्ममुदरं यस्यास्तत्सम्बोधनम्। त्वम्, ध्रुवं निश्चितमेव, पुष्पेषुणा कामेन, इषुवर्षे बाणक्षेपसमये जप्तो यो हुङ्काररूपो मन्त्रस्तस्य बलेन सामर्थ्येन भस्मिता भस्मीकृता नाशितेत्यर्थः, शान्तिशक्तिः शान्तरसप्रभावो येषां तान् तथोक्तान्, अतएव द्वीपान्तरादपि त्वदर्थमवागतानिति भावः, अमून् द्वीपाधिपान् पुष्करादिद्वीपाधिपतीन्, नयनयोरात्मचक्षुषोः, गोचरत्वं विषयत्वम्, नय प्रापय, सानुरागं पश्येत्यर्थः।

अत्र पूर्वार्द्धे वाच्या क्रियोत्प्रेक्षालङ्कारश्छेकानुप्रासेन संसृज्यते। शृङ्गारशब्दोपादानात् रसस्य स्वशब्दोक्तिदोषः, स च 'उन्मादसर्गे—' इत्यादिपाठेन समाधेयः। समासबाहुल्यादोजो गुणः, गौड़ी च रीतिः।

जप्तेति "जपिवमिभ्यां वा" इति पक्षे इडागमाभावः ॥२६॥

বাঙ্গালা—যে দ্ব্যণুক শৃঙ্গাররস সৃষ্টি করিবার জন্য অভিলাষী, তোমার উদরটী তাহারই তুল্য সূক্ষ্ম। হে দময়ন্তি! তুমি এই দ্বীপাধিপতিদিগকে দর্শন কর, বাণবর্ষণ করিবার সময়ে কামদেব যে হুঙ্কারমন্ত্র জপ করিয়া থাকেন, সেই মন্ত্রশক্তিই নিশ্চয় ইঁহাদের শান্তরসের ক্ষমতাকে নষ্ট করিয়া দিয়াছিল ।২৬।

अन्वयः—(हे) निस्तन्द्र-पुष्कर-तिरस्करण-क्षमाक्षि! स्वादूदके जलनिधौ सवनेन सार्द्धं तव वारिविहारलीलाः भव्या भवन्तु। पुष्करस्य द्वीपस्य पतिं तम्-अमुं भज ॥२७॥

---

(१) … इषुवर्षजपि …। (२) …वारिविगाहलीला।

तावत्तेनाविभवदन्न् तनभिकृपं ! स्वर्नोत्सवतद्रवतां ननाकिनैव ।
स्वागान्यनजे यनि न वियलितद्दीय सेनदृष्टेर् दविस्तत [illegible] स्वैरिनम् ॥२८॥
देव स्वयं वसति तत्र किल स्वयम्भुः न्यग्रोधमण्डलतले हिमशैलतले च ।
तत्त्वां विलोक्य निजगिरिमनन्यकल्प तवैव [illegible] [illegible] ॥२९॥

[illegible] ।
[illegible] ॥२०॥
[illegible] ।
[illegible] ॥२१॥

[illegible]

[illegible]

বঙ্গানুবাদ—[illegible]

अन्वयः—[illegible]

[illegible]

अत्र प्रथमे पादे [illegible], द्वितीये [illegible], चतुर्थे प्रतीयमाना [illegible], [illegible] इति [illegible] ॥२०॥

বঙ্গানুবাদ—আকাশ হইতে নিপতিত রৌদ্র ও বৃষ্টিতে নীচে৷ নিচে রোদ [illegible] বলিয়াই যেন তাহার নাম হইয়াছে '[illegible]'; আর সে যেন বগুলি দ্বারা আপনার ভাব প্রকাশ করিতেছে এবং পরিণত [illegible] সকলের শোভা দ্বারা যেন মুকুরী [illegible] অবস্থান করিতেছে, তুমি যাইয়া সেই [illegible] দেখ ॥২০॥

अन्वयः—यस्य राजहंसस्य प्रियतमा कीर्तिः कथं न श्वेतताम्, कथं वा भुवनेषु न चरतु। तत् न चित्रम्, (यत्) विशदिमाद्वयम् आदिशन्ती क्षीरं च अम्बु च मिथः पृथक् न आतनोति ॥२१॥

नेति। यस्य, राज्ञः हंस इव तस्य नृपतेश्च हंसस्य, अन्यत्र राजहंसस्य पक्षिणः, प्रियतमा अतीव-प्रीतिकरी कीर्तिः, अन्यत्र राजहंसी पक्षिणी च, कथं न श्वेतता श्वेतवर्णा न भवतु, अपि तु श्वेततामेव, एकत्र "यशसि धवलता वर्ण्यते हासकीर्त्योः" इति कविसमयात् अन्यत्र तस्याः श्वेतवर्णस्य स्वाभाविकत्वादिति भावः। कथं वा भुवनेषु त्रिषु जगत्सु, अन्यत्र जलेषु, न चरतु, अपि तु चरत्वेवेत्यर्थः, एकत्र त्रिभुवन-व्याप्तिनिर्णयमानत्वात् अन्यत्र राजहंस्या जलविचरणस्य स्वाभाविकत्वादित्याशयः। अत न चित्रमित्यपि भावः। तु किन्तु, तत् चित्रमाश्चर्यम्, यत् विशदिम, शुभ्रताया अद्वयमैक्यम्, आदिशन्ती उत्पादयन्ती जगता सर्वत्रैव श्वेततामारोपयन्तीत्यर्थः सा कीर्तिः, क्षीरं दुग्धञ्च, अम्बु जलञ्च, मिथः परस्परम्, पृथक् भिन्नप्रतीतिविषयम्, न आतनोति न करोति। एकत्र क्षीराम्बुनीरपृथक्प्रतीतिजननमेवाश्चर्यम्, अन्यत्र तु हंस्यापि क्षीरा-म्बुनीरपृथक्करणमेवाश्चर्यम्, सर्वत्र तथा तयोः पृथक्करणदर्शनादिति भावः।

शूरेऽपि सूरिपरिषत्प्रथमाञ्चितेऽपि शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम यत् कोमलं न किल तस्य नलेति नाम ॥२२॥
भ्रूवल्लिवेल्लितमथाकृतिमङ्गमेषा लिङ्गं चकार तदनादरणस्य विज्ञा ।
राज्ञोऽपि तस्य तदलाभजतापवह्नि-दिग्धोबभूव मलिनच्छविधूमधूमः ॥२३॥

अत एव अपि कौमुदी न पृथक् करोतीति विरोधाभ ... तदेव ... वदनदृष्ट्या-
दतिशयोक्ति, विरहिणाङ्गादिम्नोति सामान्यम्, तत्पदार्थस्य च कौमुदी ... प्रति हेतुत्वात्
काव्यलिङ्गम्, मस्तकस्य कौमुदी ... राजह ... वृत्तं ... इत्यनुरागवर्णन-
तेषां च सृष्टिः । प्रासादी गुण, वैदर्भी च रीति ।

"भुवन विष्टपेऽपि स्यात् सलिले गगने जले" इति मेदिनी ।

अतनिति "ब्लिता मर्दे" इत्यस्य पञ्चम्या आत्मनेपदमप्रयुक्तं कथने कलम् । ... विस्र-
दिका ... ॥२१॥

বাঙ্গালা—নৃপতিশ্রেষ্ঠ এই মদনের প্রিয়তমা কীর্তি কেন শ্বেতবর্ণ হইবে না ?
কেনই বা ত্রিভুবন বিচরণ করিবে না ? কিন্তু ইহাই আশ্চর্য যে, এই কীর্তি একবার
শুভ্রতা উৎপাদন করিয়া ভুবনও জনকে পরস্পর পৃথক করে না ॥২১॥

অন্বয় —इयं शूरे अपि, सूरिपरिषत् प्रथमाञ्चिते अपि, शृङ्गारभङ्गिमधुरे अपि, कलाकरे अपि,
तस्मिन् तत् एव अवद्यम् आप नाम, यत् तस्य नलेति कोमलं किल नाम न ॥२२॥

शूर इति । इयं दमयन्ती, शूरे वीरेऽपि, सूरिपरिषदि पण्डितसभायां ... [illegible]
... [illegible] ... मधुरे मनोहरेऽपि, ... [illegible]
तस्मिन् नले, तदेव अवद्यं दोषम्, आप प्राप ... [illegible]
नलेति कोमलं नाम ... [illegible]

[illegible]

বাঙ্গালা—[illegible]

[illegible]

অন্বয়:—[illegible]

[illegible]

[illegible]

राजान्तराभिमुखमिन्दुमुखीमथैनां याम्या जना (१) हृदयवेदितयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधान-वाचा भवत्यवसरः सति भव्यभृत्ये ॥३४॥
जल्पे पुनर्भगवती नृपमन्यमस्यै निर्दिश्य दृश्यतमताधमताश्विनेयम् ।
आलोक्यतामयमये कुलशीलशाली शालीनतानतमुदस्य निजास्यबिम्बम् ॥३५॥
एतत्पुरःपठदपत्रपवन्दिवृन्द-वाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदाना-मर्थोऽपि नाथ पुनरुक्तिषु पातुकानाम् ॥३६॥

বাঙ্গালা—বুঝিলাম দময়ন্তী প্রথমে জানিলেন, পরে যমের লোকটাকে (লোক-মুণ্ডকে) নরকরাজার পরিত্যাগের সূচক করিলেন। আবার সেই নরকরাজের বলিয়া কৃষ্ণবর্ণ প্রচুর ধূম, দময়ন্তীর প্রত্যাখ্যাত দুঃখানলের চিহ্ন হইল।৩৩।

অন্বয়ঃ—অথ याम्या जनाः हृदयवेदितया एव एनाम् इन्दुमुखीं राजान्तराभिमुखं निन्युः । अन्यानपेक्षितविधौ भव्यभृत्ये सति प्रधानवाचाम् अवसरः न भवति खलु ॥३४॥

राजेति । अथ सुवर्णपरित्यागानन्तरम्, याम्या, शिबिकावाहका जनाः, हृदयवेदितयैव दमयन्त्या अभिप्रायाभिज्ञतयैव हेतुना, एनामिन्दुमुखीम्, दमयन्तीम्, राजान्तरस्य अभिमुखम् निन्युः । तथा च अन्यस्य प्रभोरनपेक्षितो विधिर्नियोगो येन तस्मिन् तादृशे, भव्यभृत्ये निपुणकिङ्करे, सति विद्यमाने, प्रधानस्य प्रभोर्वाचां नियोगवचसाम्, अवसरो न भवति । खलु वाक्यालङ्कारे ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ॥३४॥

বাঙ্গালা—তাহার পর শিবিকা বাহক লোকেরা দময়ন্তীর মনের ভাব বুঝিয়া বলিয়াই সেই চন্দ্রমুখীকে অন্য রাজার সম্মুখে নিয়া গেল। কারণ, যে ভৃত্য প্রভুর আদেশের অপেক্ষা করে না, সেইরূপ ভাল ভৃত্য থাকিতে, প্রভুর আদেশ বাক্যের অবসর হয় না।৩৪।

অন্বয়ঃ—भगवती दृश्यतमताधमताश्विनेयम् अन्यं नृपम् अस्यै निर्दिश्य पुनः जल्पे । अयि ! शालीनतानतं निजास्यबिम्बम् उदस्य कुलशीलशाली अयम् आलोक्यताम् ॥३५॥

जल्प इति । भगवती सरस्वती, दृश्यतमतया परमसुन्दरत्वेन अधमतौ अधमभावौ आश्विनेयौ अश्विनीकुमारद्वयं येन तम्, अन्यं नृपम्, अस्यै दमयन्त्यै, निर्दिश्य प्रदर्श्य पुनर्जल्पे वक्ष्यमाणं पुनः कथितवती । अयि दमयन्ति ! शालीनतया लज्जया नतम्, निजास्यबिम्बं स्वकीयमुखमण्डलम्, उदस्य उत्तोल्य, अयं नृपः, आलोक्यताम् ।

अत्र अधमतेत्यनेन सादृश्याक्षेपादार्थोपमालङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येषां सङ्करः । माधुर्यं गुणः, वैदर्भी च रीतिः ॥३५॥

বাঙ্গালা—সৌন্দর্য্যে অশ্বিনীকুমার অপেক্ষাও উৎকৃষ্ট অন্য কোন রাজাকে দময়ন্তীকে দেখাইয়া দিয়া সরস্বতী পুনরায় বলিলেন—'দময়ন্তি! লজ্জাবনত নিজ মুখখানিকে উত্তোলন করিয়া, কুলশীলসম্পন্ন এই রাজাকে দেখ।৩৫।

অন্বয়ঃ—एतत् पुरः पठदपत्रप वन्दि वृन्द-वाग्डम्बरैः अनवकाशतरे अस्मिन् अम्बरे उत्पत्तुं मत्पदानां पदम् एव न अस्ति, अथ पुनरुक्तिषु पातुकानाम् अर्थः अपि न अस्ति ॥३६॥

एतदिति । एतस्य राज्ञः पुरः सम्मुखे पठत् स्तुवत् अपत्रपम् उच्चगुणवर्णनेन उत्कटविक्रमाय अभावात्

---

(१) जना जनीम् ... ।

नन्वत्र इन्द्र इति विश्रुतनाम्नि शाक-द्वीपप्रशासिनि सुधीषु सुधीभवन्त्या।
एतद्भुजाविरुदवन्दिजयानयापि किं रागि राजनि गिराजनि नान्तरं ते ॥३७॥
शाकः मुकाङ्कदसमङ्कविपत्रमाल-भारी हरिष्यति तरुस्तव तत्र चित्तम्।
यत्पल्लवौघपरिरम्भविजृम्भितेन ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥

परिमितरुक्त्वेव यत् बन्दिवृन्द स्तुतिपाठकगणस्य वाग्डम्बरैर्वाक्यघटनाटोपैः करणैः, अनवकाशान्तरे अन्तरावकाशशून्ये गगनाख्ये व्याप्त इत्यर्थः, यस्मिन् अम्बरे आकाशे, उत्पत्तुम् उद्भवितुम्, मत्पदानां मया कर्त्तव्यानां स्तुति-रूपाणां वर्णनरूपाणाम्, पदं स्थानमेव, नास्ति, बन्दिवृन्दवाग्डम्बरैरेव सर्वदा व्याप्तत्वादिति भावः। 'आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः' इत्युक्तेराकाशमेव शब्दानामुत्पत्तिस्थानमिति बोध्यम्। तथा अर्थानाम-भिधेयानां पुनरुक्तिषु पौनरुक्त्यदोषेषु, मातृकाणां [illegible] अर्थपौनरुक्त्यदोषघटकानामित्यर्थः मत्पदानाम्, अर्थेऽपि पदनिधेयत्वमपि नास्ति, साकल्येन बन्दिवृन्दैरेव कथनादित्यर्थः। तेनैतद्वर्णनान्यया विरम्यत इति तदुदाराभिप्रायः।

अत्र अवकाशपदार्थानां सम्बन्धेऽपि तदसम्बन्धाभिधानरूपातिशयोक्तिः, पदस्थानाभावे [illegible] इति अनवकाशतत्र इति पदार्थौ हेतुरिति काव्यलिङ्गम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येषां सङ्करः। [illegible] वैदर्भी च रीतिः ॥३६॥

বাঙ্গালা—এই রাজার সম্মুখে স্তুতিপাঠকদের পরিপূর্ণবিহীন [illegible] আকাশ পরিপূর্ণ হইয়া গিয়াছে, সুতরাং আমার বাক্যের পদ যে এই আকাশে উৎপন্ন হইবে, তাহার স্থানই নাই এবং অর্থগতপুনরুক্ততাদোষের হেতু আমার পদের [illegible] নাই ।৩৬।

অন্বয়:—নতু (দময়ন্তি!) তে অন্তর ইন্দ্র ইতি বিশ্রুতনাম্নি শাকদ্বীপপ্রশাসিনি অত্র রাজনি এতদ্ভুজাবিরুদ-বন্দিজয়া সুধীষু সুধীভবন্ত্যা অনয়া গিরা অপি কিং রাগি ন অজনি ? [illegible]

नन्वत्रेति। ननु हे दमयन्ति। ते तव अन्तरं मनः, इन्द्र इति विश्रुत [illegible] शाकद्वीपस्य प्रशासिनि अधिपतौ, अत्र अस्मिन् राजनि, एतस्य [illegible] स्तुतिकर ये वन्दिनः पाठकास्तेषां [illegible] इति तथा, सुधीषु [illegible] अनया गिरा वाचापि किं रागि अनुरक्तम्, न अजनि [illegible] किन्तु [illegible] जनकवैश्चित्रमेतिति भावः।

अत्र सुधीभवन्तीति [illegible] सङ्करः। वृत्तम् पूर्ववत्।

"[illegible]" [illegible]

[illegible]

[illegible]

[illegible]

अन्वयः—[illegible]

[illegible]

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा यन्मारुतः कमपि सम्मदमादधाति।
कौतूहलं तदनुभूय विधेहि भूयः श्रद्धां पराशरपुराणकथान्तरेऽपि ॥३९॥
क्षीरार्णवस्तव कटाक्षरुचिच्छटानामन्वेतु तत्र विकटायितमायताक्षि!।
वेलावनीवनततिप्रतिबिम्बचुम्ब-किर्म्मीरितोर्म्मिचयचारिमचापलाभ्याम् ॥४०॥ (१)

शाक इति। तत्र शाकद्वीपे, शुकस्य पक्षिणो ये छदाः पक्षास्तेषां समा तुल्या रुचिः कान्तिर्यासां तादृशीः पत्रमालाः पर्णश्रेणीः बिभर्त्तीति सः, शाकस्तरुः शाको नाम वृक्षः तव चित्तं हरिष्यति। हरितो दिशः, यस्य शाकतरोः पल्लवौघस्य परिरम्भः स स्पर्श एव विजृम्भितं विलसितं तेन, जगत्सु हरितो हरिद्वर्णाः, ख्याताः सत्यः, स्फुरन्ति प्रकाशन्ते। अतो द्वीपस्य वरणमेव तवोचितमिति भावः।

अत्र दिशां तत्पल्लवौघसंस्पर्शनिमित्तकहरित्त्वासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिः, शुकेत्यादावार्थोपमा, अन्यत्र छेकानुप्रासश्चेत्येतेषां संसृष्टिः। गुणरीती पूर्ववत्।

मालभारीति "याकारौ—" इत्यादिना उक्तम् ॥३८॥

বাঙ্গালা—সেই শাকদ্বীপে শাকনামে একটী বৃক্ষ আছে, সে শুকপক্ষীর পক্ষের ন্যায় পত্রসমূহ ধারণ করে, সেই শাকবৃক্ষ তোমার মন হরণ করিবে। যে শাকবৃক্ষের পল্লবের সংস্পর্শে সমস্ত দিক্ হরিদ্বর্ণ বালয়া বিখ্যাত হইয়া শোভা পাইতেছে ॥৩৮॥

अन्वयः— तत्र तत्तरुपत्रजन्मा मारुतः स्पर्शेन कम् अपि सम्मदं यत् आदधाति किल, तत् कौतूहलम् अनुभूय पराशरपुराणकथान्तरे अपि भूयः श्रद्धां विधेहि ॥३९॥

स्पर्शेनेति। तत्र शाकद्वीपे, तस्य तरोः शाकवृक्षस्य पत्राज्जन्म यस्य स तथोक्तः, मारुतो वायुः, स्पर्शेन, कमपि अनिर्वचनीयम्, सम्मदमानन्दम्, यत् आदधाति जनयति। किलेति पुराणवार्त्तायाम्। तत् कौतूहलं कौतूहलजनकं सम्मदम्, अनुभूय तत्र गमनेन स्वयं प्रत्यक्षीकृत्य, पराशरः पराशरपुत्रो व्यासस्तस्य यत् पुराणं विष्णुपुराणं तस्य कथान्तरेऽपि अन्यान्योपाख्यानेऽपि, भूयसी चासौ श्रद्धा चेति ताम् अतीवविश्वासमित्यर्थः, विधेहि कुरुष्व, एकोपाख्यानस्य प्रत्यक्षेण सत्यताया अनुभवात् उपाख्यानान्तरस्य तथैव सत्यता अनुमीयत इति भावः।

अत्र छेकानुप्रासोऽलङ्कारः। माधुर्य्यं गुणः, वैदर्भी च रीतिः।

विष्णुपुराण एव तादृशशाकतरूपाख्यानदर्शनादुक्तविधव्याख्यानमेव युक्तम्। तथा च विष्णुपुराणे—

"शाकस्तत्र महान् वृक्षः सिद्धगन्धर्वसेवितः। यत्पत्रवातसंस्पर्शादाह्लादो जायते परः" ॥३९॥

বাঙ্গালা—সেই শাকদ্বীপে সেই শাকবৃক্ষের পত্র হইতে উৎপন্ন বায়ু যে স্পর্শ দ্বারা অনির্বচনীয় আনন্দ উৎপাদন করে, সেই কৌতুকজনক আনন্দ অনুভব করিয়া, ব্যাস-রচিত বিষ্ণুপুরাণের অন্য উপাখ্যানেও, বিশেষরূপে বিশ্বাস কর ॥৩৯॥

अन्वयः—(हे) आयताक्षि! तत्र क्षीरार्णवः वेलावनीवनततिप्रतिबिम्बचुम्ब-किर्म्मीरितोर्म्मि-चय-चारिम-चापलाभ्यां तव कटाक्षरुचि-च्छटानां विकटायितम् अन्वेतु ॥४०॥

---

(१) चत्वारि शतानपद्यात् परमिदं पद्यद्वयं पुस्तकान्तरे दृश्यते। यथा—

कल्लोलजालचलनोपनतेन पीत्वा जीवातुनानवरतेन पयोरसेन।
अच्छिन्नलक्ष्मपरिमण्डलितोरुमूर्त्तिरध्यास्यते मधुभिदा भुजगाधिराजः ॥१॥
तद्रूपसम्पदवलोकनजातशङ्का पादाब्जयोरिह कराङ्गुलिलालनेन।
भूयाभिशाय कमला कलितावधाना निद्रानुबन्धमनु रोधयितुं प्रवृत्ता ॥२॥ —

बालातपैः क्षतकरीकृतां कृता द्विस्तलोदयाचलशिलाः परिशीलयन्तु ।
त्वद्विभ्रमभ्रमगजभ्रमवारिधारि-पादाङ्गुलीगलितया नखलाक्षयापि ॥४१॥
नृणां कराम्बितमुदामुदयन्म् गाढ-गङ्गा मृजलवनवजाङ्गि परिभ्रमन्त्याः ।
तत्रोदयाद्रिशिखरे तव दृश्यनाम्य काश्मीरसम्भवसमार्चनाभिरामम् (१) ॥४२॥

क्षीरेति । हे आयताक्षि । विशालनयने । दमयन्ति । तव शाकद्वीपे, क्षीराणां दुग्धसमुद्र, [illegible] यस्यां तीरभूमौ या वनतति काननश्रेणिस्तस्या प्रतिबिम्बस्य यत्तु [illegible] दत्तरदत् [illegible] विचिवीकृतो य ऊर्मिचयस्तरङ्गसमूहस्तस्य याविमा [illegible] सौन्दर्य [illegible] तव कटाक्षस्य या कथिकटा सौन्दर्यपरम्परामासाम्, विकटायित विशालत्वम्, [illegible] तु तव [illegible] । तथा च तव नयन पदिति श्वेतम्, नीलतारामालित्वान्मध्ये नीलम्, स्वभावत सुन्दर [illegible] । क्षीरसमुद्र-तरङ्गोऽपि स्वभावत श्वेत, नीलवनप्रतिबिम्बपतनान्मध्ये नील, अतएव सुन्दर, [illegible] । तेन क्षीर-समुद्रतरङ्गस्तव कटाक्षमनुकरोति प्रतीत्यैवेति भाव ।

अत एवात्र आर्थीपमालङ्कारश्च [illegible] न मृष्यते । [illegible] गौडी च रीति ।

"विकट सुन्दरे प्रोक्तो विशालविकरालयो" इति विश्व ।

विकटवदाचरितमिति विकटायितम्, भावे क्त । [illegible]

বাঙ্গালা—হে বিশালনয়নে। সেই শাকদ্বীপে ক্ষীরসমুদ্রের [illegible] হইতে প্রতিবিম্ব আসিয়া, তাহার তরঙ্গসমূহের মধ্যে পড়ে, [illegible] হইয়া যায়, ক্ষীরসমুদ্র সেই সুন্দর ও চঞ্চল তরঙ্গসমূহ দ্বারা তোমার [illegible] অনুকরণ করুক ॥৪০॥

অন্বয়,—[illegible]

[illegible]

[illegible]

[illegible]

বাঙ্গালা—[illegible]

[illegible]

एतेन ते विरहपावकमेत्य तावत् कामं स्वनाम कलितान्वयमन्वभावि।
अङ्गीकरोषि यदि तत्तव नन्दनाद्यै-र्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥४३॥
लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सामुत्र दूषणसजोगणदेकमेव नार्यो बभूव मघवा यदमुष्य देवः ॥४४॥

अन्वयः—(हे) अनघजङ्घि। तव उदयाद्रिशिखरे परिचलन्त्याः तव काश्मीरसम्भव-समारचनाभिरामं दृश्यम् आस्यं करम्बितमुदां नृणाम् उदयन्मृगाङ्कशङ्कां सृजतु ॥४२॥

नृणामिति। हे अनघजङ्घि। निर्दोषजङ्घाशालिनि। तत्र शाकद्वीपे, उदयाद्रिशिखरे उदयपर्वतशृङ्गे, परिभ्रमन्त्यास्तव, काश्मीरसम्भवेन कुङ्कुमेन या समारचना विलेपनं तया अभिरामं मनोहरम्, अतएव दृश्यं द्रष्टव्यम्, आस्यं मुखं कर्तृ, करम्बितमुदां सञ्जातहर्षाणाम्, नृणां तत्रत्यलोकानाम्, उदयन् उदयावस्थो यो मृगाङ्कश्चन्द्रस्तस्य शङ्का सन्देहं भ्रमं वा सृजतु करोतु, कुङ्कुमलिप्तमुखस्य उदयावस्थचन्द्रस्य च समानरक्तत्वादित्याशयः।

अत्र शङ्काशब्दस्य भ्रमसन्देहोभयार्थसम्भवात् भ्रान्तिमत्सन्देहालङ्कारयोः सन्देहसङ्करश्छेकानुप्रासेन संसृज्यते। गुणरीती पूर्ववत् ॥४२॥

বাঙ্গালা—হে সুন্দর জঙ্ঘাশালিনি! সেই শাকদ্বীপে উদয়পর্বতের শৃঙ্গে তুমি বিচরণ করিলে, তখন তোমার কুঙ্কুমলিপ্ত সুন্দর মুখখানি, তত্রত্য আনন্দিত লোকদিগের উদয়মান চন্দ্রের ভ্রম জন্মাইবে ॥৪২॥

अन्वयः—ननु। एतेन कामं ते विरहपावकम् एत्य स्वनाम कलितान्वयं तावत् अन्वभावि। (इदानीं त्वं) यदि अङ्गीकरोषि तत् अयं स्वम् अपि तव नन्दनाद्यैः लब्धान्वयम् आतनोतु ॥४३॥

एतेनेति। ननु हे दमयन्ति! एतेन शाकद्वीपराजेन, कामं पर्याप्तम्, ते तव, विरह एव पावको वह्निस्तम्, एत्य प्राप्य, लोकमुखात् श्रवणेनैव त्वय्यनुरागादिति भावः, स्वनाम हव्य इति निजसंज्ञा, कलितो गृहीत अन्वयः हूयत इति हव्य इति व्युत्पत्तिलभ्यार्थसम्बन्धो येन तत्तादृशम्, तावन्निश्चितम्, अन्वभावि अनुभूतम्, विरहपावके हूयमानत्वात् घृतादिवदिति भावः। इदानीं त्वं यदि अङ्गीकरोषि वरणेन पतित्वेन स्वीकरोषि, तत् तदा, अयं हव्यः, स्वमात्मानमपि, तव नन्दनाद्यैः पुत्रपौत्रादिभिः, लब्धः प्राप्तः अन्वयो वंशो येन तं तादृशम्, आतनोतु करोतु। पूर्वमादेवायं त्वय्यनुरक्तः इत्येनमेव वृणीष्वेति भावः। अतएव वृणीष्वेति यदिशब्देन सूचितम्।

अत्र विरहपावकमिति निरङ्गकेवलरूपकम्, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः। तदित्यस्य यदीत्यनेन सम्बन्धाघटनादभवन्मतसम्बन्धतादोषः, स च "यदि तर्हि तवात्मजाद्यैः" इति पाठेन समाधेयः। गुणरीती पूर्ववत् ॥४३॥

বাঙ্গালা—দময়ন্তি! এই শাকদ্বীপের রাজা পূর্বেই তোমার অত্যন্ত বিরহানল প্রাপ্ত হইয়া, 'হব্য' এইরূপ নিজের নামটীকে যোগার্থসম্পন্ন বলিয়া অনুভব করিয়াছেন, এখন যদি তুমি উঁহাকে পতিরূপে স্বীকার কর, তবে উনি পরেও তোমার পুত্রপৌত্রপ্রভৃতি দ্বারা নিজেকেও সান্বয় (বংশযুক্ত) বলিয়া অনুভব করুন ॥৪৩॥

अन्वयः—सा लक्ष्मी-लता-समवलम्ब-भुज-द्रुमे अपि वाग्देवतायतन-मञ्जु-मुखाम्बुजे अपि अमुत्र एकम् एव दूषणम् अमीमिलत्, यत् मघवा देवः अमुष्य भर्ता न बभूव ॥४४॥

लक्ष्मीविलासवसतेः सुमनःसु मुख्यात् अस्मादिकृत्य भुवि लब्धगुणप्रसिद्धिम् ।
स्थानान्तरं तदनु निन्युरिमां विमान-वाहाः पुनः सुरभितामिव गन्धवाहाः ॥४

भूयस्तनो निखिलवाङ्मयदेवता सा भैमोपमेयतनुभासमभाषतैनाम् ।
एनं स्वबाहुबहुवारनिवारितारिं चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ! ॥४६

लक्ष्मीति । सा दमयन्ती लक्ष्मीरेव लता तस्याः कनकस्तम्भ आदर्शो भुज एव द्रुमो इक्षो यस्य तस्मिन् [illegible] इऽपि तदा आयदेवगणाः कल्पवृक्षा आलवनाद्यद्भुत नवं मनोहर मुकुलेव अम्बुज यस्य तस्य [illegible] तदीनेऽपि, अनुव इन्थे राजनि, एकमेव द्रुपदम्, अनौपम्य ग्रथितवती, यत नघवा इन्द्रो देव [illegible] इन्द्रस्य अर्थी दायक, न बभूव, नलस्तु बभूव, तेन नलादिवदा इन्द्रस्य न्यूनत्वात् नलान्यदा [illegible] इतवतीति भाव ।

अत्र लक्ष्म्या लतात्वारोपो भुजे द्रुमत्वारोप प्रति निमित्तमिति परम्परितरूपकम्, द्वितीयपादे तु नि[illegible] [illegible] निरपेक्षतया स सृष्टि । प्रसादो गुण, वैदर्भी च रीति ॥४४॥

বাঙ্গালা—[illegible] বাহুরূপ বৃক্ষ লক্ষ্মীরূপ লতার অবলম্বন হইলেও, [illegible] তাঁহার [illegible] পদ্ম, [illegible] রাজ্যলাভ হইলেও, দময়ন্তী তাহাতে একটীবারও [illegible] করিলেন যে, দেবরাজ ইন্দ্র উঁহার নিকট প্রার্থী হন নাই ॥৪৪॥

अन्वयः—तदनु विमानवाहाः लक्ष्मीविलासवसतेः सुमनःसु मुख्यात् अस्मात् विकृत्य भुवि लब्ध[illegible] प्रसिद्धिम् इमां गन्धवाहाः सुरभिताम् इव पुनः स्थानान्तरं निन्युः ॥४५॥

लक्ष्मीति । तदनु इन्थे दीपनवचनानन्तरम्, विमानवाहाः शिबिकावाहकाः, [illegible] देव्याः विलासवसते [illegible] तथा सुमनःसु विद्वत्सु पुष्पेषु च मध्ये, मुख्यात् प्रधानात् [illegible] अस्मात् पश्चात्, विकृत्य नीत्वा, भुवि पृथिव्याम् लब्धा गुणैः सौन्दर्यादिभि प्रसिद्धिर्यया ताम् [illegible] [illegible] प्रसिद्धिर्यया ताम्, इमां दमयन्तीम्, [illegible] [illegible], सुरभिता सौरभं गन्धमिव, पुन स्थानान्तरं राजान्तरं देशान्तरं, निन्युः [illegible] ।

अत्र पूर्णोपमालङ्कारस्य [illegible] । वृत्तौ गुणौ पूर्ववत् ॥४५॥

বাঙ্গালা—তাহার পর, বাহকেরা লক্ষ্মীর বাসস্থান এবং [illegible] শ্রেষ্ঠ [illegible] হইতে আকর্ষণ করিয়া, জগতে গুণের দ্বারা [illegible] [illegible] [illegible] লক্ষ্মীর বিলাসভবনস্বরূপ এবং পণ্ডিতের মধ্যে শ্রেষ্ঠ [illegible] হইতে উঠাইয়া নিয়া, জগতে সৌন্দর্যাদি গুণ [illegible] রাজার নিকট নিয়া গেল ॥৪৫॥

अन्वयः—[illegible]

[illegible]

द्वीपस्य पश्य दयितं द्युतिमन्तमेतं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण ।
यन्मण्डले स किल मण्डलसन्निवेशः पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः (१)॥४७॥
तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान् ।
हंसावलीकलकलप्रतिनादवाग्भिः स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥४८॥

अत्र ईशोपमेयेत्यादावार्थोपमालङ्कारश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते । प्रसादो गुणः, वैदर्भी च रीतिः ॥४६॥

বাঙ্গালা—তাহার পর, সরস্বতী দেবী পুনরায় স্বর্ণকান্তি দময়ন্তীকে বলিলেন—"দময়ন্তি! তোমার দন্তসমূহ কুরুবিন্দনামক রত্নের সমানশোভাসম্পন্ন; তুমি এই ক্রৌঞ্চদ্বীপাধিপতিকে মনে কর, ইনি নিজবাহুবলেই বহুবার শত্রুদিগকে নিবারণ করিয়াছেন ।৪৬।

অন্বয়ঃ—(হে দময়ন্তি! ত্বং) চঞ্চল দৃগঞ্চল-বিভ্রমেণ ক্রৌঞ্চস্য দ্বীপস্য দযিতম্ এতং দ্যুতিমন্তং পশ্য । যন্মণ্ডলে মণ্ডলসন্নিবেশঃ পাণ্ডুঃ সঃ দধিমণ্ডপয়োধিপূরঃ চকাস্তি কিল ॥৪৭॥

द्वीपस्येति । हे दमयन्ति ! त्वम्, चञ्चलौ यौ दृगञ्चलौ नयनप्रान्तभागौ तस्य विभ्रमेण विलासेन कटाक्षेणेत्यर्थः, क्रौञ्चस्य द्वीपस्य, दयितं पतिम्, एतं द्युतिमन्तं द्युतिमन्नामकं राजानम्, पश्य । यस्य द्युतिमतो राज्ञः मण्डले राज्ये, मण्डलो गोलाकारः सन्निवेशो राज्यस्य सर्वासु दिक्षु अवस्थानं यस्य सः, पाण्डुः शुभ्रवर्णः, स प्रसिद्धः, दधिमण्डपयोधेः दधिमण्डोदनामकसमुद्रस्य पूरः प्रवाहः चकास्ति शोभते । अस्य वरणे तव दधिमण्डोदसमुद्रदर्शनादिकौतुकं भविष्यतीति भावः । किलेति पुराणवार्त्तायाम् ।

अत्र वृत्त्यनुप्रासोऽलङ्कारः । गुणरीती पूर्ववत् ।

"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च । आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥" इति विष्णुपुराणम् ॥४७॥

বাঙ্গালা—দময়ন্তি! তুমি চঞ্চল কটাক্ষপাত দ্বারা ক্রৌঞ্চদ্বীপের অধিপতি এই 'দ্যুতিমান্' নামক রাজাকে দর্শন কর, যাঁহার রাজ্যে গোলাকারে অবস্থিত শুভ্রবর্ণ সেই দধিমণ্ডোদসমুদ্রের প্রবাহ শোভা পাইতেছে ॥৪৭॥

অন্বয়ঃ—তত্র ভবদঙ্ঘ্রিবিহারযাচী ক্রৌঞ্চঃ অদ্রিঃ অস্তি, যঃ হংসাবলীকলকলপ্রতিনাদবাগ্ভিঃ স্কন্দেষুবৃন্দবিবরৈঃ ত্বদীয়ান্ গুণান্ বিবরীতুকামঃ ইব স্ফুরিষ্যতি ॥৪৮॥

तत्रेति । तत्र क्रौञ्चद्वीपे, भवत्यास्तव अङ्घ्रिविहारं चरणविचरणं याचते तथोक्तः अतिकोमलशीतलतया सुखकरत्वात् प्रार्थयत इति स तथोक्तः, क्रौञ्चः क्रौञ्चनामा, अद्रिः अचलः पर्वतः, अस्ति । यः क्रौञ्चाद्रिः, हंसावल्या हंसश्रेण्या कलकलस्य कोलाहलस्य प्रतिनादाः स्वाभ्यन्तरे प्रतिध्वनय एव वाचो विवरणवाक्यानि याभिः तैः, स्कन्दस्य कार्त्तिकेयस्य इषुवृन्देन बाणसमूहेन यानि विवराणि स्वगात्रे छिद्राणि तैः करणैः, त्वदीयान् गुणान्, विवरीतुकामो वर्णयितुकाम इव सन्, स्फुरिष्यति शोभिष्यते । अतएवास्य द्युतिमतो वरणं त्वयैव तव मनननुचितमिति भावः ।

अत्र प्रतिनादेषु वाक्यत्वारोपस्य प्रकृतविवरणोपयोगितया परिणामालङ्कारः, विवरीतुकाम इवेति गम्या गुणोत्प्रेक्षा, अनयोश्चाङ्गाङ्गिभावेन सङ्करः । गुणरीती पूर्ववत् ।

---

(१) पुरः "दधिमण्डपयोधिपूर" इति पाठः ।

वैदर्भि ! दर्भदलपूजनयापि यस्य गर्भे जनः पुनरुदेति न जातु मातुः ।
तस्यार्चनां रचय तत्र मृगाङ्कमौलेस्तन्मालदेवतजनाभिजनः स देशः ॥४९॥
चण्डांशुबिम्बमिहिरोदयगं लपौल-स्तेनाः स्तनन्धयसुधाकरशेखरस्य ।
तस्मिन् सुवर्णरसरूपशरस्य तस्य (१) भूमृद्वटा घटय हैमवटावतंसाः ॥५०॥

पुरा किल कार्त्तिकेया शरै क्रौञ्च विदारयामास । अतएव तस्य क्रौञ्चदारण इति नाम ख्यातमिति स्कन्दपुराणम् ॥৪৮॥

বাঙ্গালা—সেই ক্রৌঞ্চদ্বীপে ক্রৌঞ্চনামে একটী পর্ব্বত আছে, যে ক্রৌঞ্চপর্ব্বত, তোমার চরণযুগল প্রার্থনা করিতেছে, যে ক্রৌঞ্চপর্ব্বত, হংসদিগের [illegible] এবং কার্ত্তিকের বাণক্ষত ছিদ্রযুক্ত [illegible] তোমার [illegible] হইয়া শোভা পাইবে ॥৪৮॥

অন্বয়ঃ—হে বৈদর্ভি ! [illegible]

বৈদর্ভীতি । হে বৈদর্ভি ! [illegible]

तस्मिन् मलिम्लुच इव स्मरकेलिजन्म-घर्म्मोदविन्दुमयमौक्तिकमण्डनं ते ।
जालैर्मिलन् दधिमहोदधिपूरलोल-कल्लोलचामरमरुत्तरुणि ! छिनत्तु ॥५१॥
एतद्यशो नवनवं खलु हंसवेशं वेशन्तसन्तरणदूरगमक्रमेण ।
अभ्यासमर्जयति सन्तरितुं समुद्रान् गन्तुञ्च निःश्रममितः सकलान् दिगन्तान् ॥

বাঙ্গালা—তুমি সে দেশে যাইয়া শিশু শশধর মৌলি শিবের জন্য কতকগুলি সুন্দর-মন্দিররূপ পর্বত নির্ম্মাণ করাও, সে গুলির উপরে স্বর্ণকুম্ভ থাকিবে, তাহাতে সূর্য্য শৃঙ্গের উপরে উঠিলে উদয়পর্বতের সৌন্দর্য্যকে সে মন্দিরগুলি হরণ করিবে; আর স্বর্ণের রস দিয়া সে মন্দিরগুলিকে লিপ্ত করিবে ॥৫০॥

अन्वयः—(हे) तरुणि । तस्मिन् दधि-महोदधि पूर लोल-कल्लोल-चामर-मरुत् जालैः मिलन् (सन्) मलिम्लुच इव ते स्मर केलि-जन्म घर्म्मोदविन्दुमयमौक्तिकमण्डनं छिनत्तु ॥५१॥

तस्मिन्निति । हे तरुणि । आविर्भूतयौवने । तस्मिन् क्रौञ्चद्वीपे, दधिमहोदधेर्दधिमयसमुद्रस्य पूरे प्रवाहे लोलाश्चञ्चला ये कल्लोला महातरङ्गास्त एव दीर्घत्वात् धवलत्वाच्च चामराणि तेषां मरुत् वायुः, जालैर्गवाक्षरन्ध्रैः, मिलन् गृहाभ्यन्तरे प्रविशन् सन्, मलिम्लुचश्चौर इव, ते तव, स्मरकेलेः सुरतात् तत्परिश्रमादित्यर्थः जन्म येषां ते तादृशा ये घर्म्मोदविन्दवो घर्म्मजलकणास्तन्मयं तत्स्वरूपं मौक्तिकमण्डनं मुक्तालङ्कारम्, छिनत्तु, अपहरतु । चौरोऽपि गवाक्षादिना प्रविश्य मुक्तालङ्कारं छित्त्वा हरति । द्युतिमती वरणे समुद्रवायुलाभात् रतिश्रमोऽपि ते न स्यादिति भावः ।

अत्र मलिम्लुच इवेति श्रौतोपमा कल्लोलचामरेति विन्दुमयमौक्तिकेति च निरङ्गं केवलरूपकम्, छेकानुप्रासश्चेति संसृष्टिः । समासबाहुल्यादोजो गुणः, गौडी च रीतिः ।

"प्रतिरोधिपराक्षन्दिपाटच्चरमलिम्लुचाः" इत्यमरः ॥५१॥

বাঙ্গালা—তরুণি! সেই ক্রৌঞ্চদ্বীপে দধিসমুদ্র প্রবাহের চঞ্চল তরঙ্গরূপ চামরের বায়ু, গবাক্ষ দ্বারা গৃহের ভিতরে প্রবেশ করিয়া, চোরের ন্যায় তোমার রতিশ্রমজনিত ঘর্ম্ম-বিন্দুরূপ মুক্তাভরণ হরণ করুক ॥৫১॥

अन्वयः—हंसवेशं नवनवम् एतद्यशः समुद्रान् सन्तरितुम् इतः सकलान् दिगन्तान् निःश्रमञ्च गन्तुं वेशन्त सन्तरण-दूर गम क्रमेण खलु अभ्यासम् अर्जयति ॥५२॥

एतदिति । हंसयो राजहंसघोटकविशेषयोरिव वेशः आकारो यस्य सत् अतीवशुभ्रवर्णमित्यर्थः नवनवं प्रत्यहमेव नूतननूतनं सत्, एतस्य द्युतिमतो राज्ञः यशः कर्त्तृ, समुद्रान् सन्तरितुम् इतो देशात्, सकलान् दिगन्तान्, निःश्रमम् अनायासं यथा स्यात्तथा गन्तुञ्च, वेशन्ते अल्पजलाशये यत् सन्तरणं दूरे यो गमो गमनञ्च तयोः क्रमेण क्रमिकत्वेन, खलु ध्रुवम्, अभ्यासम्, अर्जयति करोति । राजहंसो यथा समुद्रसन्तरणाय प्रथमं क्षुद्रजलाशयसन्तरणेनाभ्यासं करोति, यथा वा घोटकविशेषो दिगन्तगमनाय आदौ किञ्चित् किञ्चिद् गमनेनाभ्यासं करोति, तथैवास्य यश इति भावः ।

अत्र खलुशब्दस्य ध्रुवशब्दसमानार्थत्वादाद्या क्रियोत्प्रेक्षालङ्कारः, हंसवेशमिति लुप्तोपमा, छेकानुप्रासश्चेति च सृष्टिः । माधुर्य्यं गुणः, वैदर्भी च रीतिः ।

"हंसो विहङ्गभेदे स्यादश्वे विष्णौ नृपान्तरे ।" इत्यादि विश्वः ॥५२॥

तस्मिन् गुणैरपि भृते गणनादरिद्रै स्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे विरुध्यति निबन्धनता वहन्ति हन्त प्रयासपरुषाणि न पौरुषाणि ॥५३॥
तं निर्व्यरं नृपतिमन्यमिमामनुष्मा-दंसान्तसंगिविकासन्ततः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखा लेखानुगाविपुरुषा गिरिगोत्तमाङ्गम् ॥५४॥
एकौ कामङ्गुतगुणं श्रुतदूपपत्र (१) हित्वान्यमन्यमुपगम्य परित्यजन्तीम् (२) ।
एता जगाद जगदम्बितपादपद्मा पद्मामिवाच्युतभुजान्तरविच्युतानाम् ॥५५॥

ईशः कुशेशयवनाभिनये ! कुशेन द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ?
ज्योतिष्मता सममनेन घनीघनासु तत्त्वं विनोदय घृतोदतटीषु चेतः ॥५६॥
वातोर्म्मिदोलनचलद्दलमण्डलाय-(१) भिन्नाभ्रमण्डलगलज्जलजातसेकः ।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूड़श्चिराय तत्र तव नेत्रनिपीयमानः ॥५७॥

अन्वय —अनर्घार्चितपादपद्मा अद्भुतगुण पुतदूषणं एकैकं हित्वा अन्यम् अन्यम् उपगम्य परित्यजन्तीम् अच्युताननुजाभिरिव धृताम् तां पद्माम् इव तां जगाद ॥५५॥

एकैकमिति । अनर्घार्चितं त्रिभुवनजनपूजितं पादपद्मं यस्याः सा तथोक्ता सरस्वती, अद्भुता गुणा यस्य तम्, धुतानि वर्जितानि दूषणानि येन तम्, एकैकं राजानम्, हित्वा परित्यज्य, अन्यमन्यं राजानम्, उपगम्य प्राप्य तं तमपि परित्यजन्तीम्, अच्युतस्य नारायणस्य भुजयोरन्तरान्मध्यात् च्युतौ स्खलितौ अर्थौ कर्षौ यस्यास्ताम्, पद्मां लक्ष्मीमिव स्थिताम्, एतां दमयन्तीम्, जगाद वक्ष्यमाणमुवाच । अच्युतेत्यादिना लक्ष्मीर्यथा विष्णुमपि त्यक्त्वा नैव एव स्थिरा भाव्यतीति सूचितम् ।

अत्र पूर्णोपमालङ्कारश्च वृत्त्यनुप्रासेन संसृज्यते । प्रसादो गुणः, वैदर्भी च रीतिः ॥५५॥

বাঙ্গালা—নারায়ণের বাহুযুগলের মধ্য হইতে স্খলিতা লক্ষ্মীদেবী যেমন আশ্চর্য্যগুণ-সম্পন্ন এবং দোষবিহীন একটী একটী রাজাকে পরিত্যাগ করিয়া, অন্য অন্য রাজার নিকট যাইয়া তাঁহাদিগকেও পরিত্যাগ করেন; দময়ন্তীও তেমনই করিতেছিলেন; তখন জগৎ-পূজ্যা সরস্বতীদেবী তাঁহাকে বলিলেন ॥৫৫॥

অন্বয়ঃ—(হে) কুশেশয-সনাভি-নয়ে ! কুশেন লাঞ্ছিততনোঃ দ্বীপস্য ঈশঃ তে যদি বাঞ্ছিতঃ, তৎ ত্বং ज्योतिष्मता अनेन समं घनीघनासु घृतोदतटीषु चेतः विनोदय ॥५६॥

ईश इति । कुशेशयस्य पद्मस्य सनाभिः सदृशः नयः चाक्षिर्यस्यास्तत्सम्बोधनम् । कुशेन दर्भस्तम्बेन, लाञ्छिता चिह्निता तनुराकारो यस्य तस्य, द्वीपस्य कुशद्वीपस्येत्यर्थः, ईशः पतिः, ते तव, यदि वाञ्छितः पति-त्वेनाभीष्टः स्यात्, तत्तदा त्वम्, ज्योतिष्मता ज्योतिष्मन्नामकेन, अनेन कुशद्वीपाधिपतिना, समं सह, घनीभिः घनघनघर्नैर्घनासु निरन्तरासु, घृतोदस्य घृतसमुद्रस्य तटीषु तीरेषु, चेतो मनः, विनोदय भ्रमणादिना प्रफुल्लय ।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिरलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"सहस्रपत्रं कमलं शतपत्रं कुशेशयम्" "पक्ष्माक्षः नयः पाणि" इत्यमरः ॥५६॥

বাঙ্গালা—হে পদ্মনয়নে ! কুশদ্বীপের অধিপতি যদি তোমার অভীষ্ট হন, তবে তুমি 'জ্যোতিষ্মান্' নামক এই কুশদ্বীপাধিপতির সহিত স্তূপ স্তূপ-বন পূর্ণ ঘৃতসাগরের তীরে চিত্ত বিনোদন কর ॥৫৬॥

অন্বয়ঃ—(হে দময়ন্তি !) তত্র অম্বর-চুম্বি-চূড়ঃ বাতোর্ম্মিদোলন-চলদ্দল মণ্ডলায় ভিন্নাভ্র-মণ্ডল-গলজ্জল জাতসেকঃ কুশস্য স্তম্বঃ নেত্র-নিপীয়মানঃ (সন্) তব চিরায় ভবিতা ॥৫৭॥

वातोर्म्मीति । हे दमयन्ति । तत्र कुशद्वीपे, अम्बरचुम्बिनः आकाशस्पर्शिन्यः अतीवोच्चा इत्यर्थः चूड़ा अग्राणि यस्य सः, अतएव वातोर्म्मिणा वायुवेगेन यत् दोलनं सञ्चलनं तेन चलन्ति चञ्चलानि दलानि पत्राण्येव मण्डलाग्रा सुधारत्वसाम्यात् कृपाणास्तैः भिन्नं विदारितं यत् अभ्रमण्डलं मेघसमूहस्तस्मात् गलता पतता जलेन जातः सेकः स्नानं यस्य सः, कुशस्य स्तम्बः, नेत्राभ्यां तवैव नयनाभ्यां निपीयमानं सादरं दृश्यमानः सन्, तव चिराय विस्मयाय भविता भविष्यति । अत एतद्दर्शनमेव ते श्रेय इति भावः ।

---

(१) वातोर्म्मिदोलनचलत् ।

पाथोधिमाथसमयोत्थितसिन्धुपुत्री (१) पत्पङ्कजापि परपवित्रगिरास्तु तत्र।
पत्वा सहावह विहारमयैर्विलासैरानन्दमिन्दुमुखि! मन्दरकान्दरासु ॥५८॥
आरोहणाय तव सज्ज इवास्ति तत्र सोपानगोभिरपुरस्सरतिर्कूटाभिः।
भोगीन्द्रवेष्टनतट्टटिकाताभिरब्धि-तुङ्गाचलः कनककेतकगात्रगात्रि! ॥५९॥

[illegible] ॥५८॥

বাঙ্গালা—[illegible] সেই [illegible] একটী [illegible] তুমি [illegible], তাহার [illegible] আকাশ স্পর্শ করিয়াছে, সুতরাং [illegible] চলিতে থাকিয়া মেঘসমূহকে বিদারিত করে, তাই সেই মেঘ হইতে [illegible] হইয়া সেই [illegible] স্নান করাইয়া দেয়, এমন [illegible]।

অন্বয়—(হে) ইন্দুমুখি! তব [illegible] মন্দর-কন্দরাসু [illegible] বিহারময়ৈঃ বিলাসৈঃ আনন্দম্ [illegible] ॥৫৮॥

পাথোধীতি। হে ইন্দুমুখি! চন্দ্রবদনে! [illegible]

বাঙ্গালা—[illegible]

অন্বয়—(হে) [illegible]

[illegible]

मन्था नगः स भुजगप्रभुवेष्टघृष्टि-लेखाचलत्कनकनिर्झरवारिधारः [१] ।
त्वन्नेत्रयोः स्वभरयन्त्रितमौलिशेष-शेषाङ्गवेष्टिततनुर्भ्रममातनोतु ॥६०॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।
आस्येन च स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि ! मन्दराद्रिः ॥६१॥

বাঙ্গালা—হে পতিব্রতাধর্মে ! বাসুকিনাগের বহুতর বেষ্টনের ঘর্ষণে প্রস্তরের উপরে (উদরের ধরের-স্থায়) বহুতর ধর-ধারা রাখিয়াছে, তাহাতে যাহার আকারটী সোপান শ্রেণীর ন্যায় শোভা পাইতেছে, সমুদ্রমন্থনের মন্থনদণ্ড সেই মন্দরপর্বত যেন তোমার আরোহণের জন্য সেই কৃশতোদে প্রস্তুত হইয়া রহিয়াছে ॥৬০॥

অন্বয়:—ভুজগপ্রভু-বেষ্ট ঘৃষ্টি-লেখা-চলত্-কনক নির্ঝর বারি ধারঃ মন্থা সঃ নগঃ ত্বন্নেত্রয়োঃ স্বভর-যন্ত্রিত মৌলি শেষ শেষাঙ্গ-বেষ্টিত তনুঃ ভ্রমম্ আতনোতু ॥৬০॥

मन्था इति । भुजगप्रभोः सर्पराजस्य वासुकेः वेष्टैर्वेष्टनैर्या घृष्टिलेखा घर्षपरिलेखास्तासु चलन्ती कनकनिर्झरवारिधारा यस्य सः, मन्थानमन्थनदण्डभूतः स नगो मन्दरपर्वतः, तव नेत्रयोः, स्वस्य मन्दरस्यैव भरेण भारेण यन्त्रितानि आक्रान्तानि मौलीनि मस्तकानि यस्य स तादृशो यः शेषः अनन्तनागस्तस्य शेषाङ्गैरवशिष्टैरङ्गैः वेष्टिता तनुः शरीरं यस्य तस्य मन्दरस्यैव भ्रमं भ्रान्तिम्, आतनोतु उत्पादयतु, अनन्तनागस्य सुधवलत्वात् सर्पराज च मस्तकाक्रमणे शेषाङ्गवेष्टनमिदमचेति भावः ।

अत्र एवाव भ्रान्तिमानलङ्कारः, तादृशमन्दर प्रति च भुजगेत्यादिपदार्थस्य हेतुत्वात् काव्यलिङ्गम्, इत्यनयोरङ्गाङ्गिभावेन सङ्करः । समासबाहुल्यादोजो गुणः, गौडी च रीतिः ।

— ऐरावतः मन्दरमन्थनमन्दरो मन्दरस्कन्धदेश ॥६०॥

বাঙ্গালা—সুন্দরি ! বাসুকিনাগের বেষ্টনে মন্দরপর্বতের গাত্রে যে সকল ঘর্ষণের রেখা হইয়াছিল, সে গুলির মধ্য দিয়া স্বর্ণবর্ণ নির্ঝরের জলধারা চলিয়া থাকে; তাহাতে মন্দরপর্বতেরই আক্রমণে যাঁহার মস্তক অদৃশ্য হইয়াছে, সেই অনন্তনাগের অবশিষ্ট অঙ্গ দ্বারাই মন্দরপর্বতের শরীর বেষ্টিত হইয়াছে এই রূপ, সেই মন্থনদণ্ডভূত মন্দরপর্বত তোমার নয়নযুগলের ভ্রম উৎপাদন করুক ॥৬০॥

অন্বয়:—(হে) সুন্দরি ! সঃ মন্দরাদ্রিঃ এতেন তে স্তনযুগেন নীরধিমন্থনোত্থৌ সুরেভকুম্ভৌ, এতেন তে পাণিদ্বয়েন নীরধিমন্থনোত্থানি দিবিষদ্দ্রুমপল্লবানি, এতেন তে আস্যেন নীরধিমন্থনোত্থম্ ইন্দুম্ অপি স্বচ্ছন্দং স্মরতু ॥৬১॥

एतेनेति । हे सुन्दरि ! स मन्दराद्रिः, एतेन दृश्यमानेन, ते तव, स्तनयुगेन स्तनयुगदर्शनेनेत्यर्थः । एवमग्रेऽपि । नीरधेः समुद्रस्य मन्थनात् आलोडनात् उत्थौ उत्पन्नौ, सुरेभस्य ऐरावतस्य कुम्भौ, स्वच्छन्दं स्वाभिप्रायानुरूपम्, स्मरतु, एतत्स्तनयुगलदर्शनेन स्मरतादिति भावः । तथा एतेन ते पाणिद्वयेन, नीरधिमन्थनोत्थानि, दिविषद्द्रुमस्य कल्पवृक्षस्य पल्लवानि, स्वच्छन्दं स्मरतु । पूर्ववत् । एतेन ते आस्येन मुखेन, नीरधिमन्थनोत्थम्, इन्दुमपि चन्द्रञ्च, स्वच्छन्दं स्मरतु । तेन च मन्दरस्यानन्द महानन्दश्च कार्य इत्याशयः ।

अत्र स्तनादिदर्शनेन सुरेभकुम्भादीनां स्मृतेः 'स्मरणं' नामालङ्कारः, स्मरत्वित्येकया क्रियया सुरेभकुम्भादीनां

---

(१) " लेखाचलदुज्ज्वल " ।

वेदैर्वचोभिरखिलैः कृतकीर्त्तिरत्ने हेतुं विनैव धृतनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन् महीभुजि तयानुमतिर्न भेजे ॥६२॥
तस्मादिमां नरपतेरपनीय तन्वीं राजन्यमन्यमथ यान्यजनः [१] स निन्ये ।
स्त्रीभावधावितपदामविलम्ब्य (२) याञ्चामयीं निवर्त्य विधनादिव वित्तविस्तम् ॥

कर्त्तया उक्त्यानुप्रासो... भानवीरताडितावेन चतुर', सोऽपि च चतुर्थपादगततस्यानुप्रासेन च सम्यते। प्रहारी वृत्त, वैदर्भी च रीति ॥६१॥

বাঙ্গালা—সুন্দরি! সেই নৃপবর তোমার এই স্তনযুগল দর্শন করিয়া, সমুদ্র-মন্থনোৎপন্ন ঐরাবতহস্তীর কুম্ভদ্বয়কে, তোমার এই হস্তযুগল দর্শন করিয়া সমুদ্রমন্থনোৎপন্ন কল্পবৃক্ষের পল্লবকে এবং তোমার এই মুখমণ্ডল দর্শন করিয়া সমুদ্রমন্থনোৎপন্ন চন্দ্রকে ইচ্ছানুসারে স্মরণ করুন ।৬১।

अन्वयः—तया अखिलैः वेदैः वचोभिः कृतकीर्त्तिरत्ने हेतुं विना एव धृतनित्यपरार्थयत्ने तस्मिन् महीभुजि मीमांसया भगवति अमृतांशुमौलौ इव अनुमतिः न भेजे ॥६२॥

वेदैरिति। तया दमयन्त्या, अखिलैः सर्वैः निरुक्तादिभिश्चैव, वेदैर्वेदतुल्यवचैः वेदान्तैश्च, वचोभिः वाक्यैः, "प्राप्य विवर्द्धित तुरीय मन्यन्ते स आत्मा स विज्ञेयः" इत्यादिवाक्यैश्च, कृत प्रकाशित कीर्त्तिः रत्नमिव यस्य तस्मिन्, तथा हेतुं प्रयोजनम्, विनैव, धृत नित्य परार्थे परोपकारे यत्नो येन तस्मिन्, तस्मिन् ज्योतिष्मन् नले, महीभुजि राजनि, मीमांसया पूर्वमीमांसादर्शनेन, भगवति महामहर्षिणि, अमृतांशुमौलौ अमृतांशुमौलित्वात् विदग्धवति ईश्वरे इव, अनुमतिः अभिलाषः न स्वीकृति अस्तित्वेन स्वीकृतिश्च, न भेजे न प्राप्ता।

अत्र पूर्वोपमालङ्कारः, पूर्वार्द्धे अन्त्यानुप्रासः, चतुर्थचरणे छेकानुप्रासश्चेति च दृष्टि। प्रहारी वृत्त, वैदर्भी च रीति।

पूर्वमीमांसामते विग्रहवत ईश्वरस्यास्वीकारवदनादत्र यज्ञमतम् विग्रहवदन्तर्गमित्यादकृतम् ॥६२॥

বাঙ্গালা—সমস্ত বেদতুল্য সত্য বাক্যে (বেদবাক্যে) যাঁহার কীর্ত্তি প্রচার পাইয়াছে এবং নিজের প্রয়োজন ব্যতীতই যিনি পরোপকারের জন্য সর্ব্বদা যত্ন করিয়া থাকেন, পূর্ব-মীমাংসা যেমন সেই মহাদেবশালী ঈশ্বরকে শরীরী বলিয়া স্বীকার করেন না, দময়ন্তীও তেমন ভূপতিদের রাজাকে পতি বলিয়া স্বীকার করিলেন না ।৬২।

अन्वयः—अथ अयं अविलम्ब्य स्त्रीभावधावितपदां याञ्चामयीं विधनात् निवर्त्य वित्तविस्तम् इव ... इमां तन्वीं तस्मात् नरपतेः अपनीय अन्यं राजन्यं निन्ये ६३॥

तस्मादिति। अथ ... [illegible], अयं यान्यजनः, अविलम्ब्य विलम्बमकृत्वा [illegible] ... [illegible]

[illegible]

(१) [illegible]

देवी पवित्रितचतुर्भुजवामभागा वागालपत् पुनरिमां गरिमाभिरामाम् ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम् ॥६४॥
द्वीपस्य शाल्मल इति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनाऽयम् ।
तस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ रक्ता तिलप्रसवनासिकि ! नासि किं वा ? ॥
विप्रे धयत्युदधिमेकतमं वसत्सु यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं सार्द्धं विधेहि मधुरा मधुपानकेलीः ॥६६॥

বাঙ্গালা—যাহার পর, ব্যাধী লোক যেমন পূর্ব্বে বিবেচনা না করিয়া, নির্দ্ধনের নিকটেই নীত জীবিকা-ভিক্ষণা প্রার্থনাকে সে নির্দ্ধনের নিকট হইতে নিয়া, ধনীর নিকট উপস্থিত করে, তেমন দময়ন্তী চরণচালন দ্বারা যাইবার সঙ্কেত জানাইলে, শিবিকা-বাহকেরা সেই কুমারীকে সে রাজার নিকট হইতে নিয়া অন্য রাজার নিকট উপস্থিত করিল ॥৬৩॥

अन्वयः—पवित्रित चतुर्भुज वाम भागा वाक् देवी गरिमाभिरामाम् इमां पुनः आलपत् । अरि-निष्कृप कृपाण सनाथ-पाणेः अस्य पाणिग्रहात् गुणानां गणम् अनुगृहाण ॥६४॥

देवीति । पवित्रित स्वभावपवित्रोऽपि बाहुल्येन पवित्रीकृतः चतुर्भुजस्य नारायणस्य वामभागो यया सा, अत एवास्याः वाक्यस्य सर्वदा सत्यत्वमिति भावः, वाक् वाग्रूपा देवी सरस्वती, गरिमा कुलशीलसौन्दर्य्यादि-गौरवेण अभिरामा मनोहरा ताम्, इमां दमयन्तीम्, पुनरालपत् उक्तवती । किमालपदित्याह— अरिषु शत्रुषु निष्कृपो निर्द्दयो यः कृपाणस्तरवारिः तेन सनाथो युक्तः पाणिर्यस्य तस्य महावीरस्येत्यर्थः, अस्य शाल्मलद्वीपाधि-पतेः, पाणिग्रहात् आत्मनो गुणानां गणम्, अनुगृहाण योग्ये योजनात् दयस्व ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः । माधुर्यं गुणः, वैदर्भी च रीतिः ॥६४॥

বাঙ্গালা—যিনি নারায়ণের বাম ভাগকে আরও পবিত্র করিয়াছেন, সেই বাগ্‌দেবী কুলশীলাদিগৌরবে মনোহরা দময়ন্তীকে পুনরায় বলিলেন শত্রুগণের প্রতি নির্দ্দয়-তরবারি-ধারী এই রাজার পাণিগ্রহণ করিয়া তুমি নিজের গুণগুলির প্রতি অনুগ্রহ কর ॥৬৪॥

अन्वयः—सुराम्बुना पाथोधिना वलयितस्य शाल्मल इति प्रथितस्य द्वीपस्य नाथः अयम् (वर्त्तते) । (हे) तिलप्रसवनासिकि ! गुणाब्धौ वपुष्मति अस्मिन् किं न विस्मयसे ? किं वा रक्ता न असि ? ॥६५॥

द्वीपस्येति । सुरा मद्यमेव अम्बु जलं यस्य तेन, पाथोधिना समुद्रेण, वलयितस्य परिवेष्टितस्य, शाल्मल इति नाम्ना प्रथितस्य द्वीपस्य, नाथः अधिपतिः, अयं वर्त्तते । हे तिलप्रसवनासिकि ! तिलपुष्पतुल्यनासिके ! गुणाब्धौ गुणसागरे, वपुष्मति वपुष्मन्नामके प्रशस्तवपुःशालिनि च, अस्मिन् राजनि किं न विस्मयसे गुणैर्विस्मितासि ? किं वा न रक्ता अनुरक्तासि ? गुणसागरत्वादस्मिन् अयमपि तवोचितमिति भावः ।

अत्र नासिकि-नासिकीति यमकमलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ॥६५॥

বাঙ্গালা—সুরাসমুদ্র কর্ত্তৃক পরিবেষ্টিত শাল্মলনামে প্রথিত দ্বীপের অধিপতি ইনি। তিলপুষ্পতুল্যনাসিকে ! গুণসাগর 'বপুষ্মান্' নামক এই রাজার প্রতি কি তুমি বিস্মিতা অনুরক্তা হইতেছ না ? ॥৬৫॥

अन्वयः—विप्रे एकतमम् उदधिं धयति (सति) पञ्चसु तेषु वसत्सु (सत्सु) यः सीधुसिन्धुः न बिभाय, तस्मिन् अनेन च निजालिजनेन च सार्द्धं त्वं मधुराः मधुपानकेलीः विधेहि ॥६६॥

द्वीपे न तत्र [illegible] [illegible] सदैव [illegible] ।
तद्वीपदर्प इव [illegible] [illegible] ॥
तद्वासन [illegible] [illegible] [illegible] ।
लीलाविहारसमये चरणार्पणानि [illegible] ॥ ३८ ॥

एतद्गुणश्रवणकालविजृम्भमाण-तल्लोचनाञ्चलनिकोचनसूचितस्य।
भावस्य चक्रुरुचितं शिबिकावहास्ते तामेकतः क्षितिपतेरपरं नयन्तः॥६९॥
तां भारती पुनरभाषत नन्वमुष्मिन् काश्मीरपङ्कमिष-(१) लग्नजनानुरागे।
श्रीखण्डलेपमयदिग्जयकीर्त्तिराजि-राजद्भुजे भज महीभुजि भैमि! भावम्॥७०॥

अत्रानुप्रासः शोभातिशयश्चात्र ... इत्यलङ्कारः ... समासो गुणः, वैदर्भी च रीतिः॥६८॥

বাঙ্গালা—হে নরেন্দ্রশাবকলোচনে! সেই দ্বীপের ... বিলাস ... হইতে বায়ু ... ভাবে ... বিকম্পিত করিয়া থাকে, তাহাতে ... কোমল হইয়া যায়, তুমি তাহার উপর দিয়া যখন লীলাক্রমে ... করিবে, তখন তোমার পাদক্ষেপগুলি অনুরূপই হইবে॥৬৮॥

অন্বয়.—তে শিবিকাবহাঃ, তাম্ একতঃ ক্ষিতিপতেঃ অপরং নয়ন্তঃ (সন্তঃ) এতদ্গুণ-শ্রবণ-কাল-বিজৃম্ভমাণ-তল্লোচনাঞ্চল-নিকোচন-সূচিতস্য ভাবস্য উচিতং চক্রুঃ॥৬৯॥

एतदिति। ते शिबिकावहा यानवाहकाः, तां दमयन्तीम्, एकतः एकस्मात्, क्षितिपतेः ... अपरं क्षितिपतिम्, नयन्तः प्रापयन्तः सन्तः, एतस्य ... गुणश्रवणकाले विजृम्भमाणायाः ... कुर्वत्यास्तस्याः, लोचनाञ्चलस्य नयनप्रान्तस्य निकोचनेन सङ्कोचनेन सूचितस्य ज्ञापितस्य, भावस्य दमयन्त्या एतदभिप्रायस्य, उचितं योग्यमेव कार्य्यम् चक्रुः कृतवन्तः, तस्मात्तदानीं ... स्वाभिप्रायादिति भावः।
अत्र पूर्वार्द्धे ... अलङ्कारः। ... गुणः, गौडी च रीतिः॥६९॥

বাঙ্গালা—শাল্মলিদ্বীপাধিপতির গুণ শুনিবার সময়ে দময়ন্তী হাই তুলিলেন এবং নয়নপ্রান্তসঙ্কোচন দ্বারা নিজের অভিপ্রায় জানাইলেন; তখন সেই শিবিকাবাহকেরা তাঁহাকে সে রাজার নিকট হইতে অন্য রাজার নিকট নিয়া, তাঁহার সে অভিপ্রায়ের অনুরূপ ... ॥৬৯॥

তাং পুনঃ অভাষত-ননু ভৈমি! কাশ্মীরপঙ্ক-মিষ-লগ্ন-জনানুরাগে শ্রীখণ্ড-লেপ-... রাজদ্ভুজে অস্মিন্ মহীভুজি ভাবং ভজ॥৭০॥

भारती सरस्वती, तां दमयन्तीम्, पुनरभाषत। किमभाषतेत्याह— ननु भैमि! हे दमयन्ति! ... मिषेण छलेन ... जनानामनुरागो यस्य तस्मिन्, ... कविसमये रक्तवर्णत्वेन ख्यातत्वादिति भावः। तथा श्रीखण्डलेपमयी चन्दनानुलेपन- ... जयकीर्त्तिराजिः तया राजन्तौ शोभमानौ भुजौ यस्य तस्मिन्, अस्मिन् महीभुजि राज्ञि, भावमनुरागम् ... प्रजानुरागशालित्वात् दिग्जयकीर्त्तिशालित्वेन महावीरत्वाच्चेति भावः।
काश्मीरेत्यादौ प्रतीयमाना ... गुणोत्प्रेक्षा, श्रीखण्डेत्यादौ निरङ्गं केवलरूपकम्, ... तेषां संसृष्टिः। गुणरीती पूर्ववत्॥७०॥

বাঙ্গালা—সরস্বতী পুনরায় দময়ন্তীকে বলিলেন—'দময়ন্তি! যাঁহার বক্ষঃস্থলে কুঙ্কুমচ্ছলে প্রজাবর্গের অনুরাগই যেন লাগিয়া রহিয়াছে এবং যাঁহার বাহুযুগল শ্বেত-চন্দনরূপ দিগ্বিজয়কীর্ত্তিসমূহ দ্বারা শোভা পাইতেছে তুমি এই রাজার প্রতি অনুরাগ কর॥৭০॥

(১) ... पङ्कनिभतया ...।

द्वीपं द्विपाधिपमन्दपदे ! प्रशास्ति प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।
मेधातिथेस्त्वमुरसि स्फुर स्पष्टसौख्या साक्षादयथैव कमला यमलार्जुनारेः ॥७१॥
प्लक्षे महीयसि महीवलयातपत्रे तत्रेक्षिते खलु तथापि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोला-लीलाखिलाङ्गजनताजनितानुरागे ॥७२॥
पीत्वा तवाधरसुधां वसुधासुधांशुः न श्रद्दधातु रसमिक्षुरसोदवाराम् ।
द्वीपस्य तस्य दधतां परिवेशवेशं सोऽयं चेमतल्लतचकोरचलाचलाक्षि ! ॥७३॥

अन्वयः—(हे) द्विपाधिपति-मन्द-पदे ! अयं क्षितिप प्लक्षोपलक्षितं द्वीपं प्रशास्ति, तत् त्वम् अस्य मेधातिथेः उरसि साक्षात् स्पष्टसौख्या (सती) यमलार्जुनारेः यथैव कमला, (तथैव) स्फुर ॥७१॥

द्वीपमिति । द्विपाधिपतेरैन्द्रस्येव मन्दं मन्दगमनं पदं चरणं यस्यास्तत्सम्बोधनम् ! अयं क्षितिपो राजा, प्लक्षेण पर्कटीवृक्षेण उपलक्षितं चिह्नितम्, द्वीपम्, प्रशास्ति परिपालयति । तत्तस्मात्, त्वम्, अस्य मेधातिथेर्नाम्नो नृपस्य, उरसि वक्षसि, साक्षात् प्रत्यक्षभावेन नतु पूर्ववत् भावनामात्रेणेत्यर्थः, स्पष्टमुत्पादितं सौख्यं सुखं यया सा तादृशी सती, यमलार्जुनयोर्वृक्षयोररेः श्रीकृष्णस्य उरसि, यथैव कमला लक्ष्मीः, स्फुरति, तथैव स्फुर विराज ।

अत्र श्रौतीपमालङ्कारः छेकानुप्रासवृत्त्यनुप्रासावप्यत्र सृज्यते । वृत्तमुक्तं पूर्ववत् ॥७१॥

বাঙ্গালা—হে গজেন্দ্রগমনে ! এই রাজা প্লক্ষদ্বীপ শাসন করিয়া থাকেন, অতএব তুমি এই মেধাতিথির বক্ষঃস্থলে প্রত্যক্ষ ভাবে সুখ জন্ম হইয়া, ন রায়ণের বক্ষঃস্থলে লক্ষ্মীদেবীর ন্যায় শোভা পাইতে থাক ॥৭১॥

अन्वयः—तव महीवलयातपत्रे अधिशाख विलम्बि दोला लीलाखिलाङ्ग जनता जनितानुरागे महीयसि प्लक्षे ईक्षिते (सति) तव अपि खेलां विधातुं मतिः भवित्री खलु ॥७२॥

प्लक्ष इति । तव प्लक्षद्वीपे, महीवलयस्य भूमण्डलस्य आतपत्रे छत्रस्वरूपे, दोलाकारनिबिड़च्छायत्वादिति भावः, अधिशाखं शाखासु विलम्बिन्या लम्बमानया या दोला [illegible] लीला [illegible] अखिलानि अङ्गानि यस्याः सा तादृशी या जनता जनसमूहस्तया जनित अनुरागो येन तस्मिन्, तथा महीयसि अति-महति, प्लक्षे पर्कटीवृक्षे, ईक्षिते दृष्टे सति, तव अपि खेलां [illegible] विधातुं कर्तुं, मतिरिच्छा, भवित्री खलु भविष्यत्येव. [illegible] ...त्पत्ति [illegible] दिति भावः ।

अत्र महीवलयातपत्र इति निरङ्ग केवलरूपकम्, [illegible] ... न स्पृष्ट । [illegible] गुणः, पाञ्चाली च रीतिः ॥७२॥

বাঙ্গালা—সেই প্লক্ষদ্বীপে ভূমণ্ডলের ছত্রস্বরূপ অতিবৃহৎ পাকুড়গাছ দেখিলে, তোমারও অবশ্যই খেলা করিবার ইচ্ছা জন্মিবে । কারণ, সেই পাকুড়গাছের ডালে বড় বড় দোলা ঝুলান আছে, সেই দোলাতে অনেক লোক দুলিতে থাকায় তাহাদের অঙ্গ সকল চলিতেছে, তাহাতে তোমার অনুরাগ জন্ম হইবে ॥৭২॥

अन्वय.—(हे) चलत्क्षतचकोर चलाचलाक्षि ! [illegible] वसुधासुधांशुः [illegible] द्वीपस्य परिवेशवेशं दधतम् इक्षुरसोदवाराम् रसं न श्रद्दधातु ॥७३॥

पीत्वेति । [illegible]

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं नानार्थकोषविषयोऽस्य मृषोद्यमस्तु ॥७६॥
ब्रूमः किमस्य नलमप्यलमाशुङ्गयोः कीर्त्तिं स चैप च समादिशतः स्म कर्त्तुम् ।
स्वद्वीपसीमसरिदीश्वरपूरपार-वेलावलाक्रमणविक्रममक्रमेण ॥७७॥

जाय, भात भवतु ; पद्मादिचन्द्रा तव नेत्रयोः सौन्दर्यातिशयेन गौरवातिशयात् लघुना गौरवितस्य नीराजन-स्पर्शादिति भावः । अतएव राजमाने शोभमाने, अत्र राजनि नैषधातिथौ, अभ्रजा सचम्, अनुरज्ज अनुरक्ता भव ।

अत्रानुरागं प्रति पूर्ववाक्यार्थो हेतुरिति काव्यलिङ्गमलङ्कारो वृत्त्यनुप्रासश्चानयोः संसृष्टिः । माधुर्यं गुणः, वैदर्भी च रीतिः ।

"अच्छोदात्ते छिदि" "विपाशा तु विपाट् स्त्रियाम्" "तत्ते लवाङ्कता श्रयम्" इत्यमरः ।

अनुरज्जेति "दनुभिस्वञ्जिरञ्जीनामनि" इति रञ्जेर्नकारलोपः ॥७५॥

বাঙ্গালা—সেই প্লক্ষদ্বীপের বিপাশানামে যে নদীর স্রোত প্রখর নহে বলিয়া প্রসিদ্ধ আছে, সেই বিপাশানদীতে জাত নূতন পদ্মশ্রেণী তোমার নয়নযুগলের আরত্রিক জন্য প্রস্তুত হউক । অতএব তুমি শোভাশালী এই রাজার প্রতি সতাই অনুরক্ত হও ॥৭৫॥

অন্বয়:—এতদ্যশোভিঃ অখিলে অম্বুনি দুগ্ধীকৃতে (সতি) অত্র হংসাঃ তদুভয-ব্যতিভেদ-মুগ্ধাঃ সন্তু, (তথা) অত্র ক্ষীরে পদে পয়সি পদে অপি নানার্থকোষবিষয়ঃ দ্বয়বাচিভূয়ং মৃষোদ্যম্ অস্তু ॥৭৬॥

एतदिति । एतस्य प्लक्षद्वीपाधिपतेः यशोभिस्तव वरणेन जनितानि यानि तानि, अखिले समस्ते, अम्बुनि जले, दुग्धीकृते सति, सर्वोऽम्बुधवलत्वादिति भावः, अत्र हंसाः, तदुभयस्य जलदुग्धद्वयस्य व्यतिभेदे परस्पर-भिन्नत्वे मुग्धा मूढाः, सन्तु । तथा अत्र क्षीरे पदे पयसि पदे अपि क्षीरपयःपदयोर्विषय इत्यर्थः, नानार्थ-कोषाणां मेदिन्यादीनां विषयः प्रतिपाद्यभूतम्, द्वयवाचिभूयं क्षीरजलोभयवाचकत्वम्, मृषोद्यं मिथ्योक्तम्, अस्तु ; सर्वेषामेव जलानां क्षीरीभवनेन तदुभयस्याभावादिति भावः ।

अत्र यशोजनितशुक्लगुणेन जलानां दुग्धताप्रतीतेः तद्गुणालङ्कारः, हंसानां मुग्धत्वासम्बन्धेऽपि सम्बन्ध-कथनात्, तस्य तद्वयोद्योतनसम्बन्धेऽपि च तदसम्बन्धादतिशयोक्तिद्वयं तेषामङ्गाङ्गिभावेन सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"क्षीरं दुग्धे जले" "पयः स्यात् क्षीरनीरयोः" इति मेदिनी ।

मृषोद्यमिति "वाचि यद् च्यप् च" इति वदेः क्यप् ॥७६॥

বাঙ্গালা—ইহার যশে সমস্ত জলকে দুগ্ধ করিয়া ফেলিলে, আর হংসগণ জল ও দুগ্ধের পরস্পর ভেদ করিতে অসমর্থ হউক এবং দুগ্ধ ও জল এই উভয়ের বিষয়ে নানার্থ-কোষের প্রতিপাদ্য অর্থদ্বয়বাচকত্ব মিথ্যা হইয়া যাউক ॥৭৬॥

অন্বয়:—বয়ম্ অপি অস্য আশুগযোঃ কিম্ ব্রূমঃ, যঃ স চ এষ চ অক্রমেণ স্বদ্বীপ-সীম-সরিদীশ্বর-পূরপার-বেলা-বলাক্রমণ-বিক্রমম্ কর্ত্তুম্ কীর্ত্তিং সমাদিশতঃ স্ম ॥৭৭॥

ब्रूम इति । वयमपि अस्मिन् राजनि का कथा अन्यासामित्यपि शब्दार्थः, अशुगयोः, आशु-गयोः तुरगयोः वायुतुल्यवेगयोरित्यर्थः, अस्य नैषधातिथेः, माहात्म्यं किं ब्रूमः । तस्य किं वक्तव्यमित्यर्थः । यतः सः नलश्च, एष नैषधातिथिश्च, अक्रमेण यौगपद्येन एककालमेवेत्यर्थः, स्वद्वीपसीमा स्वद्वीपसीमवर्त्तिनः सरिदीश्वरः, समुद्रः तस्य पूरस्य प्रवाहस्य पारवेलाया परतीरसीमायाः बलेन आक्रमणं लङ्घनम् तदेव विक्रम

[illegible]

अम्भोजगर्भरुचिरा विदर्भसुभ्रूस्तं गर्भरूपमपि रूपजितत्रिलोकम्।
वैराग्यरूक्षमवलोकयति स्म भूपं दृष्टिः पुरत्रयरिपोरिव पुष्पचापम्॥७८॥
ते तां ततोऽपि चकृषुर्जगदेकदीपादंसस्थलस्थितसमानविमानदण्डाः।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां सोत्कण्ठकैरववनीमुकुलप्ररोहाः॥७९॥

कीर्त्तिं स्वस्वयशः, समादिशतः स्म आदिष्टवन्तौ। नलो यथा निजकीर्त्तिं पुष्करद्वीपे गन्तुमादिष्टवान्, अयमपि तथैव स्वकीर्त्तिं जम्बुद्वीपे गन्तुमादिष्टवानिति सरलार्थः।

अत्र माहात्म्योक्तयनायकत्वं प्रति परवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः। गुणरीती पूर्ववत् ॥७७॥

বাঙ্গালা—ইনি স্পর্দ্ধাপূর্ব্বক নলকেও বিশেষভাবে আহ্বান করিতে ইচ্ছা করেন; সুতরাং ইহার মাহাত্ম্য কি বলিব। আপন আপন দ্বীপের সীমায় যে সমুদ্র রহিয়াছে, তাহার প্রবাহের পারের তীরকে একবারেই বলপূর্ব্বক আক্রমণ করিবার উপযোগী বিক্রম প্রকাশ করিবার জন্য, ইনি ও নল দুই জনেই নিজ নিজ কীর্ত্তিকে আদেশ করিয়াছেন ॥৭৭॥

अन्वयः—अथ पुरत्रयरिपोः दृष्टिः पुष्पचापम् इव, अम्भोजगर्भ-रुचिरा विदर्भसुभ्रूः गर्भरूपं रूपजित-त्रिलोकम् अपि तं भूपं वैराग्यरूक्षम् अवलोकयति स्म ॥७८॥

अम्भोजेति। अथ तत्कृतपसरस्वतीवाक्यानन्तरम्, पुरत्रयरिपोर्महादेवस्य दृष्टिः, पुष्पचापं कामदेवमिव, अम्भोजगर्भवत् पद्मबीजकोषवत् रुचिरा विशुद्धगौरवर्णत्वेन मनोहरा, विदर्भसुभ्रूर्दमयन्ती, गर्भरूपं युवानम्, रूपेण सौन्दर्य्येण जितास्त्रयो लोका येन तं तथाभूतमपि, तं भूपं मेधातिथिम्, वैराग्येण नलआसक्तत्वाद्विरक्तभावेन रूक्षं कर्कशं यथा स्यात्तथा, अवलोकयति स्म, तस्मिन्ननुरक्ता नाभवदित्यर्थः।

अत्र श्रौतीोपमालङ्कारः, पुर-रिपोरिति वृत्त्यनुप्रासः, अन्यत्र च छेकानुप्रास इति संसृष्टिः। प्रसादो गुणः, वैदर्भी च रीतिः।

“गर्भरूपः शिशौ यूनि” इति वलः ॥७८॥

বাঙ্গালা—তাহার পর, মহাদেবের দৃষ্টি যেমন কামদেবকে দেখিয়াছিল; তেমন পদ্মের বীজকোষের ন্যায় মনোহরা দময়ন্তী, যুবক এবং রূপে ত্রিভুবনবিজয়ী হইলেও সেই মেধাতিথিকে বিরাগবশতঃ রূক্ষভাবে দেখিলেন ॥৭৮॥

अन्वयः— सोत्कण्ठ-कैरव-वनी-मुकुल-प्ररोहाः उदयिनीं चन्द्रलेखां चण्डद्युतेः इव, अंसस्थल-स्थित-समान विमानदण्डाः ते तां जगदेकदीपात् ततः अपि चकृषुः ॥७९॥

त इति। सोत्कण्ठा चन्द्रलेखार्थमेव उत्सुका या कैरववनी कुमुदकाननं तस्याः मुकुलप्ररोहाः पुष्पाङ्कुराः, कथमन्यथा चन्द्रलेखानुभवजनितसुखं स्यादिति भावः, उदयिनीम् आविर्भाववतीम् अभ्युदयवतीञ्च, चन्द्रस्य लेखां कलाम्, चण्डद्युतेः शुक्लप्रतिपदादौ सूर्य्यादिव, अंसस्थलेषु स्कन्धदेशेषु स्थिताः समानाः विमानदण्डाः शिबिकापादा येषां ते तथोक्ताः, ते शिबिकावाहकाः, तां दमयन्तीम्, जगतस्त्रयस्य एकोऽद्वितीयो दीपः प्रदीपस्वरूपस्तस्मात्, ततो मेधातिथेरपि सकाशात्, चकृषुः अन्यस्य राज्ञः समीपं निन्युः।

अत्र श्रौतीोपमा, निरङ्ग केवलरूपकम्, छेकानुप्रासश्चेति संसृष्टिः। गुणरीती पूर्ववत् ॥७९॥

বাঙ্গালা—উৎকণ্ঠিত কুমুদবনের ক্ষুদ্রক্ষুদ্র পুষ্পগুলি যেমন আবির্ভূত চন্দ্রকলাকে প্রতিপৎপ্রভৃতি তিথিতে সূর্য্যের নিকট হইতে সরাইয়া নিয়া যায়, সেইরূপ বাহকেরা

भूपेषु तेषु न मनागपि दत्तचित्ता विस्मेरया वचनदेवतया तयाथ ।
माधुर्यगुणोदयहृष्टोन्नतपाणिवीणानिक्वाणया पुनरभाणि मृगीक्षणा सा ॥८०॥

मौलिस्त्वमुदितासि स एष जम्बूद्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति ।
…आयितेन बहुना भवभीतिकम्प. कन्दर्पलोक इव खात् पतितस्तुटित्वा ॥८१॥

विष्वग्वृत: परिजनैरयमन्तरीपै: तेषामधीश इव राजति राजपुत्रि ।
हेमाद्रिणा कनकदण्डमयातपत्र: कैलासरश्मिचय-चामरचक्र-चिह्न: ॥८२॥

স্ব-বশে শিবিকার পায়াগুলি সমানভাবে ছিল, সেই শিবিকাবাহকেরা দময়ন্তীকে, জগতের একমাত্র প্রদীপস্বরূপ দেখাইয়া নিকটে হইতেও সরাইয়া নিল ।৭৯।

अन्वय:—अथ विस्मेरया वाणी-गुणोदय-हृष्टोन्नत पाणि वीणा निक्वाणया तया वचनदेवतया तेषु भूपेषु मनाक् अपि न दत्तचित्ता सा मृगेक्षणा पुन: अभाणि ।८०।

भूपेष्विति । अथ राजाकर्णनवचनानन्तरम्, विस्मेरया दमयन्त्या हृदयहृष्टतदर्शनात् विकसितया वाण्या माधुर्यगुणोदयेन माधुर्याभिव्यक्तिना हर्षोन्नतपाणिवीणाया हस्तस्थितवीणाया निक्वाणो रवो यस्या तया, तया वचनस्य वाक्यस्य देवतया सरस्वत्या, तेषु भूपेषु, मनागपि ईषदपि, न दत्तं चित्तं यया सा, सा मृगीवदना दमयन्ती, पुनरपि वक्ष्यमाणवचनमुक्ता ।
अत्र वृत्त्यनुप्रासश्छेकानुप्रासश्च वृत्ति । माधुर्यं गुण, वैदर्भी च रीति ।८०।

বাঙ্গালা—তাহার পর, সেই রাজগণের প্রতি দময়ন্তী একটু মাত্রও চিত্ত সমর্পণ করিলেন না, ইহাতে বিস্মিত হইয়া সরস্বতীদেবী পুনরায় হরিণনয়না দময়ন্তীকে বলিলেন; তখন তাঁহার বাক্যশব্দের মাধুর্য্য তাঁহারই হস্তস্থিত বীণার শব্দকে তুচ্ছ করিল ।৮০।

अन्वय:— (हे दमयन्ति ।) त्वं जम्बूद्वीपस्य मौलि: (सती) उदिता असि, त्वदर्थमिलितै: युवभि: भव-भीति-कम्प बहुना दोलायितेन खात् त्रुटित्वा पतित: कन्दर्पलोक इव स एव जम्बूद्वीप विभाति ।८१।

मौलिरिति । हे दमयन्ति । त्वं अस्य जम्बूद्वीपस्य मौलिरिव मस्तकमणिरिव रत्नभूता सती, उदिता उत्पन्ना असि; स एष जम्बूद्वीप: त्वदर्थं मिलितैरेव युवभि: पुरुषै: कारणै:, भवाद्धराद्देवात् भीत्या भयेन कम्प: कम्पनं यस्य, अथवा बहुना दोलायितेन कम्पनाजनितदोलनेन हेतुना, खात् स्वर्गात्, त्रुटित्वा स्खलित्वा पतित:, कन्दर्पलोक इव कान्तिमद्भुवनमिव, विभाति शोभते । त्वं एतन्नौ युवान कान्तिमत्त्वात् सुन्दरा इति भाव ।
अत्र जात्युत्प्रेक्षालङ्कार:, निरुक्तं उपेक्षकम्, वृत्त्यनुप्रासश्च तथैव च वृत्ति । प्रसादो गुण, वैदर्भी च रीति । "स्वलिन्दिये द्युवे सर्वे स्वर्गस्थो विराजति" इति विश्व ।८१।

বাঙ্গালা—দময়ন্তি ! তুমি যাহার মস্তকের মণিস্বরূপ হইয়া জন্মিয়াছ, এই সেই জম্বুদ্বীপ, তোমারই নিমিত্ত সমাগত যুবকগণ দ্বারা, মহাদেবের ভয়ে কম্পিত হইয়া অনেক দোলন বশতঃ স্বর্গ হইতে স্খলিত হইয়া পতিত কামলোকের ন্যায় শোভা পাইতেছে ।৮১।

अन्वय:— (हे) राजपुत्रि । अन्तरीपै: परिजनै: विष्वग् वृत: हेमाद्रिणा कनकदण्डमयातपत्र: कैलास-रश्मि-चय चामर चक्र चिह्न: अयं तेषाम् अधीश इव राजति ।८२।

विष्वगिति । हे राजपुत्रि । अन्तरीपै: द्वीपान्तरैरेव, परिजनै: सेवकै:, विष्वक् सर्वतो दिक्षु, परिवेष्टित:, हेमाद्रिणा सुमेरुपर्वतेन, कनकदण्डमयम् सुवर्णदण्डयुक्तम् आतपत्रं छत्रं यस्य स:, कैलासस्य…
…अतिशि… कैलासरश्मिचय… चामर… ।

एतत्तरुस्तरुणि ! राजति राजजम्बूः स्थूलोपलानिव फलानि विलोक्य यस्याः ।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-यूथानि केन तरुमारुरुहुः पथेति ॥८३॥
जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नापि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बु-र्जम्बूः सरिद्वहति सीमनि कम्बुकण्ठि ! ॥८४॥

पर्वतस्य रश्मिचयः किरणसमूह एव चामरचक्रं शुभ्रत्वाच्चामरसमूहस्तदेव च चिह्नं यस्य सः, अयं जम्बूद्वीपः तेषामपरेषां शाकद्वीपादीनाम्, अधीशो राजा इव, राजति शोभते ।

अत्र वाच्या वाच्यत्प्रेक्षालङ्कारः, निरङ्ग केवलरूपकमयवत्वे तेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि च वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां स सृजति । गुणरीती पूर्ववत् ॥८२॥

বাঙ্গালা—রাজকন্যে ! সিংহল প্রভৃতি-অন্যদ্বীপরূপ-পরিজনবর্গকর্তৃক পরিবেষ্টিত, সুমেরুপর্বতরূপ-স্বর্ণদণ্ডযুক্ত ছত্র-সমন্বিত এবং কৈলাসপর্বতের কিরণসমূহরূপ চামরসমূহচিহ্নে চিহ্নিত এই জম্বুদ্বীপ অন্যান্য দ্বীপের রাজার ন্যায় শোভা পাইতেছে ॥৮২॥

অন্বয়:— (হে) তরুণি ! एतत्तरुः राजजम्बूः राजति, स्थूलोपलान् इव यस्याः फलानि विलोक्य सिद्धस्त्रियः प्रियम् इदं निगदन्ति— "दन्तियूथानि केन पथा तरुम् आरुरुहुः" इति ॥८३॥

एतदिति । हे तरुणि ! युवति ! एतस्य जम्बूद्वीपस्य तरुचिह्नभूतो वृक्ष, राजजम्बूर्जम्बूवृक्षः, राजति ! स्थूलोपलान् विशालान् पाषाणानिव, यस्या राजजम्ब्वाः, फलानि विलोक्य दृष्ट्वा, सिद्धानां देवयोनिविशेषाणां स्त्रियः, प्रियं भर्तारम्, इदं निगदन्ति पृच्छन्ति । इदं किमित्याह— दन्तियूथानि हस्तिसमूहाः, केन पथा, तरुम् इमं जम्बूवृक्षम्, आरुरुहुः इति, जम्बूफलेषु कृष्णवर्णत्वविशालत्वयोः साम्येन हस्तिभ्रमादिति भावः ।

ज्वलनप्रयत्नवत् काम नैविषि किन्तु दुर्ब्बलबलाच्यवदेवेत्याह लघाविति। बुधैर्धीमद्भिः, पुरः प्रथमम्, लघौ लघावेव अल्पे अल्पे एव, परे शत्रौ, आत्मतेजसो निजप्रतापस्य उत्तेजनं वृद्धिकरणम्, विधेयं कर्त्तव्यम्। परन्तु, महति महतीति भावः। तदाहि ज्वलनत्वेनैव प्रबला भविष्यति। स्वल्पेति दृष्टान्तमाह। तपे माघे इति, ज्वलन् दहन् वह्निर्नी भवन्, क्रमात् करीषस्य शुष्कगोमयस्य द्रुमकाण्डानां वृक्षस्कन्धा—

सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्पता मयि।
गिरापि वच्यन्ति मखेषु तर्पणादिदं न देवा मुखलज्जयैव ते ॥१५२॥
व्रजन्तु तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे।
न सर्वथा तानपि न स्पृशेद्या न तेऽपि तावन्मदनस्त्वमेव वा ॥१५३॥

...मास मण्डलं समृद्धम्, तृणेढि दहति। तथाप्रबलोऽपि सर्वथ कर्त्तव्यत्वात् दुर्बलोऽपि काम. प्रथमं जेतव्य एवेति भाव.।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारस्तच्च काव्यप्रासेन च राजते। पूर्वरागो रस., माधुर्यं गुण., वैदर्भी च रीति.।

तृणेढीति "तृह हि सायाम्" इति रुधादिस्वरधातोर्वर्त्तमानायाः प्रथमपुरुषैकवचने रूपम् ॥१५१॥

বাঙ্গালা—বুদ্ধিমান্ বীরগণ প্রথমে ক্ষুদ্র ক্ষুদ্র শত্রুর উপরেই আপন প্রতাপের উত্তেজনা করিবেন। দেখুন— অগ্নিও প্রথমে তৃণ প্রজ্বলিত হইয়া, ক্রমে বন গোময় এবং গাছের গুঁড়ি দগ্ধ করিয়া থাকেন ॥১৫১॥

अन्वयः.—स्वयंवरायां मयि [या] अनुकम्पता, अयं तव कियान् वा सुरापराधः। ते देवाः मखेषु तर्पणात् मुखलज्जया एव गिरा अपि इदं न वक्ष्यन्ति ॥१५२॥

"दिशन्तु ते दक्षमणो समागता" इति [illegible] स्वयंवरायां तव [illegible] मयि, या तव अनुकम्पता दयालुता, अयं तव कियान् वा, सुरेषु इन्द्रादिषु देवेषु अपराधः, अपि तु कियानपि न [illegible]। तथा च [illegible] तान् देवान् [illegible], तेन च सर्वेऽपि [illegible] भविष्यन्ति। [illegible] सुरापराध इति न तेन [illegible] कर्त्तव्येति भाव.। अथ [illegible] — ते देवा इन्द्रादय., मखेषु, यज्ञेषु, तर्पणात् [illegible], [illegible] न वक्ष्यन्ति न [illegible]।

[illegible] पूर्वरागो रस., प्रसादो गुण., वैदर्भी च रीति ॥१५२॥

বাঙ্গালা—[illegible] ॥১৫২॥

অন্বয়—[illegible] ॥১৫৩॥

[illegible]

इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरोऽसमस्ययानया ।
पदे पदे मौनमयान्तरोपिणी प्रवर्त्तिता सारवसारसाविनी (१) ॥१५४॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किन्नु कृत्ताङ्गुलीकः ।
ज्ञात्वा मित्रं मधुमधिवनस्थानसन्तञ्चरित्वा
सख्याः प्राणान् हरति हरितस्त्वद्दयमस्त्वञ्जयन्तान् ॥१५५॥

भाव. । अथ तेषु तथा चालक्षे दिष्यन किं प्रतापमित्याह तथा तानपि देवान्, सर्वथा न स्पृशेत् न [illegible]यादिति न, अपि तु समानुनयादिना सर्वथा स्पृशेदेवेत्यर्थः । यत ते देवा मदनी निर्दंय कालोऽपि तावत् भवन्ति, ता किं वा त्वमेव निर्दयो नल एवापि न भवन्ति ।

अत्र तृतीयपादार्थं प्रति चतुर्थपादवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः । पूर्वरागो रस, प्रसादो गुण, वैदर्भी च रीति ॥१५३॥

बाङ्गाला—[illegible] [illegible]; आमि [illegible] प्रसन्न करियाइ आपनाके वरण करिब। [illegible] ना, इहा हइते पारे ना। कारण, से [illegible] नहेन, [illegible] नहेन ॥१५३॥

अन्वयः—(हे नल ।) आलेख्यगते अपि त्वयि वीक्षिते (सति) [illegible] पदे पदे मौनमयान्तरोपिणी [illegible] सार-साविनी प्रवर्त्तिता ॥१५४॥

इतीति । हे नल । आलेख्यगतेऽपि पटादौ लिखितेऽपि त्वयि, वीक्षिते दृष्टे सति, [illegible] उभयो-[illegible] यथासंख्या कदाचित् [illegible] कदाचित् [illegible], इति पूर्वोक्तप्रकारेण पदे पदे [illegible] [illegible], [illegible] [illegible] मौनमयान्तरोपिणी [illegible] सारवसारसाविनी [illegible] ।

अत्र [illegible] [illegible], [illegible] [illegible]। पूर्वरागो रस, प्रसादो गुण, वैदर्भी च रीति ।

"[illegible]" इति [illegible] ॥१५४॥

बाङ्गाला—[illegible] [illegible] ॥१५४॥

अन्वयः—[illegible] [illegible] [illegible] ॥१५५॥

(१) [illegible] ।

अथ भीमभुवेव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् ।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥१५६॥

किञ्चित् सोल्लुण्ठनमाह चण्डाल इति । यो न स्पृश्यते, चण्डालत्वात्—अनङ्गत्वे न स्पर्शनायोग्यत्वाच्चेति भावः । न वा दृश्यते, वने लुक्कायितत्वात् अनङ्गत्वाच्चेत्याशयः । एतेन तत्कन्यान्तःपुरदर्शिपुरुषैरस्य निषाध्यत्वं सूचितम् । स, विषमाः पञ्चसंख्यकत्वादयुग्माः भयङ्कराश्च विशिखाः बाणाः यस्य सः, अनङ्गः कामः, त्वयि नले, जयति सौन्दर्य्येणोत्कृष्टे सति· वीर्य्येण विजयमाने च सति, क्रुत्ता पुनर्भीषवेपथुमतिमात्रमाय तथादेशादेव क्रिया भङ्गुली दर्शितदम्भाङ्गुष्ठ यस्य स तथोक्तः, चण्डाल किम्, ख्यातः, अविचारेण नृशंसकार्य्यकारित्वादित्यभिप्रायः । कथमेतदित्याह—यतः सः, अधिवने वनमध्ये स्थानं स्थितिर्यस्य तम्, वसन्तस्य चण्डालमित्रत्व च वनस्थितेः स्वाभाविकत्वादिति भावः, मधुं वसन्तं मधुनामकञ्च, मित्रं सहायम्, कृत्वा,—अन्तर्दयाभ्यन्तरे गृहाभ्यन्तरे च, प्रविश्य गत्वा ते तव, सख्याः दमयन्त्याः, प्राणान् हरति नाशयति । बालिकायाः प्राणहरणमेव नृशंसकार्य्यमिति भावः । हरितो दिशः, तत् चण्डालकर्तृकसखीप्राणहरणजनितम्, त्वदयशस्तव मुख्यातिम्, कुपन्ता त्वयि उपेक्षमाणे सेवन्तामाश्रयन्तामिति यावत् । इदमेव सोल्लुण्ठनं वाक्यम् । "उपकृतं बहु तत्र किमुच्यते" इत्यादिवत् विपरीतलक्षणया यशो नितान्तमेवायशः इत्यर्थः । तथा च चण्डालेनानेन एव सख्याः प्राणहरणे तव महती निन्दा दिक्षु विकीर्णा भविष्यति । अतः शीघ्रमेनं मा चण्डालेन रक्षेति भावः । अत्रान्यो व्याख्यान्तराणि सुधीभिर्विवेचनीयानि ।

अत्रानङ्गे चण्डालस्य शयात् तत्समर्थनात्र श्लेषमूलोपमालङ्कारः, तं प्रति च परवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, तेषामङ्गाङ्गिभावेन सङ्करः । पूर्वरागो रसः, प्रसादो गुणः, वैदर्भी च रीतिः ।

मन्दाक्रान्ता वृत्तम्—"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ ग युग्मम्" इति लक्षणात् ॥१५५॥

বাঙ্গালা—যাহাকে স্পর্শ করা যায়না, দর্শনও করা যায় না, সেই বিষম শর কাম-দেব কি আপনি জয় করিলে পর ক্রিয়াকৃষ্ট চণ্ডাল বলিয়া বিখ্যাত হইয়াছে? সে হেতু সে বনবাসী মধুকে সহায় করিয়া, ভিতরে গমনপূর্ব্বক আপনার সখীর প্রাণ হরণ করিতেছে; এখন সমস্ত দিক্ আপনার সেই যশের সেবা করুক ॥১৫৫॥

अन्वयः—अथ सः जगतीपतिः अपत्रपया नतमौलिः (सन्) भीमभुवा एव रहः अभिहितां निजाम् अमरैः सह राजसमाजगतिम् अभ्युपगत्य ययौ ॥१५६॥

अथेति । अथ मन्त्रीवाक्यानन्तरम्, स जगतीपतिर्भूपतिर्नलः, अपत्रपया लज्जया हेतुना, [illegible] नतमौलिरवनतमस्तकः सन्, भीमभुवा दमयन्त्या इव, रहो गुप्तस्थाने, अभिहिताम् भवता दिवं सह [illegible] आगन्तव्यम् इत्येवमुक्ताम्, निजाम् स्वकीयाम्, अमरैरिन्द्रादिभिर्देवैः सह, राजसमाजगतिं [illegible] इति गमनम्, अभ्युपगत्य स्वीकृत्य, ययौ स्वयंवरसभामेव जगाम । [illegible] [illegible] [illegible] ।

अत्र [illegible] उपमालङ्कारः, प्रसादो गुणः, वैदर्भी च रीतिः ।

तोटकं वृत्तम्—"वद तोटकमब्धिसकारयुतम्" इति लक्षणात् ॥१५६॥

বাঙ্গালা—[illegible]

तदखिलमिह भूतं भूतगत्या जगत्याः
पतिरभिलपति स्म स्वात्मदूतत्वतत्त्वम्।
त्रिभुवनजनयावद्वृत्तान्तसाक्षात्-
कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥१५८॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१५९॥

—०—

अन्वयः—जगत्याः पतिः इह भूतम् अखिलं तत् स्वात्मदूतत्वतत्त्वम् भूतगत्या त्रिभुवन-जन यावद्वृत्तान्त साक्षात्-कृति-कृतिषु इन्द्रादिषु द्राक् निरस्तानन्दम् अभिलपति स्म ॥१५८॥

तदिति। जगत्याः पतिर्भूपतिर्नलः, इह दमयन्तीसमीपे, भूतं सञ्जातम्, अखिलं समस्तम्, तत्, स्वात्मनो दूतत्वस्य दौत्यस्य तत्त्वं स्वरूपम्, भूतगत्या सत्यप्रकारेण, त्रिभुवनजनानां यावन्तो वृत्ता-न्तस्तेषां वृत्तान्तास्तेषां साक्षात्कृतिषु स्वस्वमणिधानेनैव प्रत्यक्षीकरणेषु कृतिनः स्वस्वान्तर्यामित्वादेव निपुणास्तेषु। अतएव दमयन्त्या स्वयमेव प्रत्याख्यानं कृतमिति विदित्वा नलं प्रतीन्द्रादयो न रुष्टा इति भावः। इन्द्रादिषु इन्द्रादिदेवचतुष्टय-समीपे, द्राक् सत्वरम्, निरस्तो दौत्ये साकृतकार्य्यतया दूरीकृत आनन्दो यस्मिन् कर्म्मणि तद् यथा स्यात्तथा, अभिल-पति स्म उक्तवान्।

अत्र छेकानुप्रासोऽलङ्कारः। स्वात्मशब्दयोः पर्य्यायतया अर्थगतपुनरुक्तता दोषः। स च स्वीयदूतत्वतत्त्व-मिति पाठेन परिहार्य्यः। ओजो गुणः, गौडी च रीतिः।

मालिनी वृत्तम्। तल्लक्षणमुक्तम् ॥१५८॥

বাঙ্গালা—দময়ন্তীর নিকটে নিজের দৌত্যকার্য্য সকল যেরূপে হইয়াছিল, নলরাজা সমস্ত যাইয়া ইন্দ্রপ্রভৃতির নিকট সে সমস্তই যথাযথভাবে বলিলেন; ইন্দ্রপ্রভৃতিও ত্রিভুবনের সমস্ত লোকের সমস্ত বৃত্তান্ত প্রত্যক্ষ করিতে নিপুণ ছিলেন বলিয়া, নলের প্রতি তাঁহারা অসন্তুষ্ট হইলেন না ॥১৫৮॥

श्रीहर्षमिति। संदृब्धं ग्रथितं रचितमित्यर्थः अर्णवस्य समुद्रस्य वर्णनं येन तस्य तथोक्तस्य। अर्णव-वर्णनमागामी सर्गोऽस्मिन्नेव रचित इति तात्पर्य्यम्। तस्य श्रीहर्षस्य, कृताविति शेषः। व्यरंसीत् विरतः समा-प्तोऽभूत्।

नासमयं विविधकार्य्यवशात् स्वदेशे स्थित्वा नकीपुरनिती हरिदासशर्म्मा।
नाग-श्रुति विप ग्रामाङ्कमिते शकाब्दे भाद्रे चतुर्थदिवसे नवम विधिंस ॥
इति श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां नैषधचरितटीकायां
जयन्तीसमाख्यायां नवमः सर्गः समाप्तः ॥०॥

दशमः सर्गः ।

—::—

एवं स्थायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च लब्धपाराः (१)
स्वयंवरं शम्बरवैरिकाय-व्यूहप्रियः श्रीजितयज्ञराजः (२) ॥१॥

नाभूदभूमिः शरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्वादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥२॥

अन्वयः—एवं कुलजाः शस्त्रेषु शास्त्रेषु च लब्धपाराः शम्बरवैरि-काय-व्यूह-प्रियः [illegible] कुमाराः [illegible] ॥१॥

[illegible]

[illegible]

[illegible]

अन्वयः—[illegible] ॥२॥

---

१ [illegible] २ [illegible] ।

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्त्तुम्।
द्रष्टुं परैस्तान् परिकर्त्तुमन्यैः (१) स्वमावरोधाः ककुभो बभूवुः ॥३॥
लोकैरशेषैरवनेः श्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे।
स्ववर्त्ति तत्तज्जनयन्त्रणार्त्ति-विश्रान्तिमापुः ककुभां विभागाः ॥४॥

तत्र ययेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः ।
भैमीं स लब्धामिव तत्र मेने यः प्राप भूभृद्भवितुं पुरस्तात् ॥५॥
नृपः पुरस्थैः प्रतिरुद्धवर्त्मा [१] पश्चाज्जनैः [२] काञ्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥६॥

श्रियं सखीत्वरूपाम्, तां दमयन्तीम्, उद्दिश्य लक्ष्यीकृत्य, प्रयाते प्रस्थाने, विहिते कृते सति, ककुभां दिशाम्, विभागाः पूर्वादयो अंशाः, स्वेषु आत्मसु यत् निर्विशमानैः तैः सर्वैर्या जनता उद्भटता तया या भारैः पीड़ा तस्या विश्रान्तिं विश्रामम्, आपुरलेभिरे इव ।

अत्रापि विश्रान्तिमिति निरन्तर [illegible], विश्रान्तिमापुरिवेति प्रतीयमाना क्रियोत्प्रेक्षा, छेकानुप्रासश्चेति सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ॥४॥

বাঙ্গালা—দিগ্‌জাত সমস্ত লোকগুলি ভূতলের লক্ষ্মীস্বরূপা সেই দময়ন্তীকে লক্ষ্য করিয়া প্রস্থান করিলে, পূর্বপ্রভৃতি দিগ্‌বিভাগগুলি, নিজের উপরের সেই সেই লোকের ভারনিবন্ধন পীড়ার যেন বিশ্রাম লাভ করিল ।৪।

অন্বয়:—विकीर्णाः तिला यथा तत्र न ईयुः, तथा सैन्यैः राजपथाः बभूवुः । तत्र यः भूभृत् पुरस्तात् भवितुं प्राप, स भैमीं लब्धाम् इव मेने ॥५॥

तेषां गमनप्रकारं तावदाह तत्रेति । विकीर्णाः विक्षिप्ताः, तिलाः स्वनामख्यातशस्यविशेषाः, यथा तत्र भूतलम्, न ईयुर्न जग्मुः, अवकाशालाभादिति भावः । तथा सैन्यैः, राजपथाः बभूवुः सङ्कटा जाता इत्यर्थः । तत्र राजपथेषु, यो भूभृत् राजा, पुरस्तादग्रवर्त्ती भवितुं प्राप समर्थः, स भूभृत्, भैमीं दमयन्तीम्, लब्धामिव मेने ज्ञातवान्, आतिभरादिति भावः ।

अत्र च्छेकानुप्रासवृत्त्यनुप्रासयोः सङ्करः । गुणरीती पूर्ववत् ॥५॥

বাঙ্গালা—নিক্ষিপ্ত তিলও যাহাতে ভূতলে পড়িতে না পারে, এমন ভাবে সৈন্যগণ দ্বারা রাজপথগুলি সঙ্কীর্ণ হইয়াছিল। তাহাতে যে রাজা অগ্রবর্ত্তী হইতে পারিলেন, তিনিই দময়ন্তীকে যেন লাভ করিয়াছেন বলিয়া মনে করিলেন ।৫।

অন্বয়:—पुरस्थैः जनैः प्रतिरुद्धवर्त्मा कश्चन नृपः पश्चात् (वर्त्तिभिः) जनैः नुद्यमानः (सन्) यन्त्रस्थ-सिद्धार्थ-पदाभिषेकं लब्ध्वा अपि स्वम् असिद्धार्थम् अमन्यत ॥६॥

नृप इति । पुरस्थैः अग्रवर्त्तिभिर्जनैः, प्रतिरुद्ध [illegible], पश्चाद्वर्त्तिभिर्जनैः, नुद्यमानः [illegible] ॥

[illegible] गुणः, वैदर्भी च रीतिः ।

"सिद्धार्थः [illegible]" इति [illegible] ॥६॥

---

(१) [illegible], (२) [illegible] ।

राज्ञां पथि स्त्यानतयानुपूर्व्या विलङ्घनाशक्तिविलम्बभाजाम् ।
आह्वानसंज्ञानमिवाग्रकम्पै-र्ददुर्विदर्भेन्द्रपुरीपताकाः ॥७॥
प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः ।
भुवस्तले कुण्डिनगामिराज्ञां तद्वासुकेश्चाश्वतरोऽन्वगच्छत् ॥८॥

বাঙ্গালা—সম্মুখবর্ত্তী লোকেরা সম্মুখের পথ রুদ্ধ করিয়া রহিয়াছিল এবং পিছনের লোকেরা ঠেলিতেছিল; এই অবস্থায় কোন রাজা, খানিদস্থিত সর্ষপের স্থানে অবস্থান করিয়া, আপনাকে অকৃতকার্য্য মনে করিতে লাগিলেন ।৬।

अन्वयः—विदर्भेन्द्र-पुरी पताकाः अग्रकम्पैः पथि स्त्यानतया आनुपूर्व्याः विलङ्घनाशक्तिविलम्बभाजां राज्ञाम् आह्वानसंज्ञानं ददुः इव ॥७॥

राज्ञामिति । विदर्भेन्द्रस्य भीमराजस्य या पुरी कुण्डिननगरी तस्याः पताकाः, अग्रकम्पैः प्रान्तभागचालनैः, हस्तसञ्चालनैरिवेति भावः, पथि स्त्यानतया जनैः सङ्कटतया हेतुना, आनुपूर्व्याः अग्रपश्चाद्भावस्य, विलङ्घने अतिक्रमणे अशक्त्या असामर्थ्येन विलम्बं भजन्त इति तेषां राज्ञाम्, आह्वानस्य संज्ञानं सङ्केतम्, ददुरिव । अन्योऽपि विलम्बेनागच्छता हस्तकम्पनसङ्केतेनाह्वानं ददाति ।

अत्र वाच्या क्रियोत्प्रेक्षालङ्कारः । गुणरीती पूर्ववत् ॥७॥

বাঙ্গালা—রাজপথ জনসঙ্কীর্ণ হইয়াছিল; তাই অগ্রপশ্চাদ্ভাব অতিক্রম করিবার শক্তি না থাকায় অনেক রাজা বিলম্ব করিতেছিলেন; সুতরাং কুণ্ডিননগরীর পতাকাগুলি যেন স্ব স্ব প্রান্তদেশ কম্পন দ্বারা তাঁহাদের আহ্বানের সঙ্কেত করিতেছিল ।৭।

अन्वयः—भुवः तले अटकः कर्कः प्राग्भूय कुण्डिनगामि सकम्बलम् उच्चैः राज्ञां यत् नागबलम् आचकर्ष, अश्वतरः तत् अन्वगच्छत् । (पक्षान्तरे) भुवः तले कर्कोटकः प्राग्भूय कुण्डिनगामि सकम्बलम् उच्चैः वासुकेश्च यत् नागबलम् आचकर्ष; अश्वतरः तत् अन्वगच्छत् ॥८॥

प्रागिति । भुवस्तले पृथिवीतले, अटतीत्यटः शीघ्रगामी स एव अटकः, कर्कः श्वेताश्वः, प्राग्भूय अग्रवर्त्ती भूत्वा, कुण्डिनगामि, सकम्बलं कम्बलाख्यपृष्ठास्तरणसहितम्, उच्चैर्महत्, राज्ञाम्, यत् नागबलं हस्तिसैन्यम्, आचकर्ष आकृष्टवान् स्वशीघ्रगमनप्रदर्शनेन शीघ्रमेव निकटमानीतवानित्यर्थः; अश्वतरो गर्दभाद्वडवायां जातः तत् नागबलम्, अन्वगच्छत् अनुगतवान् शीघ्रमेवानुसृतवानिति तात्पर्य्यम् । राज्ञां ये तावत्सैन्यमध्ये, तत्पश्चात् हस्तिसैन्यम्, तत्पश्चाच्च भारवाही अश्वतरगणः कुण्डिनं जगामेति निष्कर्षः । पक्षान्तरे तु भुवः पृथिव्याः, तले निम्नदेशे पाताले इत्यर्थः, कर्कोटकस्तदाख्यो नागविशेषः, प्राग्भूय अग्रवर्त्ती भूत्वा, कुण्डिनगामि, सकम्बलं कम्बलनामकनागसहितम्, उच्चैर्महत्, वासुकेरनन्तनागस्य च यत् नागबलं सर्पसैन्यम्, आचकर्ष सह नीतवान्; अश्वतरस्तदाख्योऽपि नागविशेषः, तत् वासुकेश्च नागबलम्, अन्वगच्छत् अनुगतवान् । भीमराजेन स्वयंवरसभायां पातालवासिनां सर्पाणामपि निमन्त्रितत्वात् अग्रे कर्कोटकाख्यो नागः, तत्पश्चाद्वासुकेर्नागसैन्यम्, तत्पश्चाच्च अश्वतराख्यो नागः कुण्डिनपुरं ययाविति स्थूलार्थः ।

अत्र निमन्त्रणेनोभयपक्षयोरपि प्रस्तुतत्वात् द्विविषयीरेव कर्कोटक इत्येतयोरश्वतरयोश्च एकया आचकर्षेति क्रियया अन्वगच्छदिति क्रियया चान्वयात् श्लेषानुप्राणित तुल्ययोगिताद्वयम्, छेकानुप्रासश्चेति स सृष्टिः । बन्धा-र्थस्य दुरूहत्वादोजो गुणः, गौडी च रीतिः ।

"कर्कः कर्के तिमि-वह्नौ शुक्लाश्वे दर्पणे घटे" इति मेदिनी । "कर्कोटक आन्नान्नृकाद्वैद्यमहीद्धी"

आगच्छदुर्वीन्द्रचमूसमुत्थै र्भू रेणुभिः पाण्डुरिता सुखश्रीः ।
विस्पष्टमाचष्ट दिशां जनेषु (१) रूपं पतित्यागदशानुरूपम् ॥९॥
आखण्डलो दण्डधरः जलेशः पाशीति नाथैः ककुभां चतुर्भिः ।
भैम्येव बद्धा स्वगुणेन हृष्टैः ययै तदुद्वाहरमात्र शेषैः (२) ॥१०॥

इति हि. । "कम्बर [illegible] । नागभेदे [illegible]" इति हेमचन्द्र । "नागे [illegible]" इति त्रिकाण्डशेषः । "[illegible]" इति च ॥

বাঙ্গালা—ভূতলে শীঘ্রগামী শ্বেত ঘোটকগণ অগ্রবর্ত্তী হইয়া, কুণ্ডিননগরগামী, অলঙ্কৃত এবং বৃহৎ রাজগণের যে হস্তিসৈন্য আকর্ষণ করিয়াছিল; তাঁহাদের অশ্বতর-গণও তাহার অনুসরণ করিয়াছিল। আবার পাতালে কর্কোটকনাগ অগ্রগামী হইয়া, কুণ্ডিনগামী বহুনাগযুক্ত এবং অতিবৃহৎ বাসুকির যে সর্পসৈন্য আকর্ষণ করিয়াছিল, অশ্ব-তরনামক নাগ তাহার অনুসরণ করিয়াছিল ॥৮॥

अन्वयः—आगच्छदुर्वीन्द्र-चमू समुत्थैः भूरेणुभिः पाण्डुरिता दिशां सुखश्रीः जनेषु पतित्यागदशानुरूपं रूपं विस्पष्टम् आचष्ट ॥९॥

आगच्छदिति । आगच्छताम् उर्वीन्द्राणां राज्ञां चमूभ्यः सैनाभ्यः समुत्थैः समुत्थितैः भूरेणुभिः धूलिभिः, पाण्डुरिता धूसरवर्णीकृता, दिशां ककुभाम्, सुखश्रीः आननशोभा वदनशोभा च, जनेषु लोकेषु, [illegible] पतित्यागदशायाः अनुरूपं योग्यम्, रूपं मलिनाकृतिम्, विस्पष्टं सुव्यक्तं यथा तथा, आचष्ट आख्यातवत् सूचयामास । यथा पतिविरहदशायां पतिव्रतया मुखश्रीः "वियोगे मलिना [illegible]" इति [illegible] भवति ; तथा [illegible] दिशां मुखश्रीरपि [illegible] मलिना भूतेति भावः ।

अत्र [illegible] [illegible] [illegible] समासोक्ति[illegible] [illegible] । [illegible] ॥९॥

বাঙ্গালা—আগমনকারী রাজগণের সৈন্য হইতে উত্থিত ধূলিসমূহ, দিক্‌সমূহের মুখ-শ্রীকে ধূসরবর্ণ করিয়া ফেলিল ; তখন সেই মুখশ্রী পতিবিরহদশার উপযুক্ত আকৃতি জন-সাধারণের নিকট সুস্পষ্টরূপে সূচনা করিতে লাগিল ॥৯॥

अन्वयः—आखण्डलः दण्डधरः जलेशः पाशी इति चतुर्भिः ककुभां नाथैः भैम्या स्वगुणेन बद्धा इव हृष्टैः [सद्भिः] तदुद्वाहरमात्र ययै ; [किन्तु] शेषैः न ययै ॥१०॥

आखण्डल इति । आखण्डल इन्द्रः, दण्डधरो यमः, जलेशो वरुणः, पाशी [illegible], इति चतुर्भिः ककुभां दिशाम् नाथैः अधिपतिभिः, भैम्या दमयन्त्या, स्वगुणेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] परित्यक्तम्, ययै [illegible] ; किन्तु [illegible], न ययै, [illegible] ।

अत्र [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] ॥१०॥

বাঙ্গালা—ইন্দ্র, যম, অগ্নি ও বরুণ এই চারি জন দিক্‌পাল, নিজগুণ দ্বারা বদ্ধ

---

(१) ... [illegible] । [२] [illegible] ।

भैमीविवाहं सहते स्म कस्मादर्द्धं तनुर्या गिरिजात्मभर्त्तुः ।
तेनागजन्या विदधे विदर्भानीशानयानाय तयान्तरायः ॥१४॥
स्वयंवरं भीमनरेन्द्रजाया दिशः पतिर्न प्रविवेश शेषः ।
प्रयातु भारं स निविश्य कस्मिन् अहिर्महीगौरवसासहिः कः (१) ॥१५॥

अन्वयः—वामः सः कामः जातौ न प्रवणः, वित्ते न प्रवणः, गुणे [च] न प्रवणः, [किन्तु] सौन्दर्ये एव प्रवणः । (अतएव) स्वच्छः स्वर्णनिधिप-कुत्सितवेरः कुबेरः तां नितम्बिनीं प्रति न अगात् ॥१३॥

जातावित्ति । वामः अचिन्त्यस्वभावत्वात् कुटिलः, सः प्रसिद्धः, कामः कन्दर्पः युवजनाभिलाषो वा, जातौ कौलीन्ये, न प्रवणः उन्मुखो भवति केवलं कौलीन्यं वीक्ष्यैव न प्रवर्त्तत इत्यर्थः । एवमन्यत्रापि । वित्ते न प्रवणः, गुणे विद्यादौ च न प्रवणः । किन्तु केवलं सौन्दर्ये एव प्रवणो भवति सुन्दरं सुन्दरीं वा वीक्ष्यैव प्रवर्त्तत इत्यर्थः । अत एव स्वच्छः निर्मलः निर्मलत्वात् सत्यवादिनेत्यर्थः । स्वर्णेन निजधनपर्वतेन मेरुणा निधिपा इङ्गिता दृष्टा कुत्सा कुत्सितत्वं यस्य स तादृशो वेरं शरीरं यस्य स तथोक्तः, कुबेरो नाम दिक्पालः, तां नितम्बिनीं नारीश्रेष्ठां दमयन्तीम्, प्रति लक्ष्यीकृत्य, न अगात् न स्वयंवरं गतवान् । तथा च कुबेरो दिक्पतिः सुतरां कुलीनः, धनाधिपतिः, विद्यादिगुणवांश्च, तथापि कुत्सितशरीरत्वात् तत्र कुत्सितत्वं प्रति स्वदर्शने स्वस्यैव ज्ञातत्वात् दमयन्त्याः कामाभावेन तत्स्वयंवरं न गत इति भावः ।

अत्र कामस्य प्रति पूर्वार्द्धवाक्यार्थस्य स्वच्छत्वादिपदार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः, पूर्वार्द्धे अन्त्यानुप्रासः, परार्द्धे च छेकानुप्रास इत्येतेषां संसृष्टिः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"वेरं कलेवरे क्लीबं वार्त्ताकौ कुङ्कुमेऽपि च" इति मेदिनी । प्रहृष्टा स्त्रीति स्त्रियः "एकस्वरात्, विभाषा" इति पदे इत्त ॥१३॥

বাঙ্গালা—কুটিলস্বভাব কাম জাতির প্রতি, ধনের প্রতি, কিংবা গুণের প্রতি উন্মুখ নহে; কিন্তু একমাত্র সৌন্দর্য্যের প্রতিই উন্মুখ হইয়া থাকে। এই জন্যই কুবের দমযন্তীকে লক্ষ্য করিয়া গমন করেন নাই। কারণ, তাঁহার দেহের কুরূপতা, তাঁহার নিজের স্বর্ণময় নির্ম্মল কৈলাসপর্ব্বতেই দেখিয়াছে ॥১৩॥

अन्वयः—या गिरिजा आत्मभर्त्तुः अर्द्धं तनुः, (सा) कस्मात् आत्मभर्त्तुः भैमीविवाहं सहते स्म । तेन विदर्भान् अगजन्या तया ईशानयानाय अन्तरायः विदधे ॥१४॥

भैमीति । या गिरिजा पार्वती, आत्मभर्त्तुः शिवस्य, अर्द्धं तनुः अर्द्धशरीरभूता, शिवस्यार्द्धनारीश्वरत्वादिति भावः । सा गिरिजा, कस्मात् सा, आत्मभर्त्तुः भैमीविवाहं सहते स्म सोढुं शक्नोति स्म, अपि तु कस्मादपि नेत्यर्थः सापत्न्यासहिष्णुत्वादिति भावः । तेनासहनेन हेतुना, विदर्भान् अगजन्या तया गिरिजया, ईशानस्य दिक्पतेः यानाय विदर्भगमनाय, अन्तरायो विघ्नः, विदधे कृतः । एकार्द्धस्य अगमने अपरार्द्धस्य गमनासम्भवात् गिरिजया आत्मगमनेऽपि विघ्न इति भावः ।

अत्र छेकानुप्रासोऽलङ्कारः । प्रसादो गुणः, वैदर्भी च रीतिः ॥१४॥

বাঙ্গালা—যে পার্ব্বতী নিজভর্ত্তার শরীরের অর্দ্ধাংশ; তিনি যে নিজভর্ত্তার দময়ন্তীকে বিবাহ করা কি প্রকারে সহ্য করিতেন? (কোন প্রকারেই নহে)। তাই পার্ব্বতী বিদর্ভদেশে না যাইয়া, ঈশানের যাওয়ায় বিঘ্ন করিলেন ॥১৪॥

---

(१) सासहिः ।

ययौ विमृष्योर्द्ध्वदिशः पतिर्न स्वयंवरं वीक्षितधर्म्मशास्त्रः ।
व्यलोकि लोके श्रुतिषु श्रुतो वा (१) समं विवाहः क्व पितामहेन ॥१६॥
भैमीनिरस्तं स्वमवेत्य दूती-(२) मुखात् किलेन्द्रप्रमुखा दिगीशाः (३) ।
स्वदे (४) मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः ॥१७॥

अन्वयः—शेष दिश पतिं भीमनरेन्द्रजाया स्वयंवरं न प्रविवेश। सः कस्मिन् भारं निवेश्य प्रयातु, कः अहि महीगौरवभारसहिः ॥१५॥

स्वयमिति । शेषः अनन्तो नाम दिशः पतिः, भीमनरेन्द्रजाया स्वयंवरं स्वयंवरसभाम्, न प्रविवेश । कथमित्याह—स शेषः, कस्मिन् जने, भारं पृथिवीम्, निवेश्य स्थापयित्वा प्रयातु गच्छतु, अपि तु कस्मिन्नपि नेत्यर्थः। ननु पाताले बहवः सर्पाः सन्ति तेषामेकस्मिन् निवेश्य प्रयात्वित्याह—कः अहिः, सर्पान्तरम्, महीगौरवस्य पृथिवीभारस्य साऽहिः अतिशयेन सहनक्षमः, अपि तु कोऽपि नेत्यर्थः ।

अत्र प्रवेशाभावं प्रति तृतीयपादवाक्यार्थो हेतुरिति काव्यलिङ्गमलङ्कारो वृत्त्यनुप्रासेन संसृष्टः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"साऽहिचाचलिपापतिवावदयोऽपि नामभूताः संज्ञा रूढाः" इत्याख्यातवृत्तौ दुर्गः ॥१५॥

বাঙ্গালা—দিক্‌পতি অনন্ত দময়ন্তীর স্বয়ংবর সভায় গমন করিয়াছিলেন না। কারণ তিনি কাহার উপরে পৃথিবীর ভার স্থাপন করিয়া যাইবেন, কোন্ সর্প পৃথিবীর ভার সহ্য করিতে সমর্থ ছিল ? ।১৫।

অন্বয়:—বীক্ষিতধর্ম্মশাস্ত্র ঊর্দ্ধ্বদিশ পতি বিমৃশ্য স্বয়ংবরং ন যযৌ। পিতামহেন সমং (পৌত্র্যা) বিবাহ, লোকে ক্ব ব্যলোকি ? শ্রুতিষু ক্ব শ্রুত বা ? ॥১৬॥

যযাবিতি । বীক্ষিত পর্য্যালোচিত ধর্ম্মশাস্ত্র যেন স তাদৃশঃ, ঊর্দ্ধ্বদিশঃ পতির্ব্রহ্মা, বিমৃশ্য দময়ন্ত্যা বিবাহ আত্মনো ন কর্ত্তব্য ইতি বিবিচ্য, তস্যাঃ স্বয়ংবরং ন যযৌ। ননু তস্যা বিবাহঃ কথমাত্মনো ন কর্ত্তব্য ইত্যাহ—পিতামহো ব্রহ্মৈব পিতামহঃ পিতৃপিতা তেন, সমং সহ, বিবাহঃ পৌত্র্যা পরিণয়ঃ, লোকে লোকসমাজে, ক্ব কুত্র, ব্যলোকি কেন দৃষ্টঃ, অপি তু ক্বাপি নেত্যর্থঃ, তথা শ্রুতিষু বেদেষু তন্মূলকেষু স্মৃতিশাস্ত্রেষু চ, ক্ব কুত্র, কেন শ্রুতো বা, অপি তু ক্বাপি নেতি তাৎপর্য্যম্। প্রত্যুত "ন সমানগোত্রাং ন সমানপ্রবরাং ভার্য্যাং বিন্দেত মাতৃতস্ত্বাপঞ্চমাৎ পিতৃতস্ত্বাসপ্তমাৎ" ইতি বিষ্ণুপ্রভৃতিভির্নিষিদ্ধ এবাসৌ বিবাহ ইতি ভাবঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ, ব্রহ্মপিতৃপিত্রোর্ভেদেঽপি পিতামহপদশ্লেষেণ তয়োরভেদাধ্যবসায়াদতিশয়োক্তিশ্চ, অনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, ছেকানুপ্রাসেনাপি পুনরসৌ সংসৃজ্যতে। গুণরীতী পূর্ববৎ।

"পিতামহো বিরিঞ্চৌ স্যাৎ তাতস্য জনকেঽপি চ" ইতি মেদিনী ॥১৬॥

বাঙ্গালা—যিনি চিরকাল ধর্ম্মশাস্ত্র পর্য্যালোচনা করিয়াছেন, সেই ঊর্দ্ধদিকের পতি ব্রহ্মা বিশেষ বিবেচনা করিয়া দময়ন্তীর স্বয়ংবরে গিয়াছিলেন না। কারণ, পিতামহের সহিত পৌত্রীর বিবাহ লোকসমাজে কে কোথায় দেখিয়াছে ? কিম্বা বেদে বা স্মৃতিশাস্ত্রে কে কোথায় শুনিয়াছে ? ॥১৬॥

অন্বয়:—তে ইন্দ্রপ্রমুখা দিগীশা দূতীমুখাৎ স্বং ভৈমীনিরস্তং কিল অবেত্য বিলম্ব্য মান্দ্যং স্বদে মুখেন্দৌ চ বিতত্য রাজসমাজম্ ঈয়ু ॥১৭॥

---

(১) ... (২) ... (৩) ... (৪) ...

नलभ्रमेणापि भजेत भैमी कदाचिदस्मानिति शेषिताशा ।
अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥१८॥
प्रयस्यतां तद्ववितुं सुराणां दृष्टेन पृष्टेन परस्परेण ।
तद्द्वैतभिद्भिर्नवतानुमेने (१) स्वाभाविकात् छविममन्यदेव ॥१९॥

भैमीति । ते इन्द्रप्रमुखा [illegible] दिक्पालाः, स्वदूतीनां मुखात् [illegible], [illegible] दमयन्त्या [illegible], [illegible] सुचन्द्रे पु च, [illegible] ॥

[illegible] परस्परमेदेऽपि [illegible] ।

"[illegible]" [illegible] ।

[illegible] इति "[illegible]" इति [illegible] ॥१७॥

বাঙ্গালা—সেই ইন্দ্রপ্রভৃতি দিক্‌পালগণ, দূতীগণের মুখ হইতে দময়ন্তী যে তাঁহা-দিগকে প্রত্যাখ্যান করিয়াছেন, তাহা নিশ্চয়রূপে জানিয়া, [illegible] এবং মুখচন্দ্র প্রকাশিত করিয়া, [illegible] করিলেন ॥১৭॥

अन्वयः—भैमी कदाचित् नलभ्रमेण अस्मान् भजेत अपि इति शेषिताशा सा महेन्द्रादिचतुष्टयी अलीकरूपा काचित् चतुर्नली अभूत् ॥१८॥

भैमेति । भैमी दमयन्ती, कदाचित्, नलभ्रमेण [illegible] भजेत [illegible] । अपि [illegible] । इति [illegible], सा महेन्द्रादीनां दिक्पालानां चतुष्टयी, [illegible], [illegible], चतुर्नली [illegible] ॥

[illegible] ॥१८॥

বাঙ্গালা—[illegible] করিলেন, [illegible], সেই ইন্দ্রপ্রভৃতি [illegible], [illegible] চারি জন নল হইলেন ॥১৮॥

अन्वयः—तद्ववितुं [illegible] दृष्टेन परस्परेण पृष्टेन [illegible], [illegible] एव (अभवत्) ॥१९॥

[illegible] ।

---

(१) [illegible]

[illegible]

[illegible]

[illegible]

प्रियावियोगक्लथितात् किमैलात् [१] चन्द्राद्ग्रहोत्पीड़ितात्ते [२] ।
भाताद्भवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पम् ॥२२॥
नलस्य पश्यत्वियदन्तरं ते भैमीति भूपान् विधिराहताऽस्यै ।
स्पर्द्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥२३॥

नलमुखतुल्यमुखयुक्तत्वेति पुनर्द्वितीया सृष्टिः, सैव दोषः भिन्नार्थप्रतिपादनेन सन्देहापाताद्युक्त तमित्यर्थः, करोतु सृष्टिम्, अत एतदर्थम्, नाभूत्, स्वस्वमुखेषु नलमुखस्य सदार्थसम्यादिति भावः ।

अत पदश्लेषोऽलङ्कारः । द्वितीयपादे आस्यपदेन प्रक्रम्य आननपदाभिधानात् प्रकृतिविषयो भग्नप्रक्रमता-दोषः । 'स्वेन निर्माणेन नलान्यस्तात्' इति पाठेन असौ परिहार्य्यः । गुणरीती पूर्ववत् ।

"वर्हिर्मुखाः क्रतुभुजः" इत्यमरः । "वर्हिः कुशहुताशयोः" इति विश्वः ॥२१॥

বাঙ্গালা—তখন ইন্দ্রপ্রভৃতি দেবগণ নিজ নিজ মুখ দ্বারা নলমুখের শোভা লাভ করিতে পারিয়াছিলেন না, সুতরাং তাঁহাদের অননাননত্বও পুনরুক্তিদোষ স্থাপন করিতে সমর্থ হইয়াছিল না ।২১।

अन्वय —ते प्रियावियोगक्लथितात् ऐलात् ग्रहपीड़ितात् चन्द्रात् भवेन भातात् स्मरत अपि गृहीतैः सारैः किं स्वं नलानुकल्पं कल्पयन्ति स्म ॥२२॥

प्रियेति । ते इन्द्रादयो देवाः, प्रियावियोगेन उर्वशीविरहानलेन क्लथितात् शिथिलात्, ऐलात् पुरूरवसो नृपात्, ग्रहपीडितात् राहुणा विमर्द्दितात् चन्द्रात्, तथा भवेन महादेवेन, भातात् दग्धात्, स्मरतोऽपि काम-देवात्, गृहीतैः आनीतैः, सारैः श्रेष्ठभागैः करणैः किम्, स्वम् आत्मानमात्मानम्, नलस्य दमयन्तीविरहपीडित-स्येति भावः अनुकल्पं प्रतिनिधिम्, कल्पयन्ति स्म कुर्वन्ति स्म नलः खलु तदानीं दमयन्तीविरहपीडिततया उर्वशी-विरहपीडितस्य पुरूरवसः, राहुमर्द्दितस्य चन्द्रस्य, हरनयनाग्निदग्धस्य कामस्य च तुल्य आसीत् । अतस्तेभ्य, सारग्रहणमन्तरेण नलानुरूपता न स्यादिति भावः । अन्येनापि क्लथनेन निष्पीडनेन दाहेन च वस्तुनः सार आकृष्यते ।

अत्र सारत्वरूपे गुणेन सह ऐलादीनामनन्वयानुपपत्तिः, यद्वा क्रियोत्प्रेक्षा आनयोरङ्गाङ्गि-भावेन सङ्करः, सोऽपि पुनश्च वक्रानुप्रासेन च संसृज्यते । अनुकल्पमित्यनेन तथापि नलाधिक्यं व्यञ्जित इति वस्तुना वस्तुध्वनिः । प्रसादो गुणः, वैदर्भी च रीतिः ॥२२॥

বাঙ্গালা—উর্বশীর বিরহে কাতর পুরূরবা, রাহুপীড়িত চন্দ্র এবং শিবনয়নদগ্ধ কাম-দেব হইতে সার আকর্ষণ করিয়া, তদ্দ্বারাই কি ইন্দ্রপ্রভৃতি দেবগণ, নিজ নিজ নলরূপ অনুকরণ করিয়াছিলেন ? ।২২।

अन्वयः—भैमी ते नलस्य इयत् अन्तरं पश्यतु इति (विभाव्य इव) विधिः अस्यै भूपान् आहृत; दिगीशान् अपि स्पर्द्धां कारयित्वा तेभ्यः तस्य एव प्रथिमानम् अख्यत् (इव) ॥२३॥

ननु दमयन्ती नलमेव वरिष्यतीति जानन्नोऽपि राजन्यौ देवांश्च कथं स्वयंवरे समाहृतवानित्याह नलस्येति । भैमी दमयन्ती, ते भूपाः सह, नलस्य इयत् एतावत्, अन्तरं भेदम्, पश्यतु इति विचार्येति शेषः, विधिर्विधाता, अस्यै भैम्यै, भूपान् अन्यान् नृपान्, आहृत आनीतवान् । तेषामन्तरं दृष्ट्वा नलस्य उत्कर्षं ज्ञास्यतीति भावः । तथा दिगीशान् इन्द्रादीन् दिक्पालान्, स्पर्द्धाम् ...

---

(१) इत्यादि, दिगीशान् । (२) चन्द्र इ राहुग्रहपीडितात्

सभा नलश्रीयमकैर्यमाद्यै र्नलं विनाभूद्धृतदिव्यरत्नैः ।
भामाङ्गनप्राघुणिके चतुर्भि-र्देवद्रुमैर्द्यौरिव पारिजाते ॥२४॥
तत्रागमद्वासुकिरीशभूषा-भस्मोपदेहस्फुटगौरदेहः ।
फणीन्द्रवृन्द-प्रणिगद्यमान-प्रसीद-जीवाद्यनुजीविवादः ॥२५॥

कारयित्वा, तेभ्यो दिगीशेभ्य, तस्य नलस्यैव, प्रथिमानं महत्त्वम्, अस्यै भैम्यै, आख्यत् कथितवानिव । अन्यथा तेऽपि कथं नलरूपं धारयन्तीत्याशयः ।

अत्रोभयार्थगतस्य प्रतीयमानक्रियोत्प्रेक्षाद्वयस्य स सृष्टि. । गुणरीती पूर्ववत् ॥२३॥

বাঙ্গালা—অন্যান্য রাজাদের সহিত নলের এতখানি বৈষম্য রহিয়াছে ইহা দময়ন্তী প্রত্যক্ষ দর্শন করুক ইহা ভাবিয়াই যেন বিধাতা দময়ন্তীর জন্য অন্যান্য রাজাদিগকে স্বয়ংবরে আনয়ন করিয়াছিলেন; আবার দিক্‌পালগণকেও নলের রূপ ধরাইয়া, তাঁহার সহিত স্পর্দ্ধা করাইয়া, সেই দিক্‌পালগণ হইতেও নলেরই প্রাধান্য যেন দময়ন্তীকে বলিয়াছিলেন ।২৩।

अन्वयः—पारिजाते भामाङ्गनप्राघुणिके (सति) धृतदिव्यरत्नैः चतुर्भिः देवद्रुमैः द्यौः इव, धृतदिव्यरत्नैः नलश्रीयमकैः चतुर्भिः यमाद्यैः नलं विना सभा अभूत् ॥२४॥

नलात् पूर्वमिन्द्रादयः सभायां गता इत्याह सभेति । पारिजाते तदाख्ये देवद्रुमश्रेष्ठे, भामाया सत्यभामाया अङ्गनस्य चत्वरस्य प्राघुणिके अतिथौ सति, श्रीकृष्णेनानीय सत्यभामाया अङ्गने स्थापिते सतीत्यर्थः, धृतानि स्वभावत एवोत्पादनेन गृहीतानि दिव्यानि रत्नानि यैस्तादृशैः, चतुर्भिः, मन्दार-सन्तान-कल्पवृक्ष-हरिचन्दनरूपैः, देवद्रुमैः देवतरुभिः, द्यौः स्वर्गभूमिरिव, धृतानि सौन्दर्यसम्पादनाय परिहितानि दिव्यानि रत्नानि रत्नमयाभरणानि यैस्तादृशैः, नलस्य या श्रीः शोभा तस्या यमकैः द्योतकैः, चतुर्भिः यमाद्यैः यमेन्द्राग्निवरुणैः करणैः, नलं विना, सा सभा अभूत् । एकस्यैव पारिजातस्याभावे यथा चतुर्भिरपि देवतरुभिः स्वर्गभूमिः शोभिता नाभूत्, तथा एकस्यैव नलस्याभावे चतुर्भिरपि नलसदृशैर्देवैः सा सभा शोभिता नाभूदित्यर्थः ।

अत्र श्रौतोपमालङ्कारस्य छेकानुप्रासेन स सृज्यते । गुणरीती पूर्ववत् ॥२४॥

বাঙ্গালা—পারিজাত বৃক্ষ সত্যভামার উঠানে আসিলে, দিব্যরত্নধারী চারিটি দেবতরু দ্বারাও স্বর্গভূমি যেমন হইয়াছিল, দিব্যরত্নালঙ্কারশালী এবং নলমূর্ত্তিধারী যমপ্রভৃতি চারিজন দিক্‌পাল দ্বারাও, কেবল নলের অভাবে সেই সভাটী তেমন হইয়াছিল ।২৪॥

अन्वयः—ईश-भूषा-भस्मोपदेह-स्फुट गौर-देहः फणीन्द्र वृन्दप्रणिगद्यमान प्रसीद-जीवाद्यनुजीवि वादः वासुकिः अत्र आगमत् ॥२५॥

"प्राच्युय" इत्यादिना नागानां प्रस्थानमुक्तम्, इदानीं तेषां सभायामुपस्थितिमाह तत्रेति । ईशस्य महादेवस्य भूषार्थं यद्भस्म तदेव उपदेहः अङ्गरागस्तेन स्फुटः स्पष्टं गौरः श्वेतवर्णो देहो यस्य स तथोक्तः, तथा फणीन्द्राणां सर्पश्रेष्ठानां वृन्देन समूहेन प्रणिगद्यमानः उच्यमानः प्रसीद जीवादि. अनुजीविनां सेवकानां वादो वाक्यं यस्य स तादृशः, वासुकिर्नागराजः, तत्र स्वयंवरसभायाम्, आगमत् । एतेन तस्य सानुचरागमनं सूचितम् ।

अत्र छेकानुप्रासोऽलङ्कारः । समासबाहुल्यादौजो गुणः, गौडी च रीतिः ॥२५॥

বাঙ্গালা—অনন্তর বাসুকি সেই সভায় আগমন করিলেন, মহাদেবের দেহ ভূষিত করিবার জন্য যে ভস্মরূপ অঙ্গরাগ রাখিয়াছিল, তাহা দ্বারা তাঁহার দেহ সুস্পষ্ট

द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापेऽसुरभूमिभूपैः ।
तत्कालमालम्बि न केन यूना स्मरेषु पत्रानिलतूललीला ॥२६॥
रम्येषु हर्म्येषु निवेशनेन सपर्य्यया कुण्डिननाकनाथः ।
प्रियोक्तिदानादरनम्रताद्यै-रुपाचरच्चारु स राजचक्रम् ॥२७॥
चतुःसमुद्री परिखे नृपाणा- मन्तःपुरे वासितकीर्त्तिदारे ।
औदार्य्य-दाक्षिण्यदयादमानां (१) चतुष्टयी रक्षणसौविदल्ला ॥२८॥

উপস্থিত হইয়াছিল এবং প্রধান প্রধান সর্পগণ তাঁহার উদ্দেশে 'প্রসাদ' 'জীব' ইত্যাদি সেবকের ন্যায় উচ্চারণ করিয়াছিল ॥২৫॥

अन्वय—असुरभूमिभूपैः, द्वीपान्तरेभ्यः तत् पुटभेदनं क्षणात् अवापे। तत्कालं केन यूना स्मरेषु पत्रानिल तूल-लीला न अलम्बि ॥२६॥

द्वीपेति। असुरभूमीनाम् असुरराज्यानां भूपैः राजभिः, द्वीपान्तरेभ्यो यवादिभ्यः, तत् पुटभेदनं कुण्डिनं नगरम्, क्षणात् सपदि, अवापे प्राप्तम्। कथमेतदित्याह-तत्कालं तस्मिन् समये, केन यूना तरुणेन, स्मरेषूणां कामबाणानां ये पत्राः कङ्कपत्रादि तेषां यः अनिलो वेगजनितो वायुस्तेन तूलस्य लीला सञ्चलनरूपावस्था, न अलम्बि न आश्रिता, अपि तु सर्वैरेव यूना अवलम्बीत्यर्थः। वायुचालिततूलो यथा क्षणादेव स्थानान्तरं याति तथा कामचालिता असुरयुवान एव झटिति तत्रागच्छन्निति सरलार्थः।

अत्र पूर्वार्द्धं प्रति परार्द्धवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, तूलस्येव लीलेति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना चानयोरङ्गाङ्गिभावेन सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः।

"पूः स्त्री पुरीनगर्य्यौ वा पत्तनं पुटभेदनम्" इत्यमरः।

तत्कालमिति "अभिविधौ कालाध्वनोः" इति द्वितीया ॥२६॥

বাঙ্গালা—অসুররাজ্যের রাজারা অন্যান্য দ্বীপ হইতে ক্ষণকাল মধ্যেই আসিয়া সেই কুণ্ডিননগরে উপস্থিত হইলেন। কারণ, তৎকালে পৃথিবীর কোন্ যুবক, কামবাণের কঙ্কপত্রের বায়ুবশে তুলার অবস্থা না পাইয়াছিল ॥২৬॥

अन्वयः—स कुण्डिन-नाकनाथः रम्येषु हर्म्येषु निवेशनेन सपर्य्यया प्रियोक्तिदानादरनम्रताद्यैः राजचक्रं चारु उपाचरत् ॥२७॥

रम्येष्विति। स कुण्डिन-नाकनाथः, कुण्डिनेन्द्रो भीमः, रम्येषु सुन्दरेषु, हर्म्येषु अट्टालिकासु, निवेशनेन स्थापनेन, सपर्य्यया भक्त्यादिद्वारा शुश्रूषया, प्रियोक्त्या दानेन बहुमानरूपाय उपहारवितरणेन आदरेण सम्मानेन नम्रताद्यैर्विनयादिभिश्च राजचक्रं समागतनृपतिसमूहम्, चारु मनोहरं यथा स्यात्तथा, उपाचरत् सत्कृतवान्।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः। गुणरीती पूर्ववत् ॥२७॥

বাঙ্গালা—সেই কুণ্ডিননগরের রাজা ভীম, মনোহর অট্টালিকায় সংস্থাপন, ভক্তি-প্রভৃতি দ্বারা শুশ্রূষা, প্রীতিকর বাক্যপ্রয়োগ, উপহার দান, আদর ও বিনয়াদি দ্বারা উপস্থিত রাজগণের সুন্দর সৎকার করিলেন ॥২৭॥

अन्वयः—चतुःसमुद्रीपरिखे वासितकीर्त्ति-दारे नृपाणाम् अन्तःपुरे औदार्य्य-दाक्षिण्य-दया-दमानां चतुष्टयी रक्षणसौविदल्ला (भवति) ॥२८

---

(१) दान दया दक्षमतिद्वेधी।

अभ्यागतैः कुण्डिननासवस्य परीचहत्ते ष्वपि तेषु तेषु ।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वप्नेऽपि नावापि नृपैर्विशेषः ॥२९॥
अङ्के विदर्भेन्द्रपुरस्य शङ्के न सम्ममौ नैष तथा समाजः ।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥

ननु सार्वभौमोऽपि भीमः कथमधीनान् नृपतीनुपाचरदित्याह चतुरिति । चतुर्णां समुद्राणां समाहार इति चतुःसमुद्री सैव परिखा यस्य तस्मिन्, वासिता. स्थापिताः कीर्त्तिरेव दारा सिमन्तिन्यः इति यत्र तस्मिन्, यशः पुरे पृथिवीरूपे अवरोधे, औदार्यं दातृत्वम्, दाक्षिण्यं सरलता, दया कृपा, दमो जितेन्द्रियता च तेषां चतुष्टयी चतुष्टयमेव, रक्षणाय तत्कीर्त्तिदाराणां रक्षार्थं सौविदल्ला कञ्चुकिनी भवति । तथा च यथा अन्तःपुरे स्थापितायाः महिष्या रक्षणार्थं कञ्चुकिनी स्थाप्यते, तथा भूमण्डले स्थापितायाः कीर्त्तेरपि रक्षणार्थं राज्ञ औदार्यादिगुणचतुष्टयं स्थाप्यते । अत एव सार्वभौमोऽपि भीमस्तत्कीर्त्तिरक्षणार्थमेव अधीनानपि नृपतीनुपाचरदिति भावः ।

अत्रैतत्र अप्रस्तुताद्राजसामान्यात् प्रस्तुतस्य राजविशेषस्य भीमस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, समस्तवस्तुविषयं साङ्गरूपकञ्च, अनयोरङ्गाङ्गिभावेन सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ।

"सौविदल्लाः कञ्चुकिनः" इत्यमरः ॥२८॥

বাঙ্গালা—চারিটী সমুদ্রই যাহার পরিখাস্বরূপ এবং যাহার ভিতরে কীর্ত্তিরূপ মহিষীকে স্থাপন করা হইয়াছে, ভূমণ্ডলরূপ রাজাদের সেই অন্তঃপুরের মধ্যে সেই কীর্ত্তিরূপ মহিষীকে রক্ষা করিবার জন্য উদারতা, সরলতা, দয়া এবং জিতেন্দ্রিয়তা এই চারিটী গুণ স্বরূপ কঞ্চুকীকে স্থাপন করা হইয়া থাকে ॥২৮।

অন্বয়—অভ্যাগতৈঃ নৃপৈঃ কুণ্ডিননাসবস্য পরীচহত্তেষু অপি তেষু তেষু জিজ্ঞাসিতস্বেপ্সিতলাভ লিঙ্গং স্বপ্নে অপি বিশেষঃ ন অবাপি ॥২৯॥

अभ्यागतैरिति । अभ्यागतैर्नृपैः, कुण्डिननासवस्य कुण्डिनेन्द्रस्य भीमस्य परीचहत्तेष्वपि [illegible] तेषु तेषु [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]

অত্র [illegible] গুণঃ, বৈদর্ভী চ রীতিঃ ॥২৯।

বাঙ্গালা—[illegible]

[illegible]

[illegible]

[illegible]

पुरे पथिद्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभोऽपि किर्म्मीरमकारि तेषां महीभुजामाभरणप्रभाभि: ॥३१॥
विलासवैदग्ध्यविभूषणश्री-स्तेषां तथाभूत् परिचारकेऽपि ।
अशासिषु: स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कञ्चित् ॥३२॥

द्वैमातरस्य, जठरे उदरे, जगत् त्रिभुवनम्, प्रलयकाले न सम्ममौ इति न, तत्रैव एष समाज आगन्तुक-राजसमूह, विदर्भेन्द्रपुरस्य कुण्डिननगरस्य, अङ्के क्रोडे अभ्यन्तरे इत्यर्थ, न सम्ममौ नावकाशं लेभे इति न, अपि तु सम्ममावेवेति अहं मन्ये ; तस्यातिविशालत्वादिति भाव ।

अत्र मालोपमालङ्कार, उत्प्रेक्षासङ्करश्चानुप्रासश्चेति च वृत्ति । गुणरीती पूर्ववत् ॥३०॥

বাঙ্গালা—অগস্ত্যের হস্তে যেমন সমুদ্র ধরিয়াছিল এবং নারায়ণের উদরে যেমন ত্রিভুবন ধরিয়াছিল ; সেইরূপ এই রাজসমূহ কুণ্ডিননগরের ভিতরে ধরিয়াছিল ইহা আমি মনে করি ।৩০।

अन्वय:—तत्र पुरे (शिल्पिभि) उत्सव वाञ्छया एव पथि द्वार-गृहाणि चित्रीकृतानि । तेषां महीभुजाम् आभरणप्रभाभि नभ: अपि किर्म्मीरम् अकारि ॥३१॥

पुर इति । तत्र पुरे, उत्सवस्य विवाहानोदस्य वाञ्छयैव इच्छयैव, पन्थानो राजमार्गाश्च द्वाराणि च गृहाणि च तानि सर्वाण्येव, चित्रीकृतानि रङ्गादिना नानावर्णीकृतानि शिल्पिभिरिति शेष । तथा तेषां मही-भुजाम् आगतानां राज्ञाम्, आभरणप्रभाभि, नभोऽपि तदन्यदाकाशमपि, किर्म्मीरं चित्रं नानावर्णमिति यावत्, अकारि कृतम् । तदेव आश्चर्यमिति भाव ।

अत्र नभस किर्म्मीरकरणासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कार । गुणरीती पूर्ववत् ।

"चित्रं किर्म्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमर ॥३१॥

বাঙ্গালা—শিল্পিগণ উৎসবদর্শন করিবার ইচ্ছাবশতই সেই নগরের পথ, দ্বার ও গৃহ-সকল চিত্র করিয়াছিল এবং আগন্তুক রাজগণের অলঙ্কারের কিরণে সে স্থানের আকাশটা-কেও চিত্র করিয়াছিল ।৩১।

अन्वय:—तेषां परिचारके अपि तथा विलासवैदग्ध्यविभूषणश्री अभूत्, यथा स्त्रीशिशुबालिशा तम् आगतं कञ्चित् नायकम् एव अशासिषु ॥३२॥

विलासेति । तेषामागन्तुकानां राज्ञाम्, परिचारकेऽपि आस्तां का कथा भर्त्तर्यपि, तथा तादृशी, विलास घटार्थविक्षेपादिमदारवेष्टा वैदग्ध्यं सर्वविषयेषु चातुर्य्यं तस्या युक्ता विभूषणानां विशिष्टालङ्काराणां श्रीः शोभेति सा तथोक्ता, अभूत् आसीत्, यथा स्त्रिय शिशव बालिशा मूर्खलोकाश्च ते तादृशा, तं परिचारकम्, आगतं कञ्चित् नायकमेव प्रधानं राजानमेव, अशासिषुर्ज्ञातवन्त ।

अत्र परिचारके स्त्रीशिशुबालिशानां नायकत्वभ्रमाद्भ्रान्तिमानलङ्कार । गुणरीती पूर्ववत् ॥३२॥

বাঙ্গালা—আগন্তুক রাজগণের কোন কোন ভৃত্যেরও তেমনই বিলাস, চতুরতা এবং অলঙ্কারের শোভা ছিল ; যাহাতে স্ত্রীলোক, বালক এবং মূর্খলোকেরা সেই ভৃত্যকেই আগন্তুক কোন প্রধান রাজা বলিয়া মনে করিয়াছিল ।৩২।

अस्वेदगात्राश्चलचामरौघै-रमीलनेत्राः प्रतिवस्तुचित्रैः ।
अम्लानमाला विपुलातपत्रै-र्देवा नृदेवाश्च भिदां न भेजुः [१] ॥३३॥
अन्योन्यभाषानवबोधभीतेःसंस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिःसौवर्गवर्गो न जनैरचिह्नि ॥३४॥

अन्वयः—चल-चामरौघैः, अस्वेदगात्राः, प्रतिवस्तुचित्रैः अमीलनेत्राः विपुलातपत्रैः अम्लानमालाः, देवाः नृदेवाश्च भिदां न भेजुः ॥३३॥

अस्वेदेति । चलचामरौघैः, आन्दोलननिबन्धनचञ्चलचामरसमूहैरुपलक्षिताः, स्वभावत एव अस्वेदगात्राः घर्मरहिताङ्गाश्च । अन्यत्र तु चलचामरौघैः आन्दोलनवशात् चञ्चलचामरसमूहवातैः करणैः, अस्वेदगात्राः स्वेदापगमाद्घर्मशून्यगात्राः । प्रतिवस्तुषु स्फटिकमार्गभूषणादिषु सर्वेष्वेव पदार्थेषु चित्रैः दर्शननिबन्धनविस्मयैरुपलक्षिताः स्वभावत एव अमीलनेत्राः निर्निमेषनयनाश्च । अन्यत्र तु प्रतिवस्तुषु चित्रैः दर्शननिबन्धनाश्चर्य्यैः करणैः, अमीलनेत्राः निमेषशून्यनयनाः । तथा विपुलातपत्रैः विशालच्छत्रैरुपलक्षिताः, अम्लानाः दैवतरुजातत्वात् स्वभावत एवापर्य्युषिता मालाः पुष्पमाल्यानि येषां ते तादृशाश्च । अन्यत्र तु विपुलातपत्रैः विशालच्छत्रावरणैर्हेतुभिः, अम्लानाः आतपतापदशेऽपि अविकृता मालाः साधारणपुष्पमाल्यानि येषां ते तथोक्ताश्च । देवाः इन्द्रादयो देवताः, नृदेवाः नरेन्द्राः आगताः राजानश्च, भिदां भेदं वैपम्यमिति यावत्, न भेजुः न प्रापुः, अपि तु पूर्वोक्तधर्मसमूहैः साम्यात् अभेदमेव भेजुरित्यर्थः ।

अत एवात्र देवनृदेवगणयोर्भेदेऽप्यभेदाध्यवसायादतिशयोक्तिरलङ्कारः, अभेदभजनं प्रति अस्वेदगात्रादिपदार्थानां हेतुत्वात् काव्यलिङ्गञ्च ; अनयोरङ्गाङ्गिभावेन सङ्करः । प्रसादो गुणः, वैदर्भी च रीतिः ॥३३॥

বাঙ্গালা—স্বভাবতই দেবগণের গাত্রে ঘর্ম্ম হয় না, নয়নে নিমেষ থাকে না এবং দেবতরুজাত পুষ্পের মালা ম্লান হয় না; আবার তাঁহাদের উভয়পার্শ্বে চামর আন্দোলিত হইতেছিল, মস্তকে বিশাল ছত্র ধারণ করিয়াছিল এবং তাঁহারা প্রত্যেক বস্তু দর্শন করিয়াই বিস্ময়াপন্ন হইতেছিলেন। এ দিকে রাজাদেরও উভয়পার্শ্বে চামর আন্দোলিত হইতে থাকায় গাত্রে ঘর্ম্ম জন্মিয়াছিল না, প্রত্যেক বস্তুর বৈচিত্র্যদর্শনে নয়নে নিমেষ ছিল না এবং মস্তকের উপরে বৃহৎ ছত্র ধারণ করায় ফুলের মালাগুলি ম্লান হইয়াছিল না। অতএব তখন দেবগণও রাজগণ পরস্পর ভেদ অবলম্বন করিয়াছিলেন না।৩৩।

अन्वयः—जनैः दिग्भ्यः समेतेषु अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिः वाग्भिः व्यवहारवत्सु नरेषु सौवर्गवर्गः न अचिह्नि ॥३४॥

भाषायामपि राजभिः सह देवानां भेदो नासीदित्याह अन्योन्येति । जनैः कुण्डिनपुरवासिभिर्लोकैः, दिग्भ्यो नानादूरदेशेभ्य इत्यर्थः, समेतेषु समागतेषु, अन्योन्यभाषायाः परस्परवाक्यस्य अनवबोधे परस्परवैषम्यात् अर्थज्ञानाभावविषयी या भीतिर्भयं तस्याः हेतोः, संस्कारेण निर्वृत्ताः संस्कृत्रिमाः संस्कृताख्याभिः सर्वदेशसाधारणीभिरिति भावः, वाग्भिर्भाषाभिः, व्यवहारवत्सु व्यवहारं कुर्वत्सु, नरेषु राजादिमानुषेषु मध्ये, सौवर्गाणां स्वर्गीयाणामिन्द्रादीनां नित्यसंस्कृतभाषाभाषिणामित्याशयः देवानां वर्गः समूहः, न अचिह्नि न पृथक्तया लक्षितः, आकारवेशभूषादीनां समानत्वात् तदानीमुक्तहेतोः सर्वेषामेव संस्कृतभाषाव्यवहारेण भाषाया अपि च समानत्वादिति भावः ।

(१) न स्वेदिनश्चामरमारुतैर्न निमेषनेत्राः प्रतिवस्तुचित्रैः । म्लानस्रजो नातपवारणैर्न देवा नृदेवा

ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि।
निरीक्ष्य निन्युर्दिवसं निशाश्च तत्स्वप्नसम्भोगकलाविलासैः ॥३५॥
सा विभ्रमं स्वप्नगतापि तस्या निशि खलाभस्य ददे यदेभ्यः।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ॥३६॥

अतएवात्र मीलितं नामालङ्कारः "मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणा" इति दर्पणलक्षणात्। [illegible] पूर्ववत्।

[illegible] इति [illegible] "[illegible]" [illegible] ॥३४॥

বাঙ্গালা—নানাদেশ হইতে আগত মনুষ্যগণ, পরস্পর পরস্পরের ভাষা বুঝিতে পারিবে না এই ভয়ে, তাহারা সংস্কৃতভাষা দ্বারা পরস্পর আলাপ করিতেছিল, সুতরাং তাহাদের মধ্যে নিত্য সংস্কৃতভাষী দেবতাদিগকে কুণ্ডিনবাসী লোকেরা পৃথক্‌ভাবে লক্ষ্য করিতে পারিল না ॥৩৪॥

अन्वयः—तत्र पुरि ते पौरैः चित्रे लेखितानि चित्राणि भैम्याः चरितानि निरीक्ष्य दिवसं निन्युः तत्स्वप्नसम्भोगकलाविलासैः निशाश्च निन्युः ॥३५॥

त इति। तत्र पुरि कुण्डिननगर्याम् ते इन्द्रादयो देवा आगता राजानश्च, पौरैः पुरवासिभिश्चित्रकरैः, चित्रे आलेख्यपटे, लेखितानि लिखितानि, चित्राणि आश्चर्याणि, भैम्याः दमयन्त्याः, चरितानि [illegible] निरीक्ष्य दृष्ट्वा [illegible], दिवसं निन्युः अतिवाहयामासुः, तथा तस्याः भैम्याः स्वप्ने [illegible] सम्भोग [illegible] कलावि-[illegible], निशाः रात्रीश्च निन्युः।

अत्र [illegible] ॥३५॥

বাঙ্গালা—কুণ্ডিনপুরের চিত্রকরগণ চিত্রপটে আশ্চর্য্য আশ্চর্য্য দময়ন্তীর চরিত্র চিত্র করিয়া রাখিয়াছিল, দেবগণ ও রাজগণ তাহা দেখিয়া দেখিয়া দিন অতিবাহিত করিলেন, আর স্বপ্নে তাঁহার সম্ভোগকালীন চুম্বনপ্রভৃতি দ্বারা রাত্রি অতিবাহিত করিলেন ॥৩৫॥

अन्वयः—सती अपि सा तस्याः निशि स्वप्नगता सती यत् एभ्यः खलाभस्य विभ्रमं ददे, तत् वदान्या अर्थिनां भूमिभुजां कामं पूरयति स्म ॥३६॥

[illegible] सती [illegible], सा दमयन्ती, तस्याः निशि [illegible] स्वप्नगता [illegible] भूमिभुजां [illegible], यत् एभ्यो भूमिभुग्भ्यः, खलाभस्य [illegible] विभ्रमं [illegible], ददे दत्तवती, तत् वदान्या [illegible], अर्थिनां [illegible], भूमिभुजां [illegible], कामं [illegible], पूरयति स्म; [illegible] इति भावः।

अत्र [illegible] कामं पूरयतीति विरोधः, [illegible]। [illegible] गुणः, वैदर्भी च रीतिः।

वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः [१]।
स्वयंवरस्थानजनाश्रयस्तै-र्दिने परत्रालमकारि वीरैः ॥३७॥
भूषाभिरुच्चैरपि संस्कृतं यं वीक्ष्याकृत प्राकृतबुद्धिमेव।
प्रसूनबाणं विबुधाधिनाथ-स्तेनाथ साशोभि सभा नलेन ॥३८॥
धृताङ्गरागे कलितद्युशोभां तस्मिन् सभां चुम्बति राजचन्द्रे।
गता बताक्ष्णोर्विषयं विलङ्घ्य [२] क्व चन्दनचन्द्रकुलस्य कान्तिः ॥३९॥

भूमिं भुञ्जन्ति वर्षणादिना पालयन्तीति भूमिभुजो देवाः। भूमिं भुञ्जते करग्रहणादिना उपभुञ्जत इति भूमिभुजो राजानश्च ॥३६॥

বাঙ্গালা—দময়ন্তী পতিব্রতা হইয়াও, সেই রাত্রিতে স্বপ্নে উপস্থিত হইয়া, দেবগণ ও রাজগণকে যে নিজলাভের বিভ্রম দান করিয়াছিলেন; তাহাই সেই মানশীলা দময়ন্তী, প্রার্থী দেবগণের এবং রাজগণের কামপূরণ করিয়াছিলেন ॥৩৬॥

অন্বয়:—परत्र दिने वैदर्भ-दूतानुनयोपहूतैः शृङ्गारभङ्गीः अनुभावयद्भिः तैः वीरैः स्वयंवरस्थान-जनाश्रयः अलम् अकारि ॥३७॥

वैदर्भेति। परत्र परस्मिन् दिने, वैदर्भस्य विदर्भराजस्य भीमस्य दूतैः अनुनयेन उपहूतैः आहूतैः, शृङ्गारस्य भङ्गीर्वेशभूषादिचेष्टा, अनुभावयद्भिर्लोकान् ज्ञापयद्भिः, तैर्वीरै राजभिः, स्वयंवरस्थानस्य जनाश्रयो मण्डपः, अलमकारि स्वस्वाधिष्ठानेन अलङ्कृतः।

अत्र शृङ्गारभङ्गीरिति च्छेकानुप्रासोऽलङ्कारः। गुणरीती पूर्ववत्।

"मण्डपोऽस्त्री जनाश्रयः" इत्यमरः ॥३७॥

বাঙ্গালা—পরদিন বিদর্ভরাজের দূতগণ যাইয়া অনুনয়সহকারে আহ্বান করিল; তাহার পর সেই বীরগণ শৃঙ্গারোচিত বেশভূষা প্রকাশ করতঃ, স্বয়ংবরস্থানের মণ্ডপখানিকে আসিয়া অলঙ্কৃত করিলেন ॥৩৭॥

অন্বয়:—अथ विबुधाधिनाथः यं वीक्ष्य भूषाभिः उच्चैः संस्कृतं अपि प्रसूनबाणं प्राकृतबुद्धिम् एव अकरोत्, तेन नलेन सा सभा अशोभि ॥३८॥

भूषाभिरिति। अथ अनन्तरम्, विबुधाधिनाथो देवराजः पण्डितश्रेष्ठश्च, यं नलम्, वीक्ष्य दृष्ट्वा, भूषाभिर्नानाविधैरलङ्कारैः, उच्चैः सातिशयम्, संस्कृतेऽपि अलङ्कृतेऽपि। संस्कृते संस्कृतभाषायाञ्च। प्रसूनबाणं कामदेवं, प्राकृतबुद्धिमेव कुत्सितत्वज्ञानात् निकृष्टजनज्ञानमेव। प्राकृतभाषाज्ञानमेव च। अकृत कृतवान्; तेन नलेन, सा सभा अशोभि शोभाविशिष्टेन शोभिता।

अत्र विबुधाधिनाथस्य प्राकृतबुद्धिकरणासम्बन्धेऽपि तत्सम्बन्धादतिशयोक्तिरलङ्कारः, कामदेवापेक्षया नलस्या-धिकसौन्दर्यप्रतिपादनाद्व्यतिरेकः, पण्डितश्रेष्ठोऽपि संस्कृतभाषायां प्राकृतभाषाबुद्धिमकरोदिति विरोधाभासश्च, ... च, इत्येतेषाम् ... सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः।

"प्राकृतः पृथग्जनः" इत्यमरः ॥३८॥

বাঙ্গালা—তাহার পর, দেবরাজ যে নলকে দেখিয়া, নানাবিধ অলঙ্কারে অলঙ্কৃত কামদেবের উপরেও নিকৃষ্টবুদ্ধি করিয়াছিলেন, সেই নল যাইয়া সেই সভাটিকে অলঙ্কৃত করিলেন ॥৩৮॥

---

(१) शृङ्गारभङ्गीरनुभावयद्भिः। (२) ... विलङ्घ्य।

द्राग् दृष्टयः क्षौणिभुजामसुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दृगन्ताः (१) ॥४०॥
सुधांशुरेष प्रथमो भुवीति स्मरो द्वितीयः किमसावितीमम् ।
दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो निनिन्दुः ॥४१॥

अन्वयः—धृताङ्गरागे तस्मिन् राजचन्द्रे कलितद्युशोभां सभां चुम्बति (सति), अथ-मघव-कुलस्य कान्तिः अपरा विषयं विहाय क्व गता ॥३९॥

धृतेति । धृतः अङ्गरागः कुङ्कुमचन्दनाद्यनुलेपनम्, उदयकालीनारुणलौहित्यञ्च येन तस्मिन्, तस्मिन् नलचन्द्रे, राजा चन्द्र इव तस्मिन्, कलिता विधृतत्वाद् गृहीता दिव आकाशस्य शोभा यया ताम्, सभाम्, चुम्बति स्पृशति सति, मघादि अपरे राजानो नक्षत्राणीव तेषां कुलस्य समूहस्य, कान्तिः शोभा दीप्तिश्च, अपरा अन्या, विषयं निरीक्षणविषयम्, हा कस्मिन्, गता, तत्र जाने इति शेषः । यथा च उदयकालीनारुणवर्णे चन्द्रे आकाशं प्राप्ते सति यथा नक्षत्रकान्तिर्विलुप्यते, तथा धृताङ्गरागे नले सभां प्राप्ते सति भैम्या तस्यैव वरणसम्भावनया विषादेनान्येषां राज्ञां कान्तिर्विलुप्तेति भावः । अत्र श्लेषः ।

अत्र लिङ्ग एव लुप्तोपमा, श्लेषादुपमाश्चेति च सहितिः । गुणरीती पूर्ववत् ॥३९॥

বাঙ্গালা—চন্দ্রের ন্যায় কান্তিশালী রাজা নল, অঙ্গরাগ ধারণ করিয়া, আকাশের ন্যায় শোভাসম্পন্ন সেই সভায় প্রবেশ করিলে, নক্ষত্রগণের ন্যায় ক্ষত্রিয়গণের শোভা, দৃষ্টির বিষয় অতিক্রম করিয়া, হায়! কোথায় চলিয়া গিয়াছিল ॥৩৯॥

अन्वयः—क्षौणिभुजां दृष्टयः आश्चर्य-पर्युत्सुकिताः (सत्यः) असुष्मिन् द्राक् निपेतुः, अनन्तरं तु दन्तुरितभ्रुवां क्षौणिभुजां नितान्तम् ईर्ष्याकलुषाः दृगन्ताः असुष्मिन् निपेतुः ॥४०॥

द्रागिति । क्षौणिभुजां राज्ञां दृष्टयो नयनानि, प्रथमम् आश्चर्येण अलौकिकरूपदर्शनजनितविस्मयेन पर्युत्सुकिताः उत्कण्ठिताः सत्यः, असुष्मिन् नले, द्राक् द्रुतम्, निपेतुः पतितवत्यः । अनन्तरन्तु किञ्चित्कालं परन्तु दन्तुरिते ज्ञीवादिभ्रमैः उच्चनीचीकृते भ्रुवौ येषां तेषां क्षौणिभुजाम्, नितान्तम् अत्यन्तम्, ईर्ष्यया अन्यमेनं वरिष्यतीति सम्भावनाजनितया कलुषाः आविलाः, दृगन्ताः नयनप्रान्तदेशाः, असुष्मिन् नले, निपेतुः ।

अत्र निपेतुरित्येकया क्रियया दृष्टिदृगन्तयोः कर्तृत्वान्वयात् तुल्ययोगितालङ्कारः, भौमस्वीयानामीदृशाक्षेपः, छेकानुप्रासश्चेति च सहितिः । माधुर्यं गुणः, वैदर्भी च रीतिः ॥४०॥

বাঙ্গালা—প্রথমে রাজাদের দৃষ্টি, বিস্ময়ে উৎকণ্ঠিত হইয়া দ্রুত নলের উপরে পড়িল; তাহার পর তাঁহারা ভ্রূকুটী করিয়া উঠিলেন এবং তাঁহাদের দৃষ্টি অত্যন্ত ঈর্ষ্যায় কলুষিত হইয়া নলের উপরে পড়িল ॥৪০॥

अन्वयः—एषः किं भुवि प्रथमः सुधांशुः इति, असौ किं भुवि द्वितीयः स्मरः इति, अयं किं भुवि तृतीयः दस्रः इति (च) क्षितीशाः मत्सरिणः स्तुतिच्छलात् इमं निनिन्दुः ॥४१॥

सुधांशुरिति । एष दृश्यमानः पुरुषः, किं भुवि मर्त्यलोके, प्रथमः, चन्द्रस्यैकत्वात् द्वितीयाभावात् प्रथमत्वम्, सुधांशुः चन्द्रः, इति एवमुक्तवन्तः । अत्र नले सुधांशुत्वारोपणात् कलङ्कित्वं क्षयित्वं च निन्दितमिति भावः । एवमग्रेऽप्यूह्यम् । असौ किं भुवि द्वितीयः प्रथमस्य स्मरस्य एव ह्यनेनाभि-

---

(१) · दृगन्ताः ।

आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवासौ रतिवल्लभस्य।
नासत्ययोर्मूर्त्तिरियं तृतीया इति स्तुतस्तैः किल मत्सरैः सः (१) ॥४२॥

इहेदृशाः सन्ति कतीति दुष्टैर्दृष्टान्तितालीकनलावलीतैः (२)।
आत्मापकर्षे किल मत्सराणां द्विषः परस्पर्द्धनया समाधिः ॥४३॥

द्वि॰, स्मर कामदेव, इति। तथा अयं किं भुवि तृतीयः, प्रथमद्वितीययोः स्वर्ग एवावस्थानादिति भावः, दस्र अश्विनीकुमार, इति च, मत्सरिणो नलसौन्दर्य्यद्वेषिणः, क्षितीशाः केचित् राजानः, स्तुतिच्छलात् प्रशंसाव्याजात्, इमं नलम्, निनिन्दुः, मत्सरित्वादिति तात्पर्य्यम्।

अत्र स्तुतिच्छलेन निन्दाप्रतीतेर्व्याजस्तुतिः। भुवि प्रथमद्वितीयतृतीयपदैरेव सुधांश्वादीनामलीकत्वप्रतिपादनात् सन्देहः, किन्तु नले सुधांशुप्रभृतीनामभेदाध्यवसायात्तिस्र एवातिशयोक्तयश्च, इत्येतेषामङ्गाङ्गिभावेन सङ्करः। प्रसादो गुणः, वैदर्भी च रीतिः ॥४१॥

বাঙ্গালা—'ইনি কি পৃথিবীতে প্রথম চন্দ্র?' 'উনি কি ভূমণ্ডলে দ্বিতীয় কামদেব?' 'ইনি কি মর্ত্ত্যমণ্ডলে তৃতীয় অশ্বিনীকুমার?' এই ভাবে বিদ্বেষী রাজারা প্রশংসার ছলে নলের নিন্দা করিতে লাগিলেন ॥৪১॥

अन्वयः—सः एषः भूमौ विधोः आद्यं जन्म, असौ युवा रतिवल्लभस्य द्वैतम्, इयं तृतीया नासत्ययोः मूर्त्तिः, इति तैः मत्सरैः सः किल स्तुतः ॥४२॥

[illegible] राजानः नलमेवार्थं भिन्नप्रकारेणाह। तदेवानुवदति आद्यमिति। स एष युवा भूमौ, विधोश्चन्द्रस्य, आद्यं प्रथमं जन्म [illegible] भावः। असौ युवा, रतिवल्लभस्य कामदेवस्य, द्वैतं [illegible]। तथा इयं तृतीया नासत्ययोरश्विनीकुमारयोर्मूर्त्तिः तृतीय [illegible]। इति एवम् [illegible], तैः मत्सरैः पूर्वश्लोकोक्तैः [illegible] राजभिः, मत्सरैः [illegible], सः नलः, स्तुतः [illegible]। [illegible]।

[illegible] पूर्ववदिति सङ्करः। [illegible] पूर्ववत्।

"[illegible] किल" इति [illegible]।

[illegible] ॥४२॥

বাঙ্গালা—'এই সেই [illegible] চন্দ্র, ঐ যুবকটী কামদেবের দ্বিতীয় [illegible] তৃতীয় [illegible]' এই ভাবে সেই রাজারা বিদ্বেষবশতঃ [illegible] ॥৪২॥

अन्वयः—[illegible] ॥४३॥

[illegible]

[illegible]

[illegible]

अमाम यन्नाम तवेह रूपं स्वेनाधिगत्य स्मितमुग्धभावाः।
तन्नो धिगाशापतितान्नरेन्द्र! धिक् चेदमस्मद्विबुधत्वमस्तु ॥४८॥
सा वागवाप्तायितमां नलेन तेषामनाशङ्कितवाक्छलेन।
स्वोरत्नलाभोचितयत्नमग्नमनेन हि न स्म प्रतिभाति किञ्चित् ॥४९॥

रूपं सन्दधन्तु इति मन प्राङ्‌बती, सखी मैत्री, सखाद्य मध्ये कश्चिदपि घटिष्यते, किमिति सम्भावयाम। तेनैव मदनागता इति भाव।

अत्र मदनपादे च्छेकानुप्रास। अभिधाया महतार्थे नियन्त्रणात् द्वितीयार्थ उपमानिमूलो वस्तुध्वनिरेव, न श्लेष। प्रसादो गुण, वैदर्भी च रीति ॥४७॥

বাঙ্গালা—আমরা সৌন্দর্য্য দ্বারা কামদেবকে জয় করিয়াছি; এখন আমাদিগকে আপনি পুরন্দর প্রভৃতি হইতে বড় বলিয়া মনে করুন। এই সভায় বহুতর রাজার নিকট ভ্রমণ করিতে করিতে ঐ দময়ন্তী আমাদেরও হইতে পারেন ॥৪৭॥

অন্বয়:—(হে) নরেন্দ্র! (বয়ং) নাম স্বেন তব রূপম্ অধিগত্য স্মিতমুগ্ধভাবা (সন্ত) যৎ ইহ অমাম, তৎ নঃ আশাপতিতান্ ধিক্ অস্তু ইদম্ অস্মদ্বিবুধত্বঞ্চ ধিক্ অস্তু ॥৪৮॥

অমামেতি। হে নরেন্দ্র! বয়, নামেত্যলীকস্তুতাবাম্, স্বেন আত্মনৈব ন পুন পরৈর্দিষ্টং, তব রূপ সৌন্দর্য্যম্, অধিগত্য অবগত্য প্রত্যক্ষীকৃত্যেত্যর্থ, স্মিত অবলম্বিতৌ মুগ্ধভাবৌ মূঢতা যৈস্তে তথোক্তা সন্ত, যৎ যস্মাৎ, ইহ সভায়াম্, অমাম তিষ্ঠাম, তস্মাৎ, ন অস্মাকম্, আশয়া দময়ন্তীলাভাশয়া পতিতাং দময়ন্ত্যা স্থানিতং ধিক্; অথবা আশয়া দময়ন্তী প্রাপ্স্যাম ইতি প্রত্যাশয়ৈব আপতিতান্ উপস্থিতান্, নঃ অস্মান্, ধিক্। তথা ইদমস্মাকং বিবুধত্ব পাণ্ডিত্যঞ্চ, ধিগস্তু; লক্ষীযস্বরূপদর্শনাবসর এব মুগ্ধভাবা অভবাম ইতি ভাব। অন্যত্র তু হে নরেন্দ্র! স্বেন স্বকীয়শরীরেণ, তব রূপমাকৃতিম্ অধিগত্য প্রাপ্যৈব, স্মিত অবলম্বিতৌ মুগ্ধভাব সৌন্দর্য্যং যৈস্তে তথাভূতা বয়ম্ যৎ যস্মাৎ ইহ সভায়াম্ অমাম কান্ত্যাজ্জ্বলা ভবাম, তস্মাৎ নঃ অস্মাকম্, আশাবলিনা দিক্পতিত্বং ধিক্, ইদমস্মাকং বিবুধত্বং দেবত্বঞ্চ ধিগস্তু। প্রাগুক্ত অন্যত্রাদি বহুধা ব্যাখ্যাতে।

অত্রাপি পূর্ববৎ দ্বিতীয়ার্থে উপমানিমূলো বস্তুধ্বনি। গুণরীতী পূর্ববৎ।

"মুগ্ধ সুন্দরমূঢয়ো" ইতি "বিবুধ পণ্ডিতে দেবে" ইতি চ বিশ্ব।

অমামেতি এষ "অম্ গত্যাদি" ইত্যস্য, অন্যত্র "অম্ দীপ্তৌ" ইত্যস্য পঞ্চম্যা (লোট্) উত্তমপুরুষবহুবচনে রূপম্ ॥৪৮॥

বাঙ্গালা—হে নররাজ! আমরা নিজেরাই আপনার রূপ প্রত্যক্ষ করিয়া, যে হেতু মুগ্ধ অবস্থায় এই সভায় অবস্থান করিতেছি; সেই হেতু আমাদের প্রত্যাশাবশে আগত এবং পতিত্বের প্রতিও ধিক্ এবং আমাদের এই পাণ্ডিত্যেও ধিক্ ॥৪৮॥

অন্বয়:—অনাশঙ্কিতবাক্ছলেন নলেন সা তেষাং বাক্ অবগম্য অভিনন্দিতা। হি স্ত্রীরত্নলাভোচিতযত্নমগ্নম্ অনেন কিঞ্চিৎ ন প্রতিভাতি স্ম ॥৪৯॥

অত্র দ্বিতীয়ার্থস্যোৎপ্রেক্ষা নলস্য তত্র দৃষ্টং পরিহার্য হি হি। অনাশঙ্কিতম্ অবিজ্ঞাতম্-ছলং যস্য তথাভূতং বাক্ছলং অভিপ্রায়ং ইতি যেন তেন নলেন, সা পূর্বোক্তা, তেষাং দিক্পালানাম্, বাক্ বচনম্,

अमी तमाहुः स्म यदत्र मध्ये कस्यापि नोत्पत्तिरभूदिलायाम्।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नापि बिभर्त्ति कश्चित्॥४६॥
तेभ्यः परान्नः परिभावयस्व [१] श्रिया विदूरीकृतकामदेवान्।
अस्मिन् समाजे बहुषु भ्रमन्तो भैमी किलास्मासु घटिष्यतेऽसौ॥४७॥

तथा च भवतामत्रास्माद्दृश्यमन्दरत्वात् पुरूरवा कामदेव अश्विनीकुमारद्वयं चेति चत्वार एव भवितुमर्हतीति भावः।

अत्र च्छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः। गुणरीती पूर्ववत्॥४५॥

বাঙ্গালা—বাস্তবিক নল, নিকটে উপবিষ্ট মিথ্যানলস্বরূপ ইন্দ্রপ্রভৃতি দেবশ্রেষ্ঠগণকে বলিলেন—'আপনারা চারি জন কি পুরূরবা, কামদেব এবং অশ্বিনীকুমারদ্বয় হইবেন না?'॥৪৫॥

अन्वयः—अमी तम् आहुः स्म यत्, अत्र मध्ये इलायां कस्य अपि उत्पत्तिः न अभूत्; ते सविधे स्थिताः (वयम्) अदर्पकाः स्मः, कश्चित् नासत्यताम् अपि न बिभर्त्ति॥४६॥

अमी इति। अमी मिथ्यानलभूता देवाः, तं सत्यनलम्, आहुः स्म उक्तवन्तः। किमाहुः स्म यत् अत्र एतेष्वस्मासु मध्ये, इलायां तदाख्यायां बुधस्त्रियाम्, कस्यापि उत्पत्तिर्नाभूत्, कोऽपि न पुरूरवा इत्यर्थः। ते तव, सविधे समीपे, स्थिता वयम् अदर्पका कामदेवभिन्ना स्म, न कोऽपि कामदेव इति तात्पर्य्यम्। तथा कश्चित् नासत्यताम् अश्विनीकुमारतामपि; न बिभर्त्ति न दधाति, कोऽपि नाश्विनीकुमार इत्यर्थः। पक्षान्तरे तु इलायां पृथिव्याम्, कस्यापि उत्पत्तिर्नाभूत्, अपि तु स्वर्ग एव सर्वेषामुत्पत्तिरभूदित्यर्थः। ते सविधे स्थिता वयम्, अदर्पकाः तव सौन्दर्य्यदर्शनेन स्वस्वसौन्दर्य्यगर्वरहिताः स्म। तथा कश्चिदपि असत्यतां मिथ्यानलरूपतां न बिभर्त्ति इति न, अपि तु सर्व एव वयं मिथ्यानलरूपतामेव बिभ्रम इत्यर्थः। एतत्पक्षेण तु प्रकृतं परिचयो दत्तः।

अतएव नलेन पूर्वश्लोकोक्तानां वाक्यानामेव देवैः श्लेषेणान्यथा करणात् श्लेषवक्रोक्तिरलङ्कारः। प्रसादो गुणः, वैदर्भी च रीतिः।

"इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च" इति मेदिनी॥४६॥

বাঙ্গালা—মিথ্যানলেরা সত্যনলকে ব'ললেন যে, আমাদের মধ্যে কাহারও ইলার গর্ভে উৎপত্তি হয় নাই; আপনার নিকটস্থ আমরা কামদেবও নহি; কিম্বা আমাদের মধ্যে কেহ অশ্বিনীকুমারতাও ধারণ করেন না॥৪৬॥

अन्वयः—श्रिया विदूरीकृतकामदेवान् नः तेभ्यः परान् परिभावयस्व। अस्मिन् समाजे बहुषु भ्रमन्ती असौ भैमी अस्मासु घटिष्यते किल॥४७॥

